ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला–दशम पुष्प

# वास्तुशास्त्रविमर्श

## सन्दर्भित एवं मूल्याङ्कित शोधपत्रिका

प्रधान सम्पादक
**प्रो. रमेशकुमार पाण्डेय**
कुलपतिः

सम्पादक
**प्रो. देवीप्रसाद त्रिपाठी**
आचार्य एवं अध्यक्ष

**वास्तुशास्त्र विभाग**
**श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ**
(मानित विश्वविद्यालय)
**नव देहली-११००१६**

# पुरो वाक्

परब्रह्म परमेश्वर जब सृष्टिरूपी वास्तु के निर्माण हेतु उद्यत होते हैं तब वे वेदात्ममय अनिरुद्ध के साकाररूप में स्वयं को अभिव्यक्त करते हैं। यही हिरण्यगर्भ के नाम से श्रुतियों में परिकीर्तित हैं। आदिभूत अर्थात् सबसे पहले व्यक्तीभूत होने के कारण से वे आदित्य हैं। इनसे ही जगत् की प्रसूति होती है अतः ये सूर्य के नाम से भी जाने जाते हैं (सूर्यसिद्धान्त भूगोलाध्याय 14-15)। ये सूर्य भौतिक जगत् में दृश्यमान सूर्य से पृथक् हैं क्योंकि दृश्यमान भौतिकसूर्य की उत्पत्ति ब्रह्मा के नेत्र से हुई है (सूर्यसिद्धान्त भूगोलाध्याय 22)। आदिभूत आदित्य के चतुष्पाद में से तीन पाद अमृतमय एवं गुप्त हैं तथा चतुर्थपाद यह स्थावरजङ्गात्मक दृश्यमान जगत् है (सूर्यसिद्धान्त भूगोलाध्याय 20)। अतः श्रुतियों में भी कहा गया है-

**पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि।**
**त्रिपादूर्ध्व उदैत्पुरुषः पादेऽस्येहाभवत् पुनः।।** पुरुषसूक्त 3-4

इस प्रकार यह ब्रह्माण्डवास्तु परब्रह्म परमेश्वर के चतुर्थपाद पर स्थित है। इसी ब्रह्माण्डवास्तु में हमारी पृथिवी है, जो सर्वप्रथम जलमग्न थी। इसे निवासयोग्य बनाने के लिए देवगण ने वास्तुपुरुष को इसके ऊपर प्रतिष्ठापित किया और स्वयं भी इसके ऊपर अधिष्ठित हुए। मत्स्यपुराण (अध्याय 251) में वर्णित वास्तुपुरुष की उद्भव कथा इस कथन की पुष्टि करती है। इस प्रकार पृथिवी का निर्माण हुआ, जिसमें समस्त जड़-चेतन प्राणियों के साथ मनुष्य निवास करने लगा। अपने सामाजिक रहन-सहन एवं व्यवहार के आधार पर मानव ने ग्राम, नगरादि अधिष्ठानों का निर्माण किया–

**द्विजकुलपरिपूर्णं वस्तु यन्मङ्लाख्यं नृपवणिग्भिर्युक्तं वस्तु यत्तत् पुरं स्यात्।**
**तदितरजनवासं ग्राममित्युच्यतेऽस्मिन् मठमिति पठितं यत्तापसानां निवासम्।।**

– मयमतम् 9, 40

मयाचार्य ने वास्तुशास्त्र के ग्रन्थ मयमतम् में मुख्यरूप से दश प्रकार के वासयोग्य अधिष्ठान कहे हैं-

**स्थानीयदुर्गपुरपत्तनकोत्मकोलद्रोणमुखानि निगमञ्च तथैव खेटम्।**
**ग्रामञ्च खर्वटमितीह दशैव युक्त्याधिष्ठानकानि कथितानि पुरातनार्यैः॥**

– मयमत 10, 92

इन वासयोग्य अधिष्ठानों में निवासयोग्य स्थल, भूखण्ड या गृह को ही सामान्यतः वास्तु कहा जाता है। जिसमें वस्तुसंग्रहणादिपूर्वक धर्म, अर्थ एवं काम इन तीन पुरुषार्थों का पालन विधिपूर्वक किया जा सकता है। वेदों में वर्णित वास्तुपद का अर्थ भी निवास या गृह ही होता है। इस वास्तु को अनुशासित करने वाला शास्त्र ही वास्तुशास्त्र है। इसलिए यह शास्त्र वास्तु निर्माणविधि के सिद्धान्तों एवं नियमों का प्रतिपादन करता है। सर्वविधसुखप्रद, शान्तमय, सुरक्षितभवन की निर्माणयोजना में सहायता प्रदान करना ही वास्तुशास्त्र का मुख्य उद्देश्य है।

वास्तु के मूलभूततत्त्व वेदों, वेदांगों, पुराणों एवं आगमग्रन्थों में दिखाई देते हैं। अथर्ववेद के उपवेद स्थापत्यवेद के रूप में प्रतिष्ठित वास्तुशास्त्र का विशेष रूप से ज्योतिष एवं कल्प के साथ घनिष्ठसम्बन्ध है। शुल्बसूत्रों में यज्ञवेदीपरिकल्पना इस शास्त्र की आधारशिला है। यजुर्वेदीयसंहिता में तो वास्तुशब्द का अर्थ प्रायः यज्ञवास्तु ही है। अथर्ववेद में सुवास्तु शब्द का प्रयोग शोभन व सुन्दर गृह के लिए तथा अवास्तुशब्द का प्रयोग गृहाभाव के लिए प्रयुक्त किया गया है। आपस्तम्बश्रौत्रसूत्र, पारस्करगृह्यसूत्र, कौशिकगृह्यसूत्र, कामिकातन्त्र, रामायण, महाभारत, मयमत, अपराजितपृच्छा, मानसार, कौटिल्यार्थशास्त्र आदि में भी वास्तु का विभिन्न अर्थों में वर्णन प्राप्त होता है।

इस प्रकार निःसन्देह भारत में अति प्राचीन काल से ही वास्तुशास्त्र की एक समृद्ध व सुदृढ़ अध्ययन-अध्यापन की परम्परा का प्रचलन रहा है। इसी को आगे बढ़ाने के सदुद्देश्य से विद्यापीठ में वास्तुशास्त्र विभाग की स्थापना हुई। प्रो. देवीप्रसाद त्रिपाठी के कुशल नेतृत्व में विभाग में शिक्षण एवं शोध कार्य निरन्तर गतिशील है। इसी सातत्य में विभाग द्वारा

**वास्तुशास्त्रविमर्श** नामक शोधपत्रिका का सतत रूप से प्रकाशन होता आ रहा है, जिसमें विद्वानों के उत्कृष्ट शोधलेखों का प्रकाशन किया जाता है। इसी क्रम में **वास्तुशास्त्रविमर्श** के इस दशम पुष्प को विद्वज्जनों को समर्पित करते हुए मुझे अत्यन्त हर्ष हो रहा है। इस सारस्वत कार्य हेतु मैं प्रो. त्रिपाठी एवं उनके सहयोगियों को अत्यन्त साधुवाद देता हूँ। साथ ही आशा करता हूँ कि वे इसी प्रकार मां भारती की सेवा एवं साधना में निरत रहेंगे। शमिति।

मार्गशीर्ष पूर्णिमा, वि.सं.2074 **प्रो. रमेशकुमार पाण्डेय**

दिनांक 03.12.2017 कुलपति

# सम्पादकीय

भारतीय संस्कृति के मूल वेद हैं। वेदों में ही ऋषियों का अलौकिक ज्ञान प्रतिफलित होता दिखाई देता है। जगत् का आदिमतम ग्रन्थ वेद ही भाव और भाषा की दृष्टि से आज भी दुरूह बना हुआ है। ज्ञान के इस प्रकाश के बोधगम्य न होने पर किसी ने इसको कृषकों का गीत कहा, किसी ने अशिक्षित आदिमानव का व्यर्थ प्रलाप समझा, किसी ने प्रकृति के ताण्डव से भयभीत असहाय भाव का आर्तनाद माना और किसी ने सोचा कि यह एक अदृश्य शक्ति के सामने मूढ़ मानव की व्याकुल प्रार्थना है इत्यादि।

स्व श्रेष्ठता प्रतिष्ठापित करने के उद्देश्य से इसी प्रकार प्राच्य विज्ञान का, पाश्चात्य विज्ञान उपहास करता आया है। इन तथ्यों पर विचार करने की किसी ने आवश्यकता अनुभव नहीं की कि आधुनिक विज्ञान ने बहिर्मुख पर्यवेक्षण के द्वारा जिन सब तत्त्वों का आविष्कार किया है, उन्हीं को प्राचीन प्राच्य विज्ञान ने अन्तर्मुख साधना के माध्यम से यम-नियम से आरम्भ कर समाधि तक की यात्रा करते हुए ध्यानावस्थित होकर तत्त्वों के कारणों की उपलब्धि की, और इन्हीं सारी उपलब्धि को ही ऋषियों ने वेद के माध्यम से प्रकाशित किया। इसीलिए भारतीय मनीषा इन तथ्यों को स्वीकार करती है कि सम्पूर्ण ज्ञान और विज्ञान का मूल वेद ही है। यथोक्तम्– **सर्वज्ञानमयो हि सः॥** (मनुस्मृति 2,7) **सर्वं वेदात् प्रसिद्ध्यति।** (मनुस्मृति 12,97) इति।

जिन विद्याओं का वैदिक पृष्ठभूमि पर विकास हुआ, वे विद्याएँ मानव ही नहीं, अपितु सृष्टि के प्रत्येक जीव के लिए कल्याणकारी सिद्ध हुई। भारत में विकसित सभी की आधारशिला वेद ही है, भारतीय परिप्रेक्ष्य में समस्त विज्ञान और कलाएँ अध्यात्म में अनुस्यूत होकर ही विकसित हुई। ऐसा विज्ञान या ऐसी कला जो भारतीय परिप्रेक्ष्य में विकसित हुई,

उनको जानने वाले वैज्ञानिकों की संज्ञा ऋषि थी, जो अध्यात्म, धर्म, प्रकृति, ईश्वर आदितत्त्वों के विरोधी नहीं अपितु पोषक थे। आधुनिक विज्ञान प्रकृति को मृत मानते हुए प्रायः प्रत्येक आविष्कार के द्वारा प्राकृतिक सम्पदाओं को हानि पहुँचा रहा है, जबकि भारतीय प्राच्य विज्ञानों के विकास में सर्वाधिक महत्त्वपूर्ण पक्ष यही था कि उनके द्वारा आविष्कृत कोई भी पदार्थ प्रकृति के छोटे से छोटे तत्त्व को भी किसी प्रकार से हानि न पहुँचाएँ। वेद के विविध मन्त्रों से यह ज्ञात होता है कि वैदिक ऋषि प्रकृति के साथ एक सम्बन्ध स्थापित करता था। वह पृथ्वी को माँ और स्वयं को उसका पुत्र मानकर पृथ्वी के साथ वैसा ही आचरण करता था जैसा एक पुत्र अपनी माँ के साथ करता है। यथोक्तम्– **"माता पृथ्वी पुत्रोऽहं पृथिव्याः"** (अथर्ववेद 12.1.12 ) द्युलोक को वह पिता मानता है, वृक्षों को, नदियों को, सूर्य, चन्द्र, वायु, जल आदि समस्त प्राकृतिक तत्त्वों को वह देवता मानता है। उनके प्रति आस्था और श्रद्धाभाव रखता हुआ उनका त्यागपूर्वक भोग करता था। वैदिक ऋषि इस सम्पूर्ण सृष्टि के प्रत्येक तत्त्व में ईश्वर की उपस्थिति को अनुभव करता हुआ कहता है– **"ईशावास्यमिदं सर्वम्"** (ईशोपनिषद् 1)

ऐसी दृष्टि रखने वाले ऋषि ने कला और कलाविदों के प्रति सम्मान के भाव का उपस्थापन विविध वैदिक मन्त्रों में किया है। वेद में विविध कलाओं की चर्चा प्राप्त होती है और उन कलाओं को जानने वाले शिल्पी को महान् कहा गया है। ऋग्वेद में चमस अर्थात् सोमपात्र (4/35/03), त्रिचक्र रथ (4/36/01) एवं बृहतमान अर्थात् भव्य भवन के निर्माता (4/36/02, 4/36/06, 4/33/01) ऋभु का उल्लेख प्राप्त होता है। शिल्पी ऋभु चमस बनाते समय न तो एक साधारण बढ़ई बन जाता है और न रथ बनाते समय एक कुशल तकनीकविद् और न भव्य भवन बनाते समय एक महान् वास्तुकार, इन तीनों सौन्दर्यमयी रचनाओं के सृजन के समय वह समान रूप से एक महान् शिल्पी ही रहता है। चमस का निर्माण उसके लिए हेय नहीं है और भवन निर्माण उसके लिए अधिक महत्त्वपूर्ण कार्य नहीं है। ऋभुओं के चमस को देखकर ही देवताओं ने उस शिल्पी को भी देवगणों में सम्मिलित कर उनको ऋभुदेवगणों की संज्ञा दी। इस तथ्य का अभिप्राय यही है कि ऋषि की दृष्टि में सभी कलाएँ समान हैं। उसकी दृष्टि में कोई विभेद नहीं है कि जो चमस बनायेगा वह

रथ नहीं बनायेगा और जो रथ बनायेगा वह भवन नहीं बनायेगा। अपितु बहु-कलाविद् होना पूर्णता और गौरव का विषय माना जाता था। वाजसनेयी संहिता में वैदिक वैज्ञानिकों की एक लम्बी तालिका प्राप्त होती है, जिसमें त्वष्टा (तक्षक) हिरण्यकार (स्वर्णकार) कर्मार (धातुकर्मी) रथकार, चर्मस्न (चर्मकार) कुलाल (कुम्भकार), तन्तुवाय (बुनकर), रजयित्री (धोबिन), इषुकृत, धन्वकृत, वाप्ता, नृतु, जरित्र, शैलूष आदि कलाकारों का विवरण प्राप्त होता है (उद्धृत- वैदिककालीन रूपकर कलाएं, पृ. 22)। इसमें ऊँच-नीच का भेद नहीं है। वाप्ता (नाई) भी समाज में उतना ही सम्मानित है जितना कि रथकार, कुशल तक्षक या कोई अन्य शिल्पी। शिल्पी की कोई जाति नहीं है। उसे आनंद (ब्रह्म) का साधक, मन, वचन और कर्म से पवित्र व्यक्ति माना गया है। वह ऋषि है, दार्शनिक है, सृजनकर्ता है। इन सब शिल्पियों का आदर्श विश्वकर्मा है। वेद में इन्द्र की प्रतिमा के उल्लेख से ज्ञात होता है कि इन्द्र की प्रतिमाएँ बनाई जाती थीं जिनका उपयोग इन्द्रोत्सव में किया जाता था (ऋग्वेद 4/24/10)। यज्ञशाला का यूप मूर्ति-पूजन का प्रारम्भिक संकेत है। यज्ञ-वेदी का निर्माण अत्यन्त सूक्ष्मेक्षया किया जाता था। विविध प्रकार के यज्ञों के लिए विविध प्रकार की यज्ञ-वेदियों के निर्माण की परम्परा थी, जिसमें मापन का विशेष महत्त्व था। मापन का यही सिद्धान्त आगे चलकर भवन निर्माण की आधारशिला बना। वस्तुतस्तु आधुनिक भव्य मन्दिरों के मूल में वैदिक यज्ञ-वेदी ही थी। मन्दिरों के निर्माण में भी उसी प्रकार से मान का महत्त्व था, जैसे यज्ञवेदी में था। मन्दिर को तभी रम्य माना जाता था, जब उसका निर्माण वास्तुसम्मत होता था। शास्त्रमान के विरुद्ध निर्मित मन्दिर भवन सुन्दर दिखाई देने पर भी पूज्य नहीं माना जाता था। यथोक्तम्-

**शास्त्रमानेन यो रम्यः स रम्यो नान्य एव हि।**
**शास्त्रमानविहीनं यदरम्यं तद्विपश्चिताम्॥** - शुक्रनीति 4/527

इस प्रकार से मन्दिर का निर्माण पूर्णतः अनुशासित ढंग से वास्तुशास्त्रीय सिद्धान्तों के अनुरूप ही किया जाता था। यही परम्परा देवप्रासादों से होती हुई राजप्रासादों में अनुकरणीय हो गई और शनैः शनैः साधारण भवनों तक पहुँची। वास्तुशास्त्रीय भारतीय दृष्टि में भवन ईंट, पत्थर रेत और सीमेंट से निर्मित केवल पार्थिव ढाँचा मात्र नहीं है, अपितु

ऋषियों ने भवन के अपार्थिव तत्त्वों का चिन्तन किया और किस प्रकार से उन अपार्थिव तत्त्वों को जागृत किया जाय और उनकी चेतनता का लाभ मानव-मात्र को प्राप्त हो सके, इस हेतु वास्तुशास्त्र के विविध आचार्यों ने अपराजित-पृच्छा, क्षीरार्णव, समराङ्गणसूत्रधार, विश्वकर्माप्रकाश, मयमतम् आदि अनेक ग्रन्थों में उन वास्तुशास्त्रीय सिद्धान्तों का उल्लेख है।

वास्तुशास्त्र की इस विस्तृत परम्परा एवं वर्तमान में इसके स्वरूप को देखते हुए आज वास्तुशास्त्र विभाग इस शास्त्र के सैद्धान्तिक और प्रायोगिक दोनों पक्षों के अध्यापन में निरन्तर क्रियाशील है। इस दृष्टि से विद्वानों, शोधार्थियों एवं जिज्ञासुओं के निबन्धों से सुसज्जित वास्तुशास्त्रविमर्श का प्रकाशन विगत कई वर्षो से विभाग द्वारा अनवरत किया जा रहा है।

इस वास्तुशास्त्र विमर्श के दशम पुष्प के प्रकाशन के शुभावसर पर मैं सर्वप्रथम संस्कृत व संस्कृति के संरक्षक परमश्रद्धेय यशस्वी कुलपति महोदय प्रो. रमेश कुमार पाण्डेय जी को सादर अभिनन्दन पूर्वक कृतज्ञता प्रकट करता हूँ, जिनके सन्मार्गनिर्देशन एवं संरक्षकत्व में वास्तुशास्त्र विभाग का यह पुष्प सुधी पाठकों के करकमलों में समर्पित है। इस अवसर पर मैं पूर्व कुलपति स्व. प्रो. वाचस्पति उपाध्याय जी एवं पूर्व ज्योतिष विभागाध्यक्ष स्व.प्रो. शुकदेव चतुर्वेदी जी को श्रद्धासुमन समर्पित करता हूँ, जिनके शुभाशीर्वाद से वास्तुशास्त्रविभाग पल्लवित एवं पुष्पित हो रहा है। इसी सन्दर्भ में शोध एवं प्रकाशन समिति के सदस्यों (डॉ. रश्मि चतुर्वेदी, डॉ. अशोक थपलियाल, डॉ. देशबन्धु, डॉ. प्रवेश व्यास) तथा अन्य विभागीय समस्त विद्वानों को भी हार्दिक धन्यवाद प्रदान करता हूँ, जिनके सत्परामर्श एवं सहयोग से वास्तुशास्त्रविमर्श का यह पुष्प प्रकाशित हो सका। मुद्रणकार्य हेतु अमर प्रिंटिंग प्रेस एवं अन्य सभी सहयोगी सुहृज्जनों का हार्दिक आभार प्रकट करता हूँ। शमिति

**प्रो. देवीप्रसाद त्रिपाठी**

अध्यक्ष - वास्तुशास्त्र विभाग

# शोध एवं प्रकाशन समिति

# विषयानुक्रमणिका

# वेदेषु वर्णितानां वास्तुविज्ञानसिद्धान्तानां विमर्शः

**विद्यावाचस्पतिः डॉ.सुन्दरनारायणझाः**

वस्तुतो वेद इति शब्दश्रवणादृग्यजुस्सामाथर्वसंज्ञकानां शब्दराशिभूतानां चतसृणामपि संहितानां बोधो भवति। यद्यप्यापस्तम्बादिभिर्वैदिकैराचार्यैर्वेदानां द्विविधं स्वरूपं स्वीक्रियते **मन्त्रब्राह्मणयोर्वेदनामधेयम्**[1] इति। तत्र मन्त्रब्राह्मणयोर्लक्षणं प्रस्तूयता महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायामुक्तं- **तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। विधायकं वाक्यं ब्राह्मणम्**[2] इति। **ब्रह्म वै मन्त्रः**[3] इति ब्राह्मणोक्तवचनाद्ब्रह्मवेदयोरैक्यं सिद्ध्यति। अत्र ब्रह्मपदं कर्मबोधकं सद्यज्ञस्यैवोद्बोधकमिति ज्ञायते। तस्माद्यज्ञादीनां साङ्गोपाङ्गानि विधिविधानानि यत्रोक्तानि तानि ब्राह्मणानीति। ब्रह्मपदव्याख्यानावसरे प्राचीनैर्ऋषिभिरेवमुक्तम्-

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्मपरञ्च यत्।**
**शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति।।**[4]

शब्दब्रह्मरूपेणात्र शब्दराशिभूताः मन्त्रब्राह्मणात्मकाः वेदा उक्ताः। परब्रह्मपदेन च सर्वजगत्कारणभूत अनादिनिधनाव्यक्तागोचरानन्तादिपदैर्व्यवह्रियमाणः परमात्मा बुध्यते। तत्रेदमुच्यते यच्छब्दब्रह्मरूपाः वेदाः परब्रह्मणो मूलस्वरूपमुपवर्णयन्ति। तेनेदं सिद्धं यद्वेदेषु ये मन्त्राः पठितास्सन्ति तेषां तात्त्विकार्थज्ञानद्वारा शब्दब्रह्मणि निष्णाततामवाप्तुं शक्यते। ये जनाः शब्दब्रह्मणि निष्णाताः भवन्ति ते परब्रह्माणमधिगच्छन्तुं समर्थाः भवन्तीति।

तत्रापि च मन्त्रब्राह्मणात्मकेषु वेदेषु यस्य यज्ञस्वरूपस्य परमात्मनो वर्णनमस्ति सः परमात्मा मन-प्राण-वाक्-आनन्द-विज्ञानमयोऽस्तीत्युक्तम् उपनिषदादिषु। तद्यथा- **स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदं मयोऽदोमय इति।।**[5]

अनेनेदं सिद्ध्यति यद्वेदेषु सर्वविधं ज्ञानविज्ञानं सुविस्तृतेन व्याख्यातमस्ति। तस्मान्मनूक्तवचनमिदं

---

1. आपस्तम्बश्रौतसूत्रे-24/1/31
2. मीमांसा परि.- पृष्ठ-4 (वेदद्वैविध्यम् इति प्रकरणे)
3. शतपथब्राह्मणे-7/1/1/5
4. अमृतबिन्दूपनिषदि-17 ; मैत्रायण्याम्-6/12
5. बृहदारण्यकोपनिषदि-4/4/5

**सर्वज्ञानमयो हि सः**[6] इति साधुरेव। तत्र ज्ञानमिति कथनेनाध्यात्मविद्यायाः बोधो भवति। यतस्त्वनेकस्मादेकस्मिन्नारोहणं ज्ञानं ब्रह्मविद्येत्युच्यते। तथैकस्मादनेकस्मिन्नवतरणं विज्ञानं यज्ञविद्येति। तस्मादुक्तं श्रुतौ- **विज्ञानं यज्ञं तनुते**[7] इति। अनेनेदं स्फुटं भवति यद्ब्रह्मविद्यातिरिक्ताः सर्वा अपि विद्या अनेकत्वप्राधान्याद्यज्ञविद्यायामर्थाद्विज्ञान एवान्तर्भवन्ति। विज्ञानस्य कर्माणि प्रयोगशालायामर्थात् प्रायोगिकस्थले सम्पाद्यन्ते, यज्ञार्थमपि यज्ञशालात्वेन प्रसिद्धैका प्रयोगशाला भवत्यपेक्षिता तस्माद्यज्ञविद्या विज्ञानमित्युच्यते। आभ्यामेव ज्ञानविज्ञानाभ्यां मानवजीवनस्य कृतकृत्यता सम्पद्यते। इदमेव ज्ञानविज्ञानयुगलं मुख्यो धर्मः। तत्र ज्ञानं निःश्रेयसजनकम्, विज्ञानन्त्वभ्युदयहेतुः। तदुक्तं परमवैज्ञानिकेन भगवता कणादेन- **यतोऽभ्युदयनिःश्रेयससिद्धिस्स धर्मः**[8] इति।

उपर्युक्तैर्विवेचनैरिदं स्फुटं यद्वेदेषु सर्वविधज्ञानविज्ञानस्य पर्याप्तसामग्र्यो विद्यन्ते। अस्माकं पूर्वजैः कृष्णाजिनेषूपविष्टैस्सत्यानुसन्धानतत्परैर्ऋषिभिर्यत्किञ्चिदवलोकितं तत्सर्वमप्याधुनिकैर्नवीनैः ऋषिभिरनुसन्धितमिति। रहस्यस्यास्योद्घाटनमृग्वेदस्यैकेन मन्त्रेण भवति यथा-

**अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत ।**
**स देवाँ एह वक्षति ।।**[9] **इति।**

अत्र पूर्वेभिः ऋषिभिरिति कथनेन पुरातनैर्वसिष्ठात्रिकश्यपादिभिर्मन्त्रद्रष्टृभिरिति बुध्यते। नूतनैरिति पदेन चान्यैः श्रुतर्षिभिरिति, तैश्च पुरातनैर्नूतनैश्च ऋषिभिस्सोऽग्निरीड्य इति स्फुटं भवति। सम्प्रत्यनुसन्धानशब्दोच्चारणेन तदेवार्थमवगम्यते। यथा- अन्विति पदमानन्तर्यस्य बोधकम्। सन्धानमितीक्षणम्। उभयमपि मिलित्वाऽनुसन्धानमिति सिद्ध्यति। अस्यानुसन्धानपदस्यानेके पर्यायाः विद्यन्ते- अन्वेषणम्, गवेषणम्, अन्वीक्षणम्, शोधकार्यमित्यादयः। अत्र प्रश्नोत्पद्यते यदनुसन्धानं कस्य भवति? तत्रेदमुच्यते यद्यस्य वस्तुनः पूर्वं सन्धानं कृतं स्यात्तस्यैवेदानीं पुनरवलोकनायानुसन्धानं क्रियते। शब्दोऽयं वैज्ञानिकभाषायां प्रयुक्तः। तस्माद्वेदेषु वैज्ञानिकविषयाणां विवेचनमस्तीति कथने न कस्यापि विप्रतिपत्तिरिति।

विज्ञानमिति पदस्यार्थो भवति विशिष्टं ज्ञानम्। तत्रामरसिंहेनोक्तं- **मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः**[10] इति। भगवता श्रीकृष्णेनाप्युक्तम्- **ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः**[11] इति। अर्थाच्छिल्पशास्त्रादिषु यदाविष्कारात्मकं ज्ञानं व्याख्यातं तद्विज्ञानपदबोध्यमिति। यज्ञादिकं

---

6. मनुस्मृतौ-2/7
7. तैत्तिरीयारण्यके-8/5/1 ; तैत्तिरीयोपनिषदि-2/5/1
8. वैशेषिकसूत्रे-1/2
9. ऋग्वेदे-1/1/
10. अमरकोषे-धीवर्गे-6 तमे श्लोके
11 श्रीमद्भगवद्गीतायां-7/2
12. गोपथब्राह्मणे-2/6/7

शिल्पशास्त्रान्तर्गतमेव स्वीक्रियते, यतस्तत्र वेद्यादिसाधनं शिल्पानुमतमेव भवति। याज्ञिकप्रक्रिया चापि पूर्णतो वैज्ञानिकी भवति, तत्र यजमानस्यासद्वृत्तेर्विनाशः सद्वृत्तेरुदयश्च क्रियते, तेन स स्वर्गमाप्नोति। एतस्मादेव कारणात्- **आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति**[12] तथा च- **आत्मा वै यज्ञः**[13] इत्युक्तं श्रुतिषु। आत्मसंस्काररूपं कर्म नावैज्ञानिकं भवितुमर्हति। यत आत्मनो विज्ञानरूपत्वं स्वयं सिद्धमेव। तस्य विज्ञानरूपस्यात्मनः संस्कारो विज्ञानं विना कथं शक्यः? अतो यज्ञस्य वैज्ञानिकत्वमुक्तं पूर्वम्। आधुनिकविज्ञानानुसारं येषां वैज्ञानिकविषयाणामध्ययनमुद्घुष्टं तत्सर्वमत्र वेदे विस्तृतेन व्याख्यातमस्ति। यथा- भौतिकविज्ञानम्, रसायनविज्ञानम्, वनस्पतिविज्ञानम्, जन्तुविज्ञानम्, प्रौद्योगिकीविज्ञानम्, कृषिविज्ञानम्, गणितविज्ञानम्, ज्योतिर्विज्ञानम्, वृष्टिविज्ञानम्, पर्यावरणविज्ञानम्, अन्तरिक्षविज्ञानम्, भूगर्भविज्ञानम्, आयुर्विज्ञानम्, सूर्यविज्ञानम्, अग्निविज्ञानम्, खगोलविज्ञानम्, पिण्डविज्ञानम्, ब्रह्माण्डविज्ञानम्, वास्तुविज्ञानम् इत्यादीनि सर्वाण्यपि विज्ञानानि वैदिकयज्ञविज्ञानान्तर्गतानि सन्ति।

वेदेषु उपर्युक्तैराधुनिकविज्ञानविषयैश्चाप्यधिकविषयाणां वर्णनान्युपलभ्यन्ते तानि च विज्ञानान्यस्माभिर्विस्मृतानि सम्भाव्यते यत्कालान्तरेषु तान्यस्माकं साक्षात्कृतानि स्युः, परमधुना दाढ्र्येन वक्तुमशक्यानि। तदेतस्यां परिस्थिताविह प्रकृतविषयमनुसृत्य वास्तुविज्ञानदृशा तावत्किञ्चिद्विचार्यते।

वास्तुशब्दस्य निर्वचनं प्रस्तूयता निर्वचनशास्त्रप्रवक्त्रा वैज्ञानिकान्वेषणशीलवता भगवता यास्काचार्येणोक्तम्- **वास्तुर्वसतेर्निवासकर्मणः**[14] इति। पाणिनीयव्याकरणस्य **वस्-निवासे**[15] इत्यस्माद्धातोः **वसेस्तुन् वसेर्णिच्च**[16] इत्यनयोः सूत्रयोः **वस्**धातौ तुन्-प्रत्यये कृते सति **वस्तु**शब्दो निष्पद्यते। **वस्**-धातौ णित् प्रत्यये कृते सति णित्वादुपधावृद्धिस्तेन **वास**शब्दो निष्पन्नो भवति। वासशब्दे च पुनः तुन्-प्रत्यये कृते सति **'वास्तु'** शब्दो निष्पद्यते। **वस्तु**शब्दे च **णि**त्वात् **वास्तु**रिति शब्दो निष्पद्यते। तस्य च वास्तोः पाता पालयिता वा वास्तोष्पतिरिति वैदिको देवविशेषः। वास्तुशब्दस्यार्थो भवति वासयोग्यं यत्स्थानं तद्वास्त्विति। अस्य वासयोग्यस्य स्थानस्यावश्यकता सर्वेभ्योऽपि देव-दानव-मानव-पशु-पक्षि-कृमि-कीट-पतङ्ग-पिपीलिका-लता-गुल्म-वृक्ष-वनस्पत्यन्नौषध्यादिभ्यो वर्तत एव। यतस्तु यत्र यो वसति तदेव तस्य वास्तुः।

वस्तुतः सर्वेऽपि देवाः प्राणिनश्च कश्मिंश्चिदपि स्थानविशेषे निवसन्ति। यथा वैकुण्ठे विष्णुः, कैलाशे शिवः, स्वर्गे इन्द्रादयो देवाः, पाताले दानवाः, पृथिव्यां गृह-भवन-प्रासाद-आलय-निलय-पुर-वेश्मादिषु च मानवाः, मानवनिर्मितगोष्ठादिषु गवाश्वादयो ग्राम्यपशवः, समुद्रनदीतड़ागादिषु जलचरजीवाः, वृक्षकोटरेषु नीडेषु वा खगाः, गुहासु गहनवनेषु च सिंहव्याघ्रादयो वनचरा वन्यप्राणिनः, बिलेषु मूषकमण्डूकसर्पपिपीलिकादयो जीवाः, धरणीमाश्रित्य वृक्षवनस्पत्यन्नौषध्यादयो निवसन्ति।

वेदेषु वैदिकवाङ्मयेषु च क्वचिदपि कस्यचिदेकस्यैव जातेः व्यक्तेश्च कल्याणार्थं न

13. शतपथब्राह्मणे-6/2/1/7
14. निरुक्ते-10/2/16
15. भ्वादिगणे- परस्मैपदी, सिद्धान्तकौमुद्याम्

किमप्युक्तमपितु समस्तसंसारस्य समस्तप्राणिनाञ्च कल्याणाय बहुत्रोक्तमस्ति। यथा- **योगक्षेमो नः कल्पताम्**[17] अत्र **नः** बहुवचनात्मकः शब्दः, यस्यार्थो भवत्यस्माकमिति। एवमेवान्यत्रापि **शं नो देवीः**[18] **स नो वसून्याभर**[19]**, शं नो अस्तु द्विपदे शं चतुष्पदे**[20]**, वयं स्याम पतयो रयीणाम्**[21]**,** इत्यादिषु स्थलेष्वपि बहुवचनस्यैव प्रयोगो वर्तते। तेनेदं स्पष्टं यद्वास्तु- प्रयोजनमपि सर्वेभ्य एव प्राणिभ्यो वर्णितम्, तथाप्यधुना सर्वप्राणिषु मानवस्योत्कृष्टत्वं सर्वविधज्ञानविज्ञानशीलत्वं, सुखसमृद्ध्यर्थं सततपरिश्रमशीलत्वमवलोक्य च तेभ्य एव विशेषरूपेण वास्तुप्रयोजनं शास्त्रेषु निर्दिष्टम्। यतः सुखर्द्धि-सन्तति-धनानि च सर्वदा सर्वेषां नृणां प्रियाणि भवन्ति। तैत्तिरीयसंहितायामुक्तं यत्- **बहिः प्राणो वै मनुष्य**[22] इति। अर्थान्मानवाः बाह्यसुखमवलोक्य तत्प्राप्तुं सततं यत्नशीलाः भवन्ति। बाह्यसुखेषु भोजनं वस्त्रमावासश्च मुख्यरूपेण मनुष्येभ्यः कल्पिताः। मनुष्याणां कृते यावन्त्योऽप्यावश्यकताः सन्ति निर्दिष्टास्तास्वावश्यकतासु एतास्तिस्रो मुख्याः। आसु तिसृष्वावश्यकतास्वपि आद्ये द्वे आवश्यकते भोजनवस्त्ररूपे तदैव सम्पूर्णे भवतः यदाऽन्तिमा आवासजन्याऽऽवश्यकता पूर्णा भवति। यत आवासस्थानं विना भोज्यवस्तूनां परिधानानाञ्च रक्षणमसम्भवम्। तस्मात्तयोरभिवृद्ध्यर्थमन्तिमाऽऽवश्यकता खल्वावासरूपाऽत्यन्तमहत्त्वपूर्णाऽस्ति। अत एव श्रौताचार्यास्तेषामनुयायिनोऽन्येप्याचार्याः सर्वास्वावश्यकतासु देश-पुर-निवास-वेश्मादीन् श्रेयस्करत्वेन स्वीकृतवन्तः, तदनुसृत्यैवात्र किञ्चिद्विचार्यते।

निरुक्तशास्त्रे- **गृहनामानि द्वाविंशतिः**[23] यथा- **1.**गयः, **2.**कृदरः, **3.**गर्त्तः, **4.**हर्म्यम्, **5.** अस्तम्, **6.**पस्त्यम्, **7.**दुरोणे, **8.**नीळम्, **9.**दुर्याः, **10.**स्वसराणि, **11.**अमा, **12.**दमे, **13.**कृत्तिः, **14.** योनिः, **15.**सद्म, **16.**शरणम्, **17.**वरूथम्, **18.**छर्दिः, **19.**छदिः, **20.**छाया, **21.**शर्म, **22.**अज्मेति द्वाविंशतिर्गृहनामानि निघण्टौ पठितानि। अन्यत्र च सदनम्, गृहम्, शालेत्यादयोऽप्यनेके शब्दाः प्रयुक्ताः सन्ति। एतेषां शब्दानां विस्तृतं विवेचनम्मया विद्यापीठीयवास्तुशास्त्रविभागेन प्रकाशितायां 2015 तमाब्दीयायां **वास्तुशास्त्रविमर्शाख्य**पत्रिकायां कृतं तस्मादत्र पिष्टपेषणमकृत्वैव वास्तुविज्ञानसिद्धान्त-विमर्शम्प्रत्यग्रेसरामि।

वस्तुतः निवासस्थानस्य निर्माणार्थमुचितभूमेश्चयनं सर्वप्रथममावश्यकम्भवति। तत्रापि भूपरीक्षणम्, दिक्साधनम्, वर्णव्यवस्थया परिवेशविशेषेण च भूमेः परिमापनम्, इष्टकानिर्माणम्, इष्टकास्थापनम्, गृहपरिमाणम्, इष्टकाचयनम्, द्वारनिर्माणमित्यादयो विविधा विषयाश्चिन्त्यन्ते। एते सर्वेऽपि विषयाः वेदेषु वर्णितेषु यज्ञपरम्परायां साधु चर्चितास्सन्ति। तानेव विषयानादाय क्वचित्कतिचित्परिवर्तनेन वेदाङ्गभूते ज्योतिषशास्त्रावयवे वास्तुशास्त्रे पुरातनैरस्माकमृषिभिर्नूतनःसिद्धान्तः प्रदर्शितमिति। तेनेदं

16. उणादिप्रकरणे- सू.-75 तथा 657
17. शु.य.संहिता -2/22
18. ऋग्वेदसंहितायाम्- 10/9/4, साम-33, अथर्व सं.-1/6/1, शु.य.संहिता-36/12, तै.ब्रा1/2/1/1, तै.आ-4/42/4
19. ऋ.संहिता-10/191/1, शु.य.संहिता-15/30
20. ऋ.संहिता-10/165/121 शु.य.संहिता-19/44 , 'अथा नो वर्धया रयिम्'-शु.य.सं.-15/56, 3/14
22. तै.संहिता- 6/1/1/4
23. निघण्टौ-3/4

स्फुटमेव प्रतिभाति यद्वेदेषु वास्तुविज्ञानसिद्धान्ताः सन्त्यनुस्यूता इति। तदन्विह वेदेषु वर्णितानां केषाञ्चन प्रमुखवास्तुविज्ञानसिद्धान्तानां विमर्शो विधीयते।

**भूचयनम्**- निर्माणकार्यं कर्तुं सर्वप्रथममिदं विचिन्त्यते यत्कुत्र निर्माणकार्यमुचितं भविष्यतीति। तदर्थमियं भूमिरेव प्रतिष्ठेत्युक्ता **अभूद्वाऽइयं प्रतिष्ठेति। तद् भूमिरभवत्**[24] इति श्रौतवचनात्। यतो ह्यत्रैव गृहनिर्माणं क्रियते। तदेव गृहं प्रतिष्ठावाचकमिति। यथा- **गृहा वै दुर्याः**[25] **गृहा वै प्रतिष्ठा**[26] **गृहा गार्हपत्यः**[27] **प्रतिष्ठा गार्हपत्यः**[28] एभिः श्रौतवचनैरिदं स्पष्टं भवति। सेयं भूमिः कीदृशी स्याद्यत्र यज्ञायोपयुक्तं गृहनिर्माणं कर्तुं शक्येत? इत्यस्मिन् विषये प्राह महर्षिकात्यायनेन स्वकीये शुल्बसूत्रे-

**संख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः।**
**समभूमौ भवेद्विद्वान् शुल्बवित् परिपृच्छकः॥**[29]

समे भूमौ शुल्बशास्त्रस्य ज्ञाता निर्माणकार्यं कुर्यादिति। समत्वज्ञानाय चापि कात्यायनो वदति-

**न जलात्सममन्यत् स्यान्नान्यद्वृत्तात्प्रमा भवेत्।**
**नान्यद्दूरं भ्रमादूर्ध्वं नान्यत्सूत्रादृजुर्भवेत्॥**[30]

एवमुक्तप्रकारेण भूमेस्समत्वं विज्ञाय निर्माणकार्यं करणीयमित्यस्माकमृषीणामभिप्रायो वर्तते। एवमेव विधिना वास्तुशास्त्रविद्भिरपि समे भूमौ गृहनिर्माणादिकं समुपदिष्टमिति।

**भूपरीक्षणम्**- भूपरीक्षणायादौ सायंकाले हस्तपरिमितं चतुरस्रं गर्तं कृत्वा जलेनापूर्य प्रातःकाले तस्य गर्तस्य स्वरूपमवलोक्य वासस्थानाय योग्यायोग्यभूमिज्ञानं क्रियते सैषा विधिर्वास्तुशास्त्रविद्भिरुक्ता। वैदिकयज्ञे वेदिखननरूपं भूपरीक्षणं व्याख्यातमस्ति। तद्यथा- **अपरेणाऽऽहवनीयं वेदिं खनति त्र्यङ्गुलखाताम्**[31] **आमूलोच्छेदनादोषधीनाम्**[32] इत्यत्रेदमवधेयं यत् यस्मिन् देशे वेदिः परिमीयते तत्र रूढानामोषधीनां मूलं यावता खननेन उच्छिद्येत् तावत् खातव्यमिति। साम्प्रतमपि भूपरीक्षणायैषैव प्रक्रिया स्वीक्रियते परं तत्र भेदोऽयमस्ति यच्छ्रौते वेदिनिर्माणाय त्र्यङ्गुलं खन्यते, अत्र भूपरीक्षणविधौ हस्तपरिमितमिति। तेनास्य विधेः वेदमूलकतैव सिद्ध्यति।

---

24. श.प.ब्रा.- 6/1/1/15;3/7
25. ऐ.ब्रा.-1/13, श.प.ब्रा.-1/1/2/22, 3/3/4/30
26. श.प.ब्रा.- 1/1/1/19; 9/3/19; 2/4/1/7
27. मै.-1/5/10; काठ.-8/7; क.-7/4; जै.- 1/61
28. तै.सं.- 5/2/3/6; काठ.- 20/1; क.- 31/3; ऐ.ब्रा.-8/24
29. कात्यायनश्लोकशुल्बे- श्लोकः-3
30. कात्यायनश्लोकशुल्बे- श्लोकः-4
31. कात्यायनश्रौतसूत्रे- 2/6/1
32. कात्यायनश्रौतसूत्रे- 2/6/2

**दिक्साधनम्**- दिक्साधनविधिं ब्रुवता भगवता कात्यायनेनोक्तं यत्- **समे शङ्कुं निखाय, शङ्कुसम्मितया रज्ज्वा मण्डलं परिलिख्य, यत्र लेखयोः शङ्क्वग्रच्छाया निपतति तत्र शङ्कुं निहन्ति सा प्राची।**[33] समतले भूमौ शङ्कुमेकं संस्थाप्य शङ्कुसम्मितया रज्ज्वैकं मण्डलं परितो विलिख्य प्रातः काले यत्र रेखायां शङ्क्वग्रच्छाया पतति सा प्रतीची सायंकाले च रेखायां यत्र छाया निपतति सा प्राची दिग्भवति। एवं पूर्वपश्चिमयोस्साधनं कृत्वा उदीच्यवाच्योस्साधनं विधीयते। तदर्थं सूत्रमिममवलोक्यताम्- **तदन्तरथं रज्ज्वाऽभ्यस्य, पाशौ कृत्वा, शङ्कोः पाशौ प्रतिमुच्य, दक्षिणाऽऽयम्य, मध्ये शङ्कुं निहन्त्येवमुत्तरतः सोदीची।**[34] शङ्कुंसम्मितां रज्जुं द्विगुणीकृत्य तदुभयतः पाशौ कृत्वा पूर्वपश्चिमयोः शङ्क्वोः पाशौ कृत्वा मध्यमं पाशं दक्षिणस्यामाकृष्य तत्र शङ्कुं निहन्ति सा दक्षिणा दिक्, एवमेव विपर्यस्योत्तरस्यामाकृष्य शङ्कुं निहन्ति सोदीची दिग्भवति। एवमेव किञ्चित्परिवर्तनेन वास्तुशास्त्रेऽपि दिक्साधनविधिरुक्तः।

**भूपरिमापनम्**- वेदप्रतिपादितेषु यज्ञेषु यागविहारनिर्माणाय मण्डपशालेत्यादीनां निर्माणायाध्वर्युना परिमापनं क्रियते। तदुक्तमपि- **यज्ञस्य मात्रां विमिमीत उ त्वः**[35] इति। भगवता कात्यायनेन वेदिमापनविधिं वर्णयता प्रोक्तं यत्- **औपवसथ्यात्पूर्वेऽहनि पौर्वाह्णिक्या प्रचर्य वेदिं मिमीते**[36] इति। अर्थादध्वर्युः उपवसथदिनस्य पूर्वाह्णकृत्यं सम्पाद्य वेदिमापनं करोत्यध्वर्युः। **पूर्वार्द्धर्यात्स्तम्भात्पुरस्तात् त्रिषु प्रक्रमेषु शङ्कुं निहन्ति सोऽन्तःपात्यः। तस्मात्पुरस्तात्षट्त्रिंशति। दक्षिणोत्तरौ च पञ्चदशसु पञ्चदशसु। अर्द्धसप्तदशेषु वा। पूर्वार्द्धर्याच्च द्वादशसु द्वादशसु।**[37] एवमुक्तविधानेनात्र सोमयागस्य वेदिमापनमुक्तम्। प्रतियज्ञवेदिमापनविधानं भिन्नं भिन्नमुक्तमस्ति। तदुक्तं कात्यायनशुल्बे-**आधाने पदिकं कुर्यात् द्विपदः सौमिको भवेत्। अग्नौ तु त्रिपदं कुर्यात् प्रक्रमं याज्ञिको बुधः॥**[38] प्रक्रमेण मापनं क्रियते, तदग्न्याधानकाले पादमात्रः, सोमयागीयवेदिमापने पदद्वयस्य, चयनयागीयवेदिमापने च पदत्रयस्य प्रक्रमः स्वीक्रियते। एवमेव वास्तुशास्त्रेऽपि ब्राह्मणादिवर्णक्रमेण गृहनिर्माणार्थं भूपरिमापनं भिन्नं भिन्नमुक्तमस्ति।

**इष्टकानिर्माणम्**- इष्टिकाकरणविधिः देवयाज्ञिकेनाह- **यजमानेनोर्ध्वबाहुना प्रपदोत्थितेन वा समं वंशं मित्वा पुरुषप्रमाणस्य त्रिंशांशं द्वात्रिंशांशं वाऽतिरिक्तं वंशच्छेदनेन तावत्प्रमाणं कुर्यात्। ततस्तस्य वंशस्य समा दश विभागाः शलाकादिभिर्वा मित्वा कार्याः। दशस्वपि भागेषु वंशे क्षुरिकादिना वंशस्य त्वचं छित्वा चिह्नानि कार्याणि। तस्य वंशस्य दशमेन भागेन पदं भवति। पदस्य द्वादशो भागोऽङ्गुलम्। एवं विधैरङ्गुलैर्द्वादशाङ्गुलं समचतुरस्रं पद्यानां प्रमाणं सारदारुकाष्ठैः कारयितव्यम्। षडङ्गुलं समचतुरस्रं पादभागानां प्रमाणं द्वितीयम्। षडङ्गुलदीर्घ**

---

33. का.शु.सू. दिक्साधनप्रकरणे सू. 2
34. का.शु.सू. दिक्साधनप्रकरणे सू. 3
35. ऋ..सं.-10/71/11
36. का.श्रौ.सू.- 8/3/6
37. का.श्रौ.सू.- 8/3/7-11
38. का.शुल्बसूत्रे- श्लोक-34

**त्र्यङ्गुलविस्तारमर्द्धपादभागानां प्रमाणम्। त्र्यङ्गुलं समचतुरस्रं चतुर्भागानाम्। अष्टादशाङ्गुलदीर्घं द्वादशाङ्गुलविपुलमद्ध्यर्द्धानां प्रमाणम्। अष्टादशाङ्गुलं समचतुरस्रं जङ्घामात्रीणां प्रमाणम्। चतुर्विंशत्यङ्गुलं समचतुरस्रं बृहतीनां प्रमाणम्। चतुर्विंशत्यङ्गुलदीर्घ- मष्टादशाङ्गुलविपुलं त्रिग्राहिणीनां प्रमाणम्। द्वादशाङ्गुलदीर्घं षडङ्गुलविस्तारमर्द्धपद्यानां प्रमाणम्। चतुर्विंशत्यङ्गुलदीर्घं द्वादशाङ्गुलविस्तारमर्द्धबृहतीनां प्रमाणम्। वक्राणां कृते चतुर्विंशत्यङ्गुलं समचतुरस्रं साधयित्वा तस्योत्तरांशे शङ्कुं निखायार्द्धव्यामप्रमाणां रज्जुमुभयतः पाशां कृत्वोत्तरां सशङ्कौ एकं पाशं प्रतिमुच्य दक्षिणांसस्योपरि लम्बायमानां तां रज्जुं दक्षिणत आकृष्यार्द्धव्यामप्रमाणां रेखां कृत्वा पाशप्रोतशङ्कुना प्रदक्षिणं तावद्वृत्तं लिखेत् यावत्सार्द्धव्यामपरिमिता रज्जुस्तस्य चतुरस्रस्य दक्षिणश्रोणेरुपर्यायाति। ततो दक्षिणश्रोणेरारभ्य रज्जुप्रान्तं यावद्रेखां कुर्यात्। ततश्चतुरस्रस्य पश्चिमोत्तरपूर्वपार्श्वानि मार्जयेत्। अवशिष्टं क्षेत्रं वक्राणां प्रमाणम्। एतादृशं क्षेत्रं विलोक्य वक्रदारुघटनेन वक्राप्रमाणं निष्पादनीयम्। सर्वेषां प्रमाणानां चतुरङ्गुलं वा षडङ्गुलं वा मत्या वोच्छ्रायप्रमाणं भवति। अर्द्धेनार्द्धोत्सेधानां पद्यार्द्धपद्यानामुत्सेधो भवति। षडङ्गुलपक्षे त्र्यङ्गुलं चतुरङ्गुलपक्षे च द्व्यङ्गुलम्। तत्प्रमाणद्वयं पद्यानामर्द्धपद्यानां च पृथक् करणीयम्। एवं त्रयोदशप्रमाणानि समानि श्लक्ष्णानि च कारयित्वा तैरिष्टकाः समभूमौ निष्पादनीयाः।**[39]

**वास्तुशास्त्रे इष्टकाप्रमाणम्**- वास्तुशास्त्रे ब्राह्मणाय एकविंशत्यङ्गुललम्बप्रमाणा, 10 ½ अङ्गुल- विस्तृताः, 5 ¼ अङ्गुलस्थूला चेष्टकाः विहितास्सन्ति। एवमेव क्षत्रियाय सप्तदशाङ्गुललम्बमाना, 8 ½ अङ्गुलविस्तृता 4 ¼ अङ्गुलस्थूला च इष्टकाः। तथा च वैश्याय 13 अङ्गुललम्बमाना, 6 ¼ अङ्गुलविस्तृताः, 3 ¼ अङ्गुलस्थूला इष्टकाः। शूद्राय च 9 अङ्गुललम्बप्रमाणा, 4 ½ अङ्गुलविस्तृताः, 2 ¼, इष्टकाः शुभफलप्रदायिकाः भवन्ति।

एतस्मान्न्यूनाधिकप्रमाणा इष्टका नैव निर्मातव्याः यतो हि उपर्युक्तप्रमाणादितरा इष्टकाः शुभप्रदा न भवन्ति। उक्तप्रमाणान्न्यूनाः प्रमाणाधिकाश्चेष्टकाः पुत्रं नाशयन्ति, छिन्नभिन्नाः व्ययं वर्धयन्ति, तथा च भ्रष्टविवर्णदेहा धनसम्बन्धिदुःखं प्रयच्छन्ति। प्रस्तरभवने शिल्पिजनानाम् इच्छानुसारम् इष्टकानिर्माणं करणीयम्। तद्यथा-

**शिलाप्रमाणं क्रमशः प्रदिष्टं वर्णानुपूर्व्येण तथाङ्गुलानाम्।**
**अथैकविंशद् घनविश्वनन्दा विस्तारके व्यासमितं तदर्धम्॥**
**तदर्धमानं त्वथ पिण्डिका स्यादूर्ध्वाधिका न्यूनतरा न कार्या।**
**प्रमाणहीना सुतनाशकारिणी, व्यङ्गा व्ययं, भ्रष्टविवर्णदेहा॥**
**धनार्तिदा विस्तरगेहमाने कार्या शिला शिल्पिजनाऽनुकूला॥**[40]

---

39. दे.या.प.पृ.सं. 517-518
40 विश्वकर्मप्रकाशः 4/50-51

**एकविंशद्द्विजाग्र्याणां क्षत्राणां दशसप्त च।**
**त्रयोदश तु वैश्यानां शूद्राणां तु नवाङ्गुलम्।।**[41]

**प्रासादे तु हस्तयामाः कार्याः**- राजभवनं देवमन्दिरं वा निर्मातुं विधिपूर्वकं शोभनाश्चतुरस्राः समाः हस्तप्रमाणलम्बाकाराः, हस्तसम्मिताः विस्तृताश्चेष्टकाः निर्मातव्याः। तदुक्तं वास्तुरत्नाकरे-

**प्रासादादौ विधानेन कर्त्तव्याः सुमनोहराः।**
**चतुरस्राः समाः कृत्वा समन्ताद्धस्तसम्मिताः।।**[42]

**विशेषः**- षोडशाङ्गुललम्बाकाराः, दशाङ्गुलविस्तृताः, इष्टका उत्तमाः भवन्ति। तथा च पञ्चदशाङ्गुललम्बाकाराः नवाङ्गुलविस्तृताश्च मध्यमाः (न तूत्तमाः, न निकृष्टाः) भवन्ति। चतुर्दशाङ्गुललम्बाकाराः, अष्टाङ्गुलविस्तृता इष्टकाः निकृष्टाः भवन्ति। एतासामिष्टकानां विस्तृतानाञ्च तृतीयांशसमाः स्थूलाकारा इष्टका निर्मातव्याः । तद्यथा-

**दैर्घ्ये चन्द्रकलाङ्गुलोत्तमशिला मध्यङ्गुलो नान्तिमा।**
**व्यासो दिङ्नवभूभृदुच्छ्रितिरपि त्र्यंशेन विस्तारतः।।**[43]

**अन्यच्च**- पञ्चदशाङ्गुललम्बाकारा इष्टका विजया, सप्तदशाङ्गुललम्बाकारा इष्टका मङ्गला, द्वादशाङ्गुललम्बाकारा इष्टका निर्मला, त्रयोदशाङ्गुललम्बमानेष्टका सुखदा चेति कथ्यते। तद्यथा-

**तिथ्यङ्गुलानि विजया मङ्गला सप्तचन्द्रकैः।**
**पक्षेन्दुभिर्निर्मला स्यात्सुखदा रामपक्षकैः।**
**प्रमाणमिष्टकायाश्च गर्गाद्यैर्मुनिभिः स्मृतम्।।**[44]

उपसंहर्तुमुद्यतसन्नहमेवं ब्रवीमि यद्वास्तुशास्त्रे गृहनिर्माणाय ये विधयः प्रोक्तास्सन्ति ते सर्वे वेदोक्तप्रमाणान्याश्रित्यैव विहितास्सन्ति। भूचयनादारभ्येष्टकाचयनं यावत्सर्वेऽपि विधयः वेदाधारिताण्यैव प्रयुक्तास्सन्ति। अद्यत्वे इष्टकानां निर्माणे ये विधयः समाचरिता भवन्ति तेष्विष्टकानिष्पादनकालिकविधयो मुख्यरूपेणानुक्रियन्त एव। यथा-

चयनयागे इष्टकानां निर्माणाय विविधाः प्रक्रियाः प्रोक्तास्सन्ति। तासु प्रक्रियासु आर्द्रं प्रमाणम् इष्टकाप्रमाणादधिकं कर्त्तव्यमिति शास्त्रविद्भिः निर्दिष्टम्। अत्र प्रश्नः समुदेति यद् इष्टकानाम् आर्द्रप्रमाणं कति परिमाणकं भवेत्? इत्यस्य प्रश्नस्योत्तरं शुल्बसूत्रकृता भगवता कात्यायनेन प्रोक्तं यत्-

---

41. वा.र. 6.1-2 टीकायाम्
42. विश्वकर्मप्रकाशः 6.17
43. वास्तुराजवल्लभे 5.12
44. वा.र. 6.5

**ह्रसते शोषपाकाभ्यां द्वात्रिंशद्भागमिष्टका।**
**तस्मादार्द्रप्रमाणं तु कुर्यान्मानाधिकं बुधः॥**[45]

अर्थात् आर्द्रप्रमाणं द्वात्रिंशद्भागादधिकं कर्त्तव्यमिति शुल्बसूत्रकारस्यादेशः। तत्रापि देवयाज्ञिकादिषु पद्धतिषु त्र्यालिखिता इष्टकाः भवेयुरिति निर्देशो लभ्यते। त्र्यालिखितासु इष्टकासु त्रिविधाः रेखाः भवन्ति। तत्र काश्चन इष्टका वक्रालिखिता ~~~, काश्चन तिरश्चालिखिताः . . . , काश्चन चेष्टकाः ऋज्वालिखिताः । । । भवन्ति।

एतासाम् इष्टकानां निर्माणाय पूर्वं सारदारुनिर्मितम् इष्टकाकरणयन्त्रम् इष्टकाप्रमाणात् द्वात्रिंशद्भागाधिकं निर्मीयते। तेन यन्त्रमाध्यमेन या इष्टका निर्मीयन्ते ताः पाकशोषाभ्यामनन्तरं समुचितप्रमाणयुताः भवन्ति।

अद्यापि लोके अनयैव प्रक्रियया इष्टकाकरणयन्त्रमाध्यमेन इष्टकाः निर्मीयन्ते। त्र्यालिखिता इति स्थाने अक्षरत्रयं लिखितं भवति इष्टकानामुपरि यथा– **भारत, महान्, आजाद** इत्यादयः शब्दाः वर्णत्रयात्मका इष्टकानिर्माणयन्त्रे व्यत्यासेन उट्टङ्किताः भवन्ति इति अस्माभिः सर्वैरपि समवलोक्यत एव। तेनेदं सिद्धमेव यद्वास्तुविज्ञानसिद्धान्ताः वेदेषु प्रौढत्वेनोपवर्णितास्सन्ति।

45. श्लोकशुल्ब– 30

# पञ्चभूतात्मकं वास्तु

**डॉ.अशोकथपलियालः**

**गोविन्दवल्लभः**

वस्तुसम्बन्धिनं चिन्तनं मानवजीवनाय यत्र विस्तरेण परिज्ञायते तच्छास्त्रं वास्तुशास्त्रमिति। वस्तुनैव वास्तुर्निर्मीयते। प्रासादादीनि सर्वाणि वास्तूनि वस्तुत्वादेवोत्पद्यन्ते वस्त्वोपर्यवश्चाश्रितास्सन्ति, कारणेनानेन प्राचीनाचार्यैरस्मिन् वस्तु वा वास्तुर्निगदितम्[1]। वस्तु भूमिरित्यर्थः[2]। वस्तुत्वाद् वास्त्विति। ईष्टिकाकीलमृत्तिकादारवादयश्च सर्वे एव वस्तुसंज्ञयाऽभिज्ञायन्ते[3]। अमरधर्माः देवगणाः, मरणधर्माः मनुष्याः पशुपक्षिणश्च[4] यत्र-यत्र निवसन्ति तत्सर्वं वास्तुसंज्ञयाऽभिज्ञायते[5]। एतेषां सर्वेषां निवासयोग्या भूमिः प्रासादः गृहं वेति सर्वमेववास्तुः[6]।

कथञ्चास्य वस्तोर्निर्माणमभवत् येन वास्तुर्विनिर्मीयते? कथं वस्तुना वास्तुरुत्पद्यते? सृष्टेश्चोत्पत्तिः कथमित्यत्र विचार्यते। सृष्टौ पञ्चमहाभूतानां महत्यावश्यकता वर्तते। पृथिव्यप्तेजवाय्वाकाशाश्च इमानि पञ्चमहाभूतानि। ततः पञ्चमहाभूतैः कथं सृष्टिरभवदिति जिज्ञासोत्पद्यते। अपञ्चीकृतानि परमाणुरूपाणि भूतानि नित्यानि तेभ्यः पञ्चीकृतेभ्यः स्थूलभूतानामुत्पत्तिर्भवत्येतान्येव वस्तुसंज्ञया अवबुध्यन्तेऽतो वस्तुनैव वास्तुरुत्पद्यते। पञ्चमहाभूतेभ्य एव सृष्ट्युत्पन्ना। भूतत्वं किमिति सर्वप्रथमं भूतलक्षणं प्रतिपाद्यते।

तत्र बहिरिन्द्रियग्राह्यसजातीयविशेषगुणत्वं भूतत्वमिति प्राचीनकृतं भूतलक्षणमुपलभ्यत इति। एतल्लक्षणस्यायमभिप्रायः यद् बहिरिन्द्रियाणि खलु श्रोत्रत्वङ्नेत्ररसनाघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि,

---

1. प्रासादीनि वस्तूनि वस्तुत्वात् वस्तुसंश्रयात्।
   वस्तून्येव हि तान्येव प्रोक्तान्यस्मिन्पुरातनैः।। मयमतम,
2. द्वितीयोऽध्यायः श्लो.
3. इष्टिका च शिला दारुरयः कीलादयोप्यमी।
   वास्तुकर्मणि चान्यत्रवस्तुसञ्ज्ञमुदीरितम्।। विश्वकर्मवास्तुशास्त्रम् अध्या.7 श्लो.61
4. देवतानां नराणां च गजगोवाजिनामपि।
   निवासभूमि शिल्पज्ञैर्वास्तुसञ्ज्ञमितीर्यते।। विश्वकर्मवास्तुशास्त्रम् अध्या.7 श्लो.1
5. तैतिलाश्च नराश्चैव यस्मिन्यस्मिन् परिस्थिताः।
   तद्वस्तु सूरिभिः प्रोक्तं तथा वै वक्ष्यते अधुना।। मानसार अध्या.3 श्लो.1
6. अमर्त्याश्चैव मर्त्याश्च यत्र यत्र वसन्ति हि।
   तद् वास्त्विति मतम् प्रोक्तान्यस्मिन्पुरातनैः।। मयमतम् अध्या.2 श्लो.1

तेषां ग्राह्या: विशेषगुणा: यथासंख्यं शब्दस्पर्शरूपरसगन्धा: तद्भवन्ति भूतानीति कृत्वा शब्दवदाकाशं स्पर्शवान् वायु: रूपवत्तेज: रसवज्जलं गन्धवती च पृथिवीति पञ्चभूतानि।[7]

## पञ्चमहाभूतानामुत्पत्तिः सृष्ट्युत्पत्तिश्च-

परमाणुस्वरूपेभ्य: पञ्चविधभूतेभ्यो यदि पञ्चमहाभूतानि जायन्ते तदा केन क्रमेण तान्युत्पद्यन्ते? तथा सर्वेषामेव भूतानां एकैकेन्द्रियार्थाश्रयत्वेऽपि गगने एकगुण: शब्द:, वायवे द्वौ गुणौ शब्दस्पर्शौ, तेजसि त्रयो गुणा: शब्दस्पर्शरूपा:, जले चत्वार: गुणा: शब्दस्पर्शरूपरसा: तथा पृथिव्यां पञ्चगुणा: शब्दस्पर्शरूपरसगन्धाश्च केन नियमेन दृश्यन्ते? इत्यादिशंकासमाधानाय पञ्चभूतानां समुत्पत्तिक्रमोऽत्र प्रदर्श्यते-

तत्र महाप्रलये सर्वाण्येव महाभूतानि भौतिकानि च जडचेतनशरीराणि विनश्यन्ति। केवलं नित्यानि एव द्रव्याणि अवशिष्यन्ते इति सर्वैरेव अङ्गीकृतमस्त्यत: सृष्ट्यारम्भत: विद्यमानानां महाभूतानामपि विनाशान्महाप्रलये वियुक्ता: परमाणव: एव अवशिष्यन्ते, तत्र सर्गादौ पुन: सूक्ष्मभूतेभ्यो महाभूतानामुत्पत्ति: युगपदेव जायते क्रमाद्वेति लौकिकपरीक्षया निर्णेतुं न शक्यते, तदानीं परीक्षकपरीक्षासाधनादीनां अनुत्पन्नत्वादत: अत: अलौकिकपदार्थेषु प्रमाणं परमं श्रुतिरिति यथा- एतस्मादात्मन आकाश: सम्भूत:। आकाशाद्वायु:। वायोरग्नि:। अग्नेराप:। अद्भ्य: पृथिवी। पृथिव्या ओषधय:। ओषधिभ्योऽन्नम्। अन्नात्पुरुष:।[8]

सूक्ष्मभूतान्यपञ्चीकृतानि स्थूलभूतानि तु पञ्चीकृतानि[9]। पञ्चमहाभूतानां सृष्ट्युत्पत्तये सम्मिश्रणप्रक्रिया पञ्चीकरणमिति वेदान्तदर्शनस्य सृष्ट्युत्पत्तिविषयकप्रक्रिया अस्य समर्थनं करोति। पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुव:स्वर्महर्जनस्तपस्सत्यमित्योर्ध्वलोकानाम् अतलवितलसुतलरसातलतलातल-महातलपातालाख्यानाम् अधोलोकानां, ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्थूलशरीराणां, जरायुजाण्डजोद्भिज्जस्वेद-जाख्यानां, अन्नपानादीनां चोत्पत्तिर्भवति[10]। एतत्सर्वं पञ्चमहाभूतेभ्य उत्पद्यते।

## वास्तुशास्त्रे पञ्चमहाभूतानि

ब्रह्माण्डेऽस्मिन् ग्रहनक्षत्रप्राणिवनस्पत्यादिसमस्तभौतिकरचना: पञ्चमहाभूतैर्निर्मिता:। सृष्ट्युत्पत्तये निर्माणाय विकासाय च पञ्चमहाभूतानामावश्यकता भवति। पञ्चमहाभूतं विना सृष्टिकल्पनाऽपि न भवितुं शक्यते। एतेषां पञ्चमहाभूतानां सामाञ्जस्येन मानवीयक्रियाकलापेषु गतिशीलता सुविधा चायाति।

वास्तुशास्त्रस्य प्रवर्तकानामाचार्याणामयं दृढीयान् विश्वासोऽस्ति यन्निर्मिते वास्तुनि अस्माकं सुविधा सुरक्षा च पञ्चमहाभूतानां सामञ्जस्योपर्याधारिताऽस्ति। अत एव वास्तुनिर्माणे प्रमुखतया पञ्चमहाभूतानां पृथ्व्यप्तेजवाय्वाकाशानां मानवजीवनस्य क्रियाकलापै: सह सामञ्जस्यनियमा: परिपाल्यन्ते।

---

7. पञ्चभूतविज्ञानम् प्रथमोध्याय: पृ.सं. 8-9
8. तैत्तिरीयोपनिषद्, द्वितीयवल्ल्यां, अनुवाक: 1
9. वेदान्तसार: 15
10. वेदान्तसार: 16

इत्थं वास्तुनियमानुसारेण पञ्चमहाभूतैर्निर्मिते भवने मानवीयक्षमता शक्तिश्च स्वतः स्फूर्ता विकसिता च सञ्जायते।

पृथिव्यप्तेजवाय्वाकाशाश्चेति पञ्चमहाभूतानि स्थूल-अणुभेदेन द्विविधानि। वैशेषिकदर्शनानुसारेणाऽपि पृथिव्यादिचतुर्महाभूतानि द्विविधानि परमाणुरूपाणि कार्यरूपाणि च परमाणुरूपे सर्वे नित्यपदार्थाः तथा कार्यरूपे भौतिकोपयोग्याः प्राकृतिकसंसाधनाः अनित्यपदार्थाः समायान्ति। परञ्च आकाशमेकरूपं विभुर्नित्यं च।[11] पञ्चमहाभूतेषु शब्दस्पर्शरूपरसगन्धादिगुणाः भवन्ति। पृथिव्यां सामान्यतया शब्द-स्पर्श-रूप-रस-गन्धेति सर्वे पञ्चगुणाः समाहिताः। अस्याः विशेषगुणः गन्धमस्ति। जले सामान्यतया चत्वारः गुणाः शब्द-स्पर्श-रूप-रसाः एते समाहिताः परन्तु अस्य विशिष्टतमः गुणः रसः। तेजसि सामान्यतया त्रिगुणाः शब्द-स्पर्श-रूपा इति भवन्ति परन्तु अस्य विशेषगुणः रूपमस्ति। वायुनि सामान्यतः शब्द-स्पर्शौ द्वौ गुणौ भवतः परन्तु अस्य विशेषगुणः स्पर्शो भवति। आकाशे एकमेव शब्दगुणो भवति।

**पञ्चमहाभूतानां गुणाः**

| **पञ्चमहाभूताः** | **सामान्यगुणाः** | **विशेषगुणः** |
|---|---|---|
| पृथ्वी | शब्दः, स्पर्शः, रूपम्, रसः, गन्धः | गन्धः |
| जलम् | शब्दः, स्पर्शः, रूपम्, रसः | रसः |
| तेजः | शब्दः, स्पर्शः, रूपम् | रूपम् |
| वायुः | शब्दः, स्पर्शः | स्पर्शः |
| आकाशम् | शब्दः | शब्दः |

'यत्पिण्डे तद् ब्रह्माण्डे' इति सिद्धान्तानुसारेण प्राणिमात्रस्य शरीरमपि पञ्चमहाभूतैर्निर्मितमस्ति। पृथिवी-अप्-तेज-वायु-आकाशादीनां परस्परसम्बन्धेनेदं शरीरं निर्मितम्। किन्त्वेतेषु पृथिवीतत्वस्य अस्मिन् बाहुल्यम् अस्ति। शरीरे पृथिवीतत्वतः जलस्य, जलतत्वतः तेजसः, तेजतत्वतः वायोः, वायुतत्वतः आकाशस्य च भागाः उत्तरोत्तरन्यूनाः भवन्ति। पञ्चमहाभूतानां पूर्वोक्तेन विवेचनेन स्पष्टं यत् पृथिवीतः समारभ्य आकाशपर्यन्तानां पञ्चमहाभूतानां सामान्यगुणेषु उत्तरोत्तरो ह्रासो दृश्यते। तथ्यमिदं विचार्य वास्तुशास्त्रस्याचार्यैः पञ्चमहाभूतेषु तारतम्यं संस्थाप्य अनेन प्रकारेण गुणविभागः कृतः–पञ्चमहाभूतेषु तेषां गुणानाम् आधारेण पञ्चदशकलाः भवन्ति, यत्र आकाशस्य एककला, वायोः द्वे कले, तेजसः तिस्रः कलाः, जलस्य चतस्रः कलाः, पृथिव्याः पञ्चकलाः। अनेन प्रकारेण इदं स्थूलशरीरं पञ्चतत्त्वैः विनिर्मितमस्ति। इमानि सर्वाणि तत्वानि न्यूनाधिकरूपेण समष्टिगतशरीरस्य विनिर्माणं कुर्वन्तीति।

पृथ्वीजलतेजवायुराकाशतत्वैः निर्मितेऽस्मिन् शरीरे पञ्चमहाभूतानां न्यूनाधिकतावशाद् मानवेषु

नैकविधस्वभावाः दृश्यन्ते। अस्मिन् शरीरे त्वग्-अस्थि-मांस-नख-स्नायुतन्त्र (नाडीतन्त्र)पृथ्वीतत्वात् उत्पन्नाः वर्तन्ते। मल-मूत्र-वीर्य-रक्तादिसमस्ताः द्रव्यपदार्थाः जलतत्वाद् उत्पन्नाः भवन्ति। निद्रा-तंद्रा-हसन-बुभुक्षा-प्रमादादयः तेजतत्वादुत्पन्नाः। धारण-चालन-क्षेपण-संकोच- विस्तारादीनामुत्पत्तिः वायुतत्त्वादस्ति। काम-क्रोध-लोभ-मोह-लज्जादयः गुणाः आकाशादुत्पन्नाः भवन्ति। यथा ब्रह्मज्ञानतन्त्रे उद्धृतम् -

**अस्थिमांसनखश्चैव नाडीत्वक् चेति पञ्चमः।**
**पृथ्वीपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥**

**मलमूत्रं तथा शुक्रं श्लेष्मा शोणितमेव च।**
**आपः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥**

**हासो निद्रा क्षुधाश्चैव भ्रान्तिरालस्यमेव च।**
**तेजः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥**

**धारणं चालनं क्षेपः संकोचः प्रसरस्तथा।**
**वायुः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥**

**कामक्रोधस्तथा लोभस्तृष्णा मोहश्च पञ्चमः।**
**नभः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥**

एवमेव वास्तुक्षेत्रेऽप्याचार्यैः पञ्चतत्त्वानां निवेशनं निम्नलिखितप्रकारेण विहितमस्ति –

## पञ्चतत्वयुक्तानि शरीराङ्गानि गृहाङ्गानि च

| पञ्चतत्वानि | तत्वयुक्तशरीराङ्गानि | गृहे समुपस्थिततत्त्वात्मकपदार्थाः |
|---|---|---|
| पृथ्वी | अस्थिः, मांसादीनि, शरीरस्य पुष्टाङ्गानि | मृदा, ईष्टिका, शैलादिदृढपदार्थाः |
| जलम् | रक्तः, मेदः, शुक्राणुः, प्रवाहिततरलपदार्थाः | पदार्थानां मिश्रणात् समुत्पन्नाः मिश्रणस्य स्थितिः |
| तेजः | पञ्चतन्त्रनलिकायां समुचितशक्तिः, सामर्थ्यम् इति | निर्मितपदार्थात् शीतादिजन्यतत्त्वस्य शमनं वा उष्णोत्पन्नस्य च स्थितिः |
| वायुः | घ्राणादिस्थितिपरमात्मादात्मनः सम्बन्धं सृजनात्मकस्रोतम् | गृहे वायुप्रवेशहेतुः स्थानस्य स्थितिर्ज्ञानं वायुतत्वात्। |
| आकाशम् | ज्ञानविज्ञानमयकोशं विकासपुञ्जं मस्तिष्करूपेण ब्रह्माण्डस्य प्रतीकम् | गृहे वा प्रासादे परिमाणम् औच्चस्य विस्तारस्य स्थितिर्ज्ञानम् |

पृथिव्यां तथाऽस्यां निवासिनां रचना पञ्चमहाभूतानां मिश्रेण जाता, यस्यां पृथ्वी-जल-

तेजोवायुराकाशादयश्च निश्चितमात्रायां भवन्ति। वास्तुशास्त्रस्य मुख्यः प्रतिपाद्यविषयोऽस्ति यन्मनुष्यः स्वजीवने सफलतां सन्तुष्टिश्च प्राप्त्यर्थं स्वकीयावासे पृथिवीजलतेजवायुराकाशादीनां च यथा-नियमानुसारमुपयोगः कुर्यादिति।

पञ्चमहाभूतनिर्मितेऽस्मिन् ब्रह्माण्डे प्राणिनां जीवनस्य समुचितप्रबन्धं कथं करणीयम् ? मानवानां शारीरिकमानसिकाध्यात्मिकक्षमतानां वर्धनङ्कृत्वा जीवनं कथं नूतनोत्साहेन सह अग्रसरो भवेत् येन मानवाः स्वस्थसुखसमृद्धिपूर्वकं जीवनयापनं कुर्युः। अस्मिन् खलु ब्रह्माण्डे सर्वेष्वेतेषु जीवेषु रचनाकौशलदृष्ट्या तात्विकदृष्ट्या चैका विशेषसमानता वर्तते यद् एते समस्तदेहधारिणः पञ्चमहाभूतैर्निर्मितास्सन्ति। वस्तुतः पञ्चमहाभूतैस्सह सन्तुलनाज्जीवेषु निरन्तरता सक्रियता च भवत्यसन्तुलनवशाद् निष्क्रियता जायते। अतः वास्तुशास्त्रस्य प्राथमिक्योऽयं सिद्धान्तः यत् प्रकृतिना सह पञ्चमहाभूतैस्सह समायोजनं सम्यक्तया भवेदिति।

11 तर्कसंग्रह, द्रव्यलक्षणप्रकरणम्, पृ.सं. ७-१३

12. ब्रह्मज्ञानतन्त्रोद्धृतं, शारीरलक्षण एवं चेष्टाएं, अ.पृ.-१६

# नारदमत्स्याग्निपुराणोक्तभूचयनविधेः अन्यवास्तुग्रन्थोक्तभूचयनसिद्धान्तैः सह तुलनात्मकं सहेतुकञ्चाध्ययनम्

डॉ. अरविन्दशर्मा

**भूमेर्वर्णगन्धरसाधारेण चयनम्**

भूमेर्वर्णगन्धरसाधारेण चयनं कर्तव्यमित्युक्तं नारदमत्स्याग्निपुराणेषु। वस्तुतः मनसः आनन्दस्यावाप्तिः यस्मिन् भूखण्डे भवेत्, सैव भूखण्डः भवननिर्माणार्थं युक्तोऽस्ति। किन्तु भिन्न-भिन्न जाति-वर्ण-गुण-धर्मयुक्तमनुष्याणां मनसः स्थितिः भिन्ना, तस्मात् तेषां रुच्यनुगुणपर्यावरणे भूखण्डे भवननिर्माणं कर्तव्यम्।

नारदमत्स्याग्निपुराणेषु ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां कृते क्रमशः श्वेत-रक्त-पीत-कृष्णवर्णयुक्तभूमिः निर्दिष्टा, भूमेः गन्धविषये मत्स्यपुराणं मौनमेव नारदाग्निपुराणयोश्च सामान्यभेदः तद्यथा- नारदानुसारेण तु चतुर्वर्णानां कृते क्रमशः भूमेः मधु-पुष्प-आम्ल-मांसादिवत् गन्धो भवेत्। अग्नौ तु घृत-रक्त-सुगन्ध-सुरादिवत् गन्धः प्रोक्तः, अन्यस्मिन् अध्याये च वैश्याय अन्नतुल्यगन्धोऽपि कथितः। भूमेः रसविषये तु मधु-कटु-तिक्त-कषायेति नारदमत्स्यपुराणयोर्वचनम्, अग्निश्चात्र भिद्यते मधुर- कषाय - अम्ल - अम्लेति चतुर्वर्णभूमेः विभाजनेन, तथा च क्रमेण एतैः वर्णैः कुश-शर-काश-दूर्वायुक्तभूमिषु गृहं निर्मेयम्।[1]

इदानीं नारदमत्स्याग्निपुराणेषु चतुर्वर्णानां कृते भूमेः वर्णगन्धरसाधारेण चयनस्य वर्णनं कोष्ठकमाध्यमेन प्रस्तूयते। यथा-

| **वर्णगन्धरसाधारेण** | | **चयनकोष्ठकम्** | |
|---|---|---|---|
| चतुर्वर्णाः | वर्णः | गन्धः | रसः |
| ब्राह्मणः | श्वेतः | मधुः/घृतम् | मधुरः |
| क्षत्रियः | रक्तः | पुष्पम्/रक्तः | कटुः/कषायः |
| वैश्यः | पीतः | आम्लः/सुगन्धः/अन्नम् | तिक्तः/आम्लः |
| शूद्रः | कृष्णः | मांस्/सुरा | कषायः/ आम्लः |

वर्णविषये समराङ्गणसूत्रधारे वास्तुसौख्ये अपराजितपृच्छायां बृहद्वास्तुमालायाञ्च ब्राह्मणादीनां

1. (क) क्षेत्रमादौ परीक्षेत गंधवर्णसांशकैः। मधुपुष्पाम्लपिशितगंधं विप्नातुपूर्वकम्।।
सितं रक्तं च हरितं कृष्णवर्णं यथाक्रमम्। मधुरं कटुकं तिक्तं कषायरसं क्रमात्।। (ना.पु.,पू.ख. श्लो. 540, 541)

कृते श्वेत-रक्त-पीत-कृष्णभूमीनामुल्लेखो वर्तते।[2] विश्वकर्मप्रकाशे वैश्यानां कृते नातिकृष्णा नातिरक्ता च भूमिः कथिता, अन्यत् सर्वं तु पूर्ववदेव वर्तते।[3]

गन्धविषये अपराजितपृच्छायां चतुर्वर्णानां कृते घृत-रक्त-क्षार- विष्टानुगन्धिनी भूमिः प्रोक्ताः।[4] राजवल्लभमण्डने तु क्रमशः ब्राह्मणादीनां कृते घृत-रक्त-तिलमत्स्यगन्धिनी भूमिः निर्दिष्टा।[5] वास्तुसौख्ये तु क्रमः किञ्चित् भिद्यते, तथा- मधु-घृत-अन्न- रक्तगन्धिनी भूमिः ब्राह्मणादीनां कृते प्रशस्ता तत्र कथिता।[6] वास्तुविद्यानुसारं विप्रादिभ्यः क्रमशः घृत-रक्त-अन्न-सुरागन्धिनी भूमिः भवननिर्माणार्थं युज्यते।[7] रसाधारेण विविधवर्णानां कृते भूमेः चयनार्थं राजवल्लभमण्डनानुसारं क्रमशः शुभ-कषाय-अम्ल-कटुस्वादयुक्ताभूमिः प्रशस्ता[8] कथिता। अपराजितपृच्छानुसारं तु क्रमशः मधुर-कषाय-क्षार-कटुस्वाद-युक्ताभूमिः प्रशस्यते।[9]

---

(ख) पूर्वं भूमिं परीक्षेत् पश्चाद्वास्तुं प्रकल्पयेत्। श्वेता रक्ता तथा पीता कृष्णाचैवानुपूर्वशः।।
विप्रादः शस्यते भूमिरतः कार्यं परीक्षणम्। विप्राणां मधुरास्वादा कटुका क्षत्रियस्य तु।। (म. पु., अ. - 253, श्लो. 11-13)

(ग) शुक्लाऽऽज्यगन्धा रक्ता च रक्तगन्धा सुगन्धिनी।
पीता कृष्णा सुरागन्धा विप्रादीनां मही क्रमात्।। (अ. पु., अ. - 92, श्लो. - 7)

(घ) वास्तुलक्ष्म प्रवक्ष्यामि विप्रादीनां च भूरिह। श्वेतारक्ता तथा पीता कृष्णा चैव यथाक्रमम्।।
घृतरक्तान्नमद्यानां गन्धाढ्या वसतश्च भूः। मधुरा च कषाया च अम्लाद्युपरसा क्रमात्।।
कुशैः शरैरस्तथाकाशैर्दूर्वाभिर्या च संश्रिता। प्राच्यं विप्रांश्च निःशल्यां खातपूर्वन्तु कल्पयेत्।। (अ. पु., अ. - 247, श्लो. 1- 3)

2. (क) कसिता रक्ता च पीता च कृष्णा चैव क्रमान्मही।
विप्रादीनां हि वर्णानां सर्वेषामथवा हिता।। (सम. सूत्र. वा., अ. 10, श्लो. - 48)
(ख) सितेषद्रक्तहरितकृष्णवर्णा यथाक्रमात्। (वा. सौ., द्वि. भागः, श्लो. - 15)
(ग) श्वेता च ब्राह्मणो भूमी रक्ता वै क्षत्रिया स्मृता।
पीतवर्णा भवेद्वैश्या शूद्री तु कृष्णवर्णिनी।। (अप. पृ., अ. - 51, श्लो. - 50)
(घ) शुभस्य शुभदा ज्ञेया दशा पापस्य चाधमा। शुक्ला मृत्स्ना च या भूमिर्ब्राह्मणी सा प्रकीर्तिता।।
क्षत्रिया रक्तमृत्स्ना च हरिद्वैश्या उदाहृता। कृष्णा भूमिर्भवेच्छूद्रा चतुर्धा परिकीर्तिता।। (बृ.मा.,पृ. 7, श्लो. 27, 28)

3. वि. क. वा., 5.8-13

4. घृतगन्धा भवेद्विप्री राज्ञी रक्तानुगन्धिनी।
क्षारगन्धा भवेद्वैश्या शूद्री विष्टानुगन्धिनी।। (अप. पृ., अ. - 51, श्लो. - 51)

5. श्वेता ब्राह्मणभूमिका च घृतवद्गन्धा शुभस्वादिनी रक्ता शोणितगन्धिनी नृपतिभूः स्वादे कषाया च सा। स्वादेऽम्ला तिलतैलगन्धिरुदिता पीता च वैश्या मही कृष्णा मत्स्यसुगन्धिनी च कटुका शूद्रेति भूलक्षणम्।। (रा.व.म., अ. - 1, श्लो. -13)

6. सुमध्वाज्यान्नपिशितं गन्धं विप्रानुपूर्वकम्।। (वा. सौ., द्वि. भागः, श्लो. - 14)

7. वा. वि., अ. - 1, श्लो. 27-30

8. राज. व. म., अ. - 1, श्लो. - 13

9. ब्राह्मणी मधुरा स्वादा कषाया क्षत्रिया तथा।
क्षारा स्वादा भवेद्वैश्या शूद्री विष्ठानुगन्धिनी।। (अप. पृ., अ. - 51, श्लो. - 52)

समराङ्गणेऽपि स्वादु-कषाय-तिक्त-कटुक्रमेण ब्राह्मणादीनां कृते भूमेः स्वादः प्रोक्तः अथवा सर्वेषां कृते मधुरोऽपि प्रशस्तः।[10] एवमेवान्यग्रन्थेषु भूमेर्वर्णगन्धरसाधारेण चयनस्य विचाराः प्राप्यन्ते। येषामस्ति विशिष्टं महत्त्वम्।

**भूमेः वर्णाद्याधारेण चयनस्य सहेतुकं विवेचनम्**

तपःपूतैः ऋषिमुनिभिः विश्वकल्याणभावनया भावितमिदं शास्त्रं स्ववैज्ञानिकाधारेणाधुनिक-विदुषामवधानं बलादाकर्षयति, भूमेः चयनादारभ्य उचितमानदण्डानुगमनपूर्वकं कृतभवनमेवाजीवनं गृहपतेः शुभं करोति। प्रशस्तभवनप्रशंसाविषये यथोक्तम्–

**लक्षणहीने धामनि वसतामशुभानि सम्भवन्त्येव।**
**जन्माद्यवसानन्तं मनसा निश्चित्य कारयेत् तस्मात्।।**[11]

प्रकृतिः रज-सत्व-तम-गुणात्मिका वर्तते, क्रमश इयं लोहित-शुक्ल- कृष्णवर्णात्मिका वर्तते। प्रकृतेः सृष्टिः स्थिति-लयहेतुनाऽत्र रज-सत्व-तमगुणादीनां क्रमः निर्धारितः।[12] सांख्यसूत्रानुसारमपि सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। अर्थात् सतोगुणस्य शुक्लः, रजोगुणस्य रक्तः, तमोगुणस्य कृष्णवर्णश्च वर्तते।

**(क) ब्राह्मणवर्णस्य कृते भूमिः**

वर्णसंकरताया अभावात् वंशपरम्परायाः शुद्धत्वात् स्वाध्याय - अभ्यासादीनामनवरताचरणात् शम - दम - तप - शौच - क्षान्ति - आर्जव - ज्ञान - विज्ञान -आस्तिक्यादयः गुणाः ब्राह्मणादीषु प्राधान्यं वहन्ति।[13] सतोगुणस्य च शुक्लः (श्वेतः) वर्णः, अत एव ब्राह्मणाय श्वेतवर्णभूमिरेव उपयुक्ता गौरवर्णः कुत्रचित् पीतवर्णो वा कथितः। कालपुरुषस्य शरीरे स एव बृहस्पतिः ज्ञानसुखयोश्च हेतुः वर्तते। कालरूपात्मकपुरुषे बृहस्पति आकाशतत्त्वयुक्तोऽस्ति। जन्मकुण्डल्यां पञ्चमविद्यास्थाने, नवमधर्मस्थाने च बृहस्पतेः विशेषदृष्टिर्भवति। यतोहि राष्ट्रस्य मन्त्रिणः प्रमुखकर्तव्यमिदं यद् राष्ट्रे विद्याधर्मयोरेव ध्यानं दातव्यमिति।"[14] अत एव बृहस्पतेः ब्राह्मणवर्णस्य च समानताकारणात् ब्राह्मण कृते श्वेतवर्णीया ब्राह्मणभूमिः प्रशस्ता वर्तते।

---

10. स्वादुः कषाया तिक्ता च कटुका चेत्यनुक्रमात्।
वर्णानां स्वादतः शस्ता सर्वेषां मधुराऽथवा।। (सम. सूत्र. वा., अ. 10, श्लो. - 49)
11. मनु. चन्द्रि., अ. - 1, श्लो. - 15
12. अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः।
अजा ये तां जुषमाणां भजन्ते जहत्येनां भुक्तभोगां नुमस्तान्।। (सां. त. कौ., प्रथम कारिका)
13. शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।। (श्रीमद्भ. गी., अ. - 18, श्लो. - 42)
14. बृ.जा., ग्रहयोनिप्रभेदाध्यायः, श्लो. - 7, 4, 5, 1, 6, 13

### (ख) क्षत्रियवर्णस्य कृते भूमिः

क्षत्रियवर्णे रजोगुणस्य प्राधान्यं दृश्यते, रजोगुणस्य च रक्तवर्णः, अत एव क्षत्रियस्य कृते रक्तवर्णयुक्तभूमिः प्रशस्यते। ज्योतिषशास्त्रानुसारेण[15] अपि क्षत्रियवर्णस्य प्रतिनिधित्वं भौमग्रहः करोति, भौमस्तु रक्तवर्णीयः, शक्तिसम्पन्नः, रथवान्, सामर्थ्यवान्, तेजस्वी च वर्तते। कालरूपात्मके राष्ट्रे सेनापतिः अग्नितत्त्वयुक्तः, क्षत्रियवर्णीयश्चास्ति। भौमस्य क्षत्रियाणां तुल्यमेव चतुर्थगृहस्थाने अष्टमायुस्थाने च विशेषदृष्टिः भवति। भौमः तिक्तरसप्रियश्चास्ति। अत एव क्षत्रियैः भवननिर्माणार्थं रक्तवर्णीया क्षत्रियाभूमिः प्रशस्ता कथिता।

### (ग) वैश्यवर्णस्य कृते भूमिः

बृहज्जातकानुसारं वैश्यवर्णस्य प्रतिनिधित्वं बुधग्रहः करोति।[16] बुधग्रहस्य च पीतवर्णो वर्तते।[17] अत एव वैश्यानां कृते पीतवर्णयुक्तभूमिः उत्कृष्टा भवति, इतोऽपि वैश्यानां बुधग्रहवत् रजोगुणप्रकृतिः, हास्यप्रियस्वभावः, व्यङ्ग्यात्मकवाणी चावलोक्यते[18]। एतस्मात् वैश्यानां भूमेः वर्णः पीत एवोत्तमो भवति। अतः वैश्यवर्णस्य कृते वैश्यभूमिरेव प्रशस्ता।

### (घ) शूद्रस्य कृते भूमिः

ज्योतिषशास्त्रानुसारेण[19] शूद्रवर्णस्य प्रतिनिधिः शनिग्रहो वर्तते। तस्य शनेः कृष्णवर्णत्वात् शूद्राणां कृते कृष्णभूमिरेव अनुकूला वर्तते। कृष्णवर्णः तमोगुणस्य प्रतिनिधित्वं करोति। शनेः स्वरूपस्यावलोकनादपि शनेर्गुणधर्माः शूद्रजातेः तुल्याः दृश्यन्ते, इत्यस्मात् शूद्राणां भूमिः शनेः वर्णानुरूपां कृष्णावर्णीया एवोत्तमा वर्तते।

एवमुपर्युक्तप्रकारेण मनुष्यैः स्व-स्वगुणधर्मानुसारं भवननिर्माणार्थं भूमेः चयनं क्रियते चेत् जीवनं प्राकृतिकगुणानां सामञ्जस्यकारणात् स्वयमेव सुखमयं भविष्यति।

### 2. विविधप्रकारेण भूमिपरीक्षा

भूमिपरीक्षया अस्माभिः ज्ञायते यद् भूमिः भवननिर्माणार्थं परुषाः अस्ति न वा। यतो भवनस्य कठोराधारः तस्मायुर्दायं वर्धयति। पञ्चमहाभूतेषु भूमितत्त्वमेव भवनस्याधारो भवति, इत्यतो भवननिर्माणार्थमुत्तमाधारस्य (भूमेः) चयनमत्यावश्यकं भवति, भवननिर्माणात् पूर्वमत्र भूमिपरीक्षार्थं

15. बृ.जा., ग्रहयोनिप्रभेदाध्यायः, श्लो. - 7, 4, 5, 1, 6, 13, 14
16. बृ.जा., अ. - 2, श्लो. - 4
17. (क) श्वेतः सोमः कुजो रक्तो बुधः पीतो गुरुस्तथा।
    शुक्रः श्वेतः शनी राहुः कृष्णौ धूम्रस्तु केतवः।। (रू. म., अ. - 2, श्लो. - 20)
    (ख) श्वेतवर्णो भवेत्सोमो रक्तोह्यङ्गारकस्तथा।
    बुधश्च पीतवर्णाभस्तादृग्रूपं गुरोस्तथा।। अप. पृ., अ. - 214, श्लो. - 13)
18. बृ.जा., अ. - 2, श्लो. - 7, 9
19. (क) बृ.जा., ग्रहयोनिप्रभेदाध्यायः, श्लो. - 7, 4, 5

केचन नियमाः निर्दिष्टाः, येषु भूमिचयनकाले अवधानं दातव्यं यथा–

**मृत्तिकया भूमिपरीक्षा**

नारदपुराणानुसारं भूमौ अरत्निमात्रं (हस्तपरिमितम्) गर्तं खनित्वा निष्कासितमृत्तिकातः पुनः गर्तं पूरयेत्। मृत्तिकायाः वर्धनेन गृहस्वामिनः वृद्धिः, हीने हानिः, समे मध्यमफलं ज्ञेयम्। अग्निपुराणे मत्स्यपुराणे चापि अस्योल्लेखः प्राप्यते।[20]

मयमते[21] बृहत्संहितायाम्[22] अपराजितपृच्छायाञ्चापि[23] मृत्तिकयापरीक्षणेन भूमिगुणवत्तापरीक्षायै मतमिदं समर्थितम्।

**2.2 जलेन भूमिपरीक्षा**

नारदपुराणोक्तप्रकारेण गर्तं कृत्वा सायंकाले च तं जलेन पूरयित्वा प्रातः जलावशिष्टे वृद्धिः, पङ्के सति मध्यमफलं, जलाभावे हानिरेव जानीयात्।[24] अग्निपुराणे तु जलद्वारा भूमिपरीक्षायाः स्मरणमात्रं कृतम्।[25] वास्तुसौख्येऽपि एवमेव जलेन भूमिपरीक्षा निर्दिष्टा।[26] किन्तु शिल्पदीपके किञ्चिद्भिन्नं वर्णितम्। तदनुसारेण गर्तं जलेनापूर्य शतपदं गत्वा अनन्तरं परीक्षणे सति पादोने जले मध्यमफलम्, जलार्धे त्वधमफलम्, जलस्य न्यूनाभावे तु भूमिः उत्तमा भवति।[27]

---

20. (ख) जा. पा., ग्रहगुणाध्यायः श्लो. - 27
21. (क) समगर्तारन्निमात्रं मात्रं खनित्वा तत्र पूरयेत्।
    अत्यंतवृद्धिरधिके हीने हानिः समे समम्।। (ना. पु., पू. ख., अ. - 56, श्लो. - 543)
    (ख) आखाते हास्तिके यस्याः पूर्णे मृदधिका भवेत्।।
    उत्तमां तां महीं विद्यात्तोयाद्यैर्वा समुक्षितम्। (अ. पु. अ. - 92, श्लो. - 8, 9)
    (ग) रत्निमात्रमधोगर्ते परीक्ष्यं खातपुराणे।।
    अधिके श्रियमाप्नोति न्यूने हानिं समे समम्। (म. पु. अ. - 253, श्लो. - 16, 17)
22. वस्तुमध्ये ततस्तस्मिन् खानयेद् वसधातलम्।। अरत्निमात्रगम्भीरं चतुरस्रसमन्वितम्।
    पूरिते तन्मृदा खाते समता मध्यमा मता।। उत्तमा भूर्मृदाधिक्या हीना हीना मृदा मही।
    (मय. म., अ. - 4, श्लो. - 10, 11, 17, 18)
    23. गृहमध्ये हस्तमितं खात्वा परिपूरितं पुनः श्वभ्रम्।
    यद्यूनमनिष्टं तत् समे समं धन्यमधिकं यत्।। (बृ. सं., अ. - 53, श्लो. - 92)
24. हस्तमात्रं खनेद् भूमिं तस्यान्तर्घृतपांशुकम्। ततः खातं समाशोध्य पूरयेत् पांशुना वृतम्।।
    अधिके पांशुके श्रेष्ठा मध्यमा समपाशुके। हीनपांशौ कनिष्ठा च ज्येष्ठा मध्याधमा त्रिधा।।
    (अ. पु. अ. - 51, श्लो. - 7, 8)
25. तथा निशादौ तत्कृत्वा पानीयेन प्रपूरयेत्।
    प्रातर्दृष्टे जले वृद्धिः समं पंके क्षयः क्षये।। (ना. पु. पू. खण्डः, द्वि. पा., अ. - 56, श्लो. - 544)
26. उत्तमां तां महीं विद्यात्तोयाद्यैर्वा समुक्षिताम्। (अ. पु. अ. - 92, श्लो. - 9)
27. तत्रारत्निमितं गर्तं खनित्वाऽन्तः प्रपूरयेत्।
    प्रातर्दृष्टे जले वृद्धिः समं पंके ब्रणे क्षयः।। (वा. सौ., द्वि. भागः, श्लो. - 17)

### 2.3 घृतवर्तिद्वारा भूमिपरीक्षा

मत्स्यपुराणानुसारमरत्निमात्रं गर्तं कृत्वा घृतवर्तिचतुष्टयं प्रज्वाल्य सर्वदिङ्मुखं कृत्वा गर्ते स्थापयेत्। पूर्व-उत्तर-पश्चिम-दक्षिणदिक्षु या ज्योतिः दीर्घकालं यावज्ज्वलति, तदा भूमिः गृहनिर्माणार्थं ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादिक्रमेण चतुर्णां कृते शुभा भवति। यदि सर्वदिक्षु वास्तुदीपकः प्रज्वलति तर्हि चतुर्वर्णानां कृते प्रासादार्थं गृहार्थं वा सा भूमिः शुभदा ज्ञेया।[28]

अयं विधिः समराङ्गणसूत्रधारेऽपि निर्दिष्टः किन्तु तत्र ब्राह्मणादीनां कृते उत्तर-पूर्व-दक्षिण-पश्चिमादिक्रमः प्रोक्तः।

### 2.4 बीजवपनेन भूमिपरीक्षा

मत्स्यपुराणे भूमिपरीक्षणसन्दर्भे एकः अपरः नियमोऽपि निर्दिष्टः, तत्र सर्वप्रथमं हलाकृष्टभूमौ सर्वविधबीजानि वपेत्। यदि तृतीयरात्रौ, पञ्चमरात्रौ सप्तमरात्रौ वा बीजानां प्रस्फुटनं भवति तदा क्रमशः उत्तम-मध्यम-अधमफलं ज्ञेयम्।

अधमभूमिः तु सर्वथा त्याज्या।[30] विश्वकर्मवास्तुशास्त्रेऽपि बीजारोपणेन भूमिपरीक्षायाः विधिः प्राप्यते।[31] भोजोऽपि भूमेः उर्वरशक्त्या साकं बहुतृण-सम्पन्नतां, स्निग्धताञ्च प्रशस्तं स्वीकरोति।[32] वस्तुतः बीजाङ्कुरेण भूमेः उर्वरतायाः प्रवर्धनशीलतायाश्च ज्ञानं प्राप्यते। भूमिपरीक्षा वास्तुशास्त्रस्याधारभूतमङ्गं वर्तते, इत्यतः गृहनिर्माणात् पूर्वं भूमिपरीक्षा अवश्यमेव कर्तव्या यथोक्तम्-

**पूर्वं भूमिं परीक्षत् पश्चाद् वास्तु समारभेत्।**[33]

---

28. तत् कृत्वा जलपूर्णशतपदं गत्वा परीक्ष्य पुनः।
    पादोनेऽर्धविहीनकेऽथ निभृते मध्याधमेष्टावनी।। (शि. दीप., प्रकरणम् - 1, श्लो. - 16)
29. तिक्ता कषाया च तथा वैश्यशूद्रेषु शस्यते। अरत्निमात्रे वै गर्ते स्वनुलिप्ते च सर्वशः।।
    घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम्। ज्वालयेद् भूपरीक्षार्थं तत्पूर्णं सर्वदिङ्मुखम्।।
    दीप्तौ पूर्वादि गृह्णीयाद् वर्णानामनुपूर्वशः। वास्तुः सामूहिको नाम दीप्यते सर्वतस्तु यः।।
    शुभदः सर्ववर्णानां प्रासादेषु गृहेषु च। रत्निमात्रमधोगर्त्ते परीक्ष्यं खातपूरणे।।
    (म. पु. अ. - 253, श्लो. - 16.....16)
30. खातस्योदक्प्रभृतिषु दिक्षु प्रज्वालयीत वा।
    दीपान् यस्यां चिरं तिष्ठेत् तद्वर्णेष्टप्रदा हि सा।। (सम. सूत्र. वा., अ. - 10, श्लो. - 74)
31. फालकृष्टेऽथवा देशे सर्वबीजानि वापयेत्।।
    त्रिपञ्चसप्तरात्रे च यत्रारोहन्ति तान्यपि। ज्येष्ठोत्तमा कनिष्ठा भूर्वर्जनीयतरा सदा।। (म. पु. अ. - 253, श्लो. - 17, 18)
32. सा भूमिरुत्तमा ज्ञेया त्रिरामाङ्कुरवर्धिनी। सा मध्यमा च विज्ञेया पञ्चरात्राङ्कुरप्रदा।
    मन्दाङ्कुरप्रदा भूमिरधमा चेति गद्यते। सा वर्ज्या सर्वकार्येषु बीजानां क्षयकारिणी।। (वि. क. वा., 5-21, 22)
33. अनूषरा बहुतृणा शस्ता स्निग्धोत्तरप्लवा।। (सम. सूत्र. वा., अ. - 10, श्लो. - 65)

एवं प्रकारेण वास्तुग्रन्थेषु भूमिपरीक्षायाः इतरविधयोऽपि प्रोक्ताः, किन्तु नारदमत्स्याग्निपुराणेषूप-र्युक्तचतुर्णां विधीनामेवोल्लेखः प्राप्यते।

### 3. भूमिपरिग्रहपूर्वकशल्यशोधनम्

गृहपतिना गृहनिर्माणात् पूर्वं शास्त्रोक्तविधिना भूमिपरिग्रहः शल्यशोधनञ्च करणीयम्। अत्यावश्यकमिदं यद् गृहपतिः भूखण्डस्य श्रेष्ठवास्तुवेदी[34] द्वारा परीक्षणपूर्वकं शल्यशोधनं कारयेत्। भूमेः अन्तर्गताः वाञ्छनीयाः अवाञ्छनीयाश्च पदार्थाः भवितुमर्हन्ति। अवाञ्छनीयपदार्थेषु पशु-पक्षि-मनुष्यादीनामवशेषाः भवन्ति, येषां गृहपतौ दुष्प्रभावो जायते। अत एव गृहनिर्माणात् पूर्वं शल्यशोधनमवश्यमेव कर्तव्यम्।

### 3.1 भूमिपरिग्रहः

अग्निपुराणे[35] भूमिपरिग्रहस्य विधिः निम्नलिखितप्रकारेण वर्णितः यथा – वास्तुकर्मणि अस्थ्यङ्गारादिभिः दूषितां भूमिं खननगोकुलावासकर्षणादिभिः सम्यक् रीत्या आचार्यैः शोधनं कारयेत्। मण्डपे द्वारपूजातः मन्त्रतर्पणादीन् यावत् सम्पूर्णकर्माणि विधाय अघोरास्त्रमन्त्रस्य सहस्त्रपरिमितं जपं कर्तव्यम्। समतलोपलिप्तभूमौ दिक्शोधनपूर्वकं स्वर्णदध्यक्षतैः प्रदक्षिणक्रमेण रेखाः निर्मेयाः। तत्रैव मण्डलमध्यात् ईशानकोणे पूर्णकुम्भे शिवं यजेत्। अनन्तरं वास्तुपूजनपूर्वकं तज्जलेन कुद्दालमभिसिञ्च्येत्। मण्डलात् बहिः राक्षसान् अभ्यर्च्य दिग्बलिं दद्यात्। ततश्च भूमिमभिसिञ्च्य कुद्दालं खनित्रं वा संस्नाप्य पूजयेत्। वस्त्रयुगलेनाच्छन्नमन्यघटं द्विजस्कन्धे निधाय गीतवाद्यादिभिः वेदमन्त्रोच्चारण-पूर्वकं कुम्भमर्चयेत्। प्राप्ते सुलग्ने चाग्न्यां दिशि अभिषिक्तेन कुद्दालेन भूमौ खननं कुर्यात्।

खातस्य मृत्तिकां नैऋत्यकोणे क्षिपेत्, खाते च कुम्भजलं प्रपूरयेत्। तज्जलं पुनः नगरस्य पूर्वसीमान्तं यावत् अभिसिञ्चयेत्। तत्र क्षणं स्थित्वा नगरं परितः सीमान्तचिह्नान्यभिसिञ्चन् ईशानकोणं यावदागच्छेत्, एवं प्रदक्षिणक्रमेण रुद्रकलशस्य परिभ्रमणमर्घ्य दानमित्युच्यते। मयमतेऽपि[36] किञ्चित्

34. वा. वि., अ. - 2, श्लो. - 1

35. स्थापत्यवेदपर्यायः वास्तुवेदः। तस्य ज्ञाता वास्तुवेदी। यथा द्विवेदी-त्रिवेदी-चतुर्वेदी (Samarangan Sutradhar, Ch. . 16A श्लो. 49)

36. अस्थ्यङ्गारादिभिर्दुष्टामत्यन्तं शोधयेद्गुरुः।।
नगरग्रामदुर्गार्थं गृहप्रासादकारणम्। खननैर्गोकुलावासैः कर्षणैर्वा मुहुर्मुहुः।।
मण्डपे द्वारपूजादिमन्त्रतृप्त्यवसानकम्। कर्म निर्वर्त्याघोरास्त्रं सहस्त्रं विधिना यजेत्।।
समीकृत्योपलिप्तायां भूमौ संशोधयेद्दिशः। स्वर्णदध्यक्षतै रेखाः प्रकुर्वीत प्रदक्षिणम्।।
मध्यादीशानकोष्ठस्थे पर्णकुम्भे शिवं यजेत्। वास्तुमभ्यर्च्य तत्तोयैः सिञ्चेत्कुद्दालकादिकम्।।
बाह्ये रक्षोगणानिष्ट्वा विधिना दिग्बलिं क्षिपेत्। भूमिं संसिच्य संस्नाप्य कुद्दालाद्यं प्रपूजयेत्।।
अन्यं वस्त्रयुगच्छन्नं कुम्भं स्कन्धे द्विजन्मनः। निधाय गीतवाद्यादिब्रह्मघोषसमाकुलम्।।
पूजां कुम्भे समाहृत्य प्राप्ते लग्नेऽग्निकोष्ठके। कुद्दालेनाभिषिक्तेन मध्वक्तेन तु खानयेत्।।
नैर्ऋत्या क्षेपयेन्मृत्स्नां खाते कुम्भजलं क्षिपेत्। पुरस्य पूर्वसीमान्तं नयेद्यावदभीप्सितम्।।
अथ तत्र क्षणं स्थित्वा भ्रामयेत्परितः पुरम्। सिञ्चन्सीमान्तचिन्हानि यावदीशानगोचरम्।।
अर्घ्यदानमिदं प्रोक्तं तत्र कुम्भपरिभ्रमात्। इत्थं परिग्रहं भूमेः कुर्वीत तदनन्तरम्।। (अ.पु.अ. 92,श्लो. 9....19)

भिन्नप्रकारेण भूपरिग्रहस्य सम्पूर्णविधानं वर्तते।

**3.2 शल्यप्रश्नः**

तदनन्तरं भूमेः शल्यदोषं परिहर्तुं प्रस्तरान्तं जलान्तं वा भूमौ खन्नं कुर्यात्। शल्यज्ञाने सति विधिपूर्वकं शल्यमुद्धरेत्। शल्यमस्ति नवेति प्रश्ने सति प्रश्नकर्तुः मुखात् निस्सृताः अकचटतपयशह इत्यादयः वर्णा एव पूर्वादिक्रमेण क्रमशः शल्यज्ञानं कारयन्ति। मातृकां निम्नोक्तनुसारेण फलके भूमौ वा विलिख्य वर्गाक्षरेण शल्यादिकं ज्ञानं कर्तव्यम्।[37]

यदा गृहकर्ता दैवज्ञं प्रश्नं करोति तदा प्रश्नाक्षरस्य प्रथमाक्षरः (वर्गाक्षरः) भूखण्डस्य यस्मिन् खण्डे (दिशायाम्) आगच्छेत्, तत्रैव पूर्वादिक्रमेण लौह-अङ्गार-भस्म-अस्थि-इष्टिका-कपाल-शवकीट-लौह-रजतादिकं वक्तव्यम्। वास्तुसौख्येऽपि[38] एवमेव वर्णानुसारं शल्यज्ञानमुक्तं किन्तु तत्र दिक्षु प्राप्तशल्यप्रकारेषु भेदो वर्तते। तत्रायमपि सङ्केतो वर्तते यत् प्रश्नस्य प्रथमाक्षरो यदि वर्गाद्यक्षरतः भिन्नो भवेत् तदा ब्रह्मोक्त्वात् तत्र भूमौ शल्यं न भवति।[39] मुहूर्तगणपतिग्रन्थेऽपि वर्गस्य दिशानुरूपं शल्यमवगन्तव्यमिति प्रोक्तम्।[40] वास्तुराजवल्लभेऽपि अकारादिवर्गानुसारं शल्यज्ञानस्य क्रमः निर्धारितः।[41]

**3.3 शकुनद्वारा शल्यज्ञानम्**

मत्स्यपुराणे उक्तं यद् गृहारम्भे गृहपतिना यस्मिन्नाङ्गे कण्डूयते, वास्तुपुरुषस्य तस्मिन्नेवऽङ्गे शल्यं वर्तते। तत्र कथितं यत् शल्यसहितं गृहं भयकारकं शल्यरहितञ्च शुभदायकं भवति।[42] अस्यैव वचनस्य समर्थनमग्निपुराणेऽपि वर्तते यथा– गृहकर्तुः अङ्गविकारेण शल्यं विजानीयात्। तत्र पशूनां

---

37. मय. म., अ. - 4, श्लो. - 1....20
38. कर्करान्तं जलान्तं वा शल्यदोषजिघांसया। खानयेद्धकुमारी चेद्विधिना शल्यमुद्धरेत्।।
अकचटतपयशहान्मानवश्चेत्प्रश्नाक्षराणि तु। अग्नेर्ध्वजादिपतिताः स्वस्थाने शल्यमाख्यान्ति।।
कर्तुश्चाङ्गविकारेण जानीयात्तत् प्रमाणतः। पश्वादीनां प्रवेशेन कीर्तनैर्विरुतैर्दिशः।।
मातृकामष्टवर्गाढ्यां फलके भुवि वा लिखेत्। शल्यज्ञानं वर्गवशात्पूर्वादीशान्ततः क्रमात्।।
अवर्गे चैव लोहं तु कवर्गेऽङ्गारमग्नितः। चवर्गे भस्म दक्षे स्यात्टवर्गेऽस्थि च नैर्ऋते।।
तवर्गे चेष्टका चाऽऽप्ये कपालं च पवर्गके। यवर्गे शवकीटादि शवर्गे लोहमादिशेत्।।

हवर्गे रजतं तद्वदवर्गाच्चानर्थकानपि। (अ. पु. अ. - 92, श्लो. - 20......26)
39. (वा. सौ., तृ. भागः, श्लो. - 64.......73)
40. वर्गाद्यक्षरभिन्ने तु प्रश्नस्याद्यक्षरं यदि।
न तत्र विद्यते शल्यं ब्रह्मोक्तत्वान्न संशयः।। (वा. सौ., तृ. भागः, श्लो. - 21)
41. गृहप्रश्नाक्षरं पूर्वं यदि वर्गादिसम्मतम्।
शल्यं तद्दिशि जानीयाद् द्वयक्षैरैर्भमध्यमं वदेत्।। (मु. गण., - वास्तुप्रकरणम्, श्लो. - 12)
42. आकाचाटाएतशापायवर्णाः प्राच्यादिस्थे कोष्ठके शल्यमुक्तम्।
केशाङ्गाराः काष्ठलोहास्थिकाद्याः तस्मात्कार्यं शोधनं भूमिकायाः।। (वा.रा.ब., अ. - 1, श्लो. - 20)

प्रवेशेन पक्षिणां कलरवैश्चापि शल्यज्ञानं कर्तव्यमित्युक्तम्।[43]

बृहत्संहितायामपि गृहपतेः कण्डूतिवशात् वास्तोरङ्गे शल्यं भवतीति निर्दिष्टम्। तथा चाहुतिकाले क्षुतनिष्ठीवनरोदनवातोत्सर्गादिभिः अथवा अग्नौ विस्फुलिङ्गादिविकारो भवेत् तर्हि भूमौ तस्य देवतायाः स्थाने शल्यं ज्ञेयम्।[44]

मत्स्यपुराणेऽन्यत्रोक्तं यत् स्तम्भारोपणे सूत्रपातकाले च शुभाशुभशकुनानि भवन्ति, तस्मिन् काले पक्षिः आदित्याभिमुखं रौति अथवा गृहपतिः शरीरस्य यमाङ्गं स्पृशति, वास्तोः, तस्मिनङ्गे एव हस्त्यश्वशुनकादीनां शल्यं विद्यात्।

अन्यस्मिन् शकुने प्रसार्यमाणे सूत्रे श्रृगालः शुनको वा यदि विलङ्घते, अथवा भयङ्करशब्दो यदि भवति, तर्हि तत्र शल्यं विजानीयात्। यदि सूत्रपातसमये ईशानकोणे काकः मधुरं रौति, तदा गृहस्वाम्यधिष्ठिते स्थले धनं विज्ञेयम्।[45]

शल्यशोधनं भवननिर्माणात् पूर्वमेव कर्तव्यम्, यतोहि भवननिर्माणात् परमिदमशक्यं भवति, यस्मात् गृहे निवासकर्तृणां कृते शान्तिः नैव प्राप्यते। अत एव शास्त्रोक्तविधिभिः शल्यशोधनपूर्वकं गृहनिर्माणं शुभं सुखदायकञ्च भवति।

### 4. भूमेः प्लवत्वविचारः

भूमेः प्लवत्वनुगुणं गृहे निवासकर्तारः प्रभाविताः भवन्ति। अत एव शास्त्रोक्तप्लवत्वनुगुणं भूमौ गृहनिर्माणं प्रशस्यते। नारदपुराणे ईशान-पूर्व-उत्तरदिक्षु भूमेः प्लवत्वं मनुष्येभ्यः अत्यन्तवृद्धिदं स्मृतम्। अन्यदिक्षु प्लवत्वं तु सर्वेभ्यः हानिप्रदं भवति।[46]

इदं तु स्पष्टमेव यद् यस्यां दिशि प्लवत्वं भविष्यति, तस्माद् विपरीतदिशि भूमेः उन्नतिः भविष्यति। अत एव ईशान-पूर्व-उत्तरदिक्षु भूमेः प्लवत्वे सति एतद् विरुद्धं नैऋत्य-पश्चिम-दक्षिणदिक्षु

---

43. गृहारम्भेषु कण्डूतिः स्वाम्यङ्गे यत्र जायते। शल्यं त्वपनयेत् तत्र प्रासादे भवने तथा।।
सशल्यं भयदं यस्मादशल्यं शुभदायकम्। हीनाधिकाङ्गतां वास्तोः सर्वथा तु विवर्जयेत्।।
नगरग्रामदेशेषु सर्वत्रैवं विवर्जयत्।। (म. पु. अ. - 253, श्लो. - 49......51)

44. कर्तुश्चाङ्गविकारेण जानीयात्तत् प्रमाणतः।
पश्वादीनां प्रवेशेन कीर्तनैर्विरुतैर्दिशः।। (अ. पु. अ. - 92, श्लो. - 22)

45. कण्डूयते यदङ्गं गृहभर्तुर्यत्र वाऽमराहुत्याम्।
अशुभं भवेन्निमित्तं विकृतेर्वाग्नेः सशल्यं तत्।। (बृ. सं., वास्तुविद्याध्यायः, श्लो. - 59)

46. स्तम्भसूत्रादिकं तद्वच्छुभाशुभफलप्रदम्। आदित्याभिमुखं रौति शकुनिः परुषं यदि।।
तुल्यकालं स्पृशेदङ्गं गृहभर्तुर्यदात्मनः। वास्त्वङ्गे तद् विजानीयान्नरशल्यं भयप्रदम्।।
अङ्कनान्तरं यत्र हस्त्यश्वश्वापदं भवेत्। तदङ्गसम्भवं विन्द्यात् तत्र शल्यं विचक्षणः।।
प्रसार्यमाणे सूत्रे तु श्वा गोमायुर्विलङ्घते। तत्तु शल्यं विजानीयात् खरशब्देऽतिभैरवे।।
यदिशाने तु दिग्भागे मधुरं रौति वायसः। धनं तात्र विजानीयाद् भागे वा स्वाम्यधिष्ठिते।।
(म. पु. अ. - 256, श्लो. - 16......20)

भूमेः उन्नतिः भवेत्। वास्तुविद्याग्रन्थे[47] भूमेः ईशानादिशुभप्लवत्वस्य कृते क्रमशः धनवीथि-गोवीथि-गजवीथि इति नामकरणं कृतम्। तथा चान्येषां वीथीनामपि वर्णनं कृतमस्ति।

मनुष्यालयचन्द्रिकायां[48] भूमेः प्लवत्वनुगुणं वीथीनां नामानि फलञ्चोक्तम्। वास्तुविद्यायामपि[49] चतुर्णां वीथीनां फलमुक्तम्। बृहद्वास्तुमालाग्रन्थे[50] च सर्वासां वीथीनां फलमुक्तम्। भूमेः शुभाशुभप्लवत्वबोधक-चक्रेण विषयमिदं स्पष्टं भवति। शुभाशुभप्लवत्वबोधकचक्रम् यथा-

| क्र. अष्टवीथिनामानि | दिक्प्लवत्वम् | औच्च्यम् | प्राप्तफलम् |
|---|---|---|---|
| 1. गोवीथि | पूर्वदिशि | पश्चिमदिशि | धनधान्यवृद्धिः समृद्धिश्च |
| 2. अग्निवीथी/ वैश्वानरी | आग्नेयविदिशायाम् | वायव्यविदिशायां | दाहः धननाशः मृत्युः शोकश्च |
| 3. यमवीथि | दक्षिणदिशि | उत्तरदिशि | मृत्युः गृहनाशश्च |
| 4. भूतवीथी | नैर्ऋत्यविदिशायां | ईशानविदिशायां | धननाशः निर्धनता वा |
| 5. जलवीथी | पश्चिमदिशि | पूर्वदिशि | पुत्रहानिः अपयशः धननाशः निर्धनता च |
| 6. नागवीथी | वायव्यविदिशायां | आग्नेयविदिशायां | प्रवासः मानसिकोद्वेगः सन्ततिहानिश्च |
| 7. गजवीथी | उत्तरदिशि | दक्षिणदिशि | धनप्राप्तिः सम्पत्तिप्राप्तिश्च |
| 8. धनवीथी/ धान्यवीथी | ईशानविदिशायां | नैर्ऋत्यविदिशायां | विद्या-धन-सुख-कल्याणप्राप्तिः |

समराङ्गणसूत्रधारग्रन्थेऽपि पूर्व-उत्तर-पूर्वोत्तरदिक्षु भूमेः प्लवत्वमथवा सर्वदिक्षु प्लवत्वं समुदिष्टम्, मध्यस्थानस्य च समुन्नतभूमिरपि गृहनगरनिर्माणार्थमुत्तमा भवति।[51] मण्डनसूत्रधारेणापि भूमेः पूर्व-ईशान-उत्तरदिक्षु प्लवत्वं सौख्यकरमुक्तम्।[52] एवमेव प्रायशः सर्वत्र वास्तुग्रन्थेषु पूर्व-ईशान- उत्तरदिक्षु प्लवत्वं प्रशस्यते। एतस्य वैज्ञानिककारणमिदमस्ति, यत् एतासु दिक्षु गृहसन्निवेशेन गृहजनाः प्रातःकालीनसूर्यस्य शुभरश्मीनामानन्दं स्वीकर्तुमर्हन्ति। यतोहि सूर्योदयकालीनसूर्यस्य शुद्ध-शक्तिवर्धकरश्मयः शरीरं निपन्ति, यस्मात् त्वक् कान्तियुक्तो भवति। सूर्यः स्वप्रकाशेन अन्धकारस्य निवारणपूर्वकं रोग-दुःखस्वप्नादीनां नाशं करोति।[53] एतासु रश्मिषु पौष्टिकतत्त्वानां बाहुल्यं भवति। इत्यस्मादुपर्युक्तदिक्षु प्लवत्वनुकूलभूमौ गृहनिर्माणं कर्तव्यम्।

# वास्तुशास्त्रपरिचयः

**डॉ० नन्दनकुमारतिवारी**

भारतीयज्योतिषशास्त्रस्य संहितास्कन्धान्तर्गतं वास्तुविषयस्य चर्चा समुपलभ्यते, वास्तुशास्त्रं स्थापत्यशास्त्रं वा शिल्पशास्त्रमपि कथ्यते। व्याकरणशास्त्रस्य दृष्ट्या वस् निवासे धातोस्तुण्प्रत्यये सति वास्तु शब्दोऽयं निष्पद्यते। शीलति समादधाति इति शिल्पम्। शीलसमाधौ धातोः 'शिल्प' शब्दोऽयं निष्पद्यते। तत्रार्थवेदस्योपवेदात्वेनवास्तुशास्त्रमभिज्ञायते। अन्यशास्त्रवत् वास्तुशास्त्रस्योद्गमोऽपि वेदेभ्यो जातः। वेदेभ्य एवोपवेदाः उत्पन्नाः। वस्तुतः पृथिव्योपरि कश्चिदपि पार्थिवकृतिः 'वास्तु' वर्तते। नूनं भगवान् शिवः वास्तुपुरुषः। यथोक्तं यजुर्वेदस्य रूद्राष्टाध्याय्याम्-

**नमो व्वात्त्याय च रेष्म्याय च नमो व्वास्तव्व्याय च व्वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्म्राय चारुणाय च[1]।**

**प्रधानविषयाः-**

वास्तुस्कन्धे गृहनिर्माणं, जीर्णोद्धारः, प्रशस्तभूमिलक्षणं, काकिणीविचारः, ग्रामविचारः, दिशाविचारः, भूमेः शोधनम्, दिक्शोधनम्, शल्योद्धारविधिः, गेहमेलापकविचारः, गृहनक्षत्रकल्पना, गृहराश्यानयनम्, अष्टकूटविचारः, पिण्डानयनम्, षोडशशालाभेदाः, आयादिसाधनम्, गृहायुनिर्माणं, मण्डलानयनं, तिथि-वार-लग्नानयनम्, पिण्डविचारः, गृहोपकरणविचारः, दुर्गनिर्माणं, गृहारम्भमुहूर्त्तं, गेहारम्भे मासविचारः, वृषभवास्तुचक्रम्, कूर्मचक्रम्, गजमुखपृष्ठलक्षणम्, लग्नशुद्धिः, गृहप्रवेशः चेत्यादिविषयाः प्रधानतया उपवर्णिताः भवन्ति।

**प्रधानोपदेशकाः-**

मत्स्यपुराणानुसारेण वास्तुशास्त्रस्य अष्टादशोपदेशकाः सन्ति।[2] यथोक्तम् -

**भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा।**
**नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः॥**
**ब्रह्माकुमारो नन्दीशः शौनको गर्ग एव च।**
**वासुदेवोऽनिरूद्धश्च तथा शुक्रबृहस्पती॥**
**अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः।**

---

1. रूद्राष्टाध्यायी - पंचमोऽध्यायः, एकोनचत्वारिंशत मन्त्रः।
2. मत्स्यपुराणे - अ0 252

पुराणेषु प्रकृष्टं वास्तुविज्ञानं दृश्यते। ज्योतिषकल्पयोः च ततोऽप्यधिकं वास्तुवर्णनं प्राप्यते। अन्यच्च पुराणेषु तन्त्रेषु च ये वास्तुशास्त्राचार्याः वास्तुशास्त्रप्रवर्त्तकाः वा परिगण्यन्ते तेषु बहवो वैदिकर्षयः पुरातनार्याश्च शास्त्रप्रणेतारः सन्ति। वास्तुशिल्पशास्त्रीयग्रन्थेषु अग्निपुराणहयशीर्षपञ्चरात्रेषु आगमेषु च विलोक्यते तेनेदं विभावनीयं भवति यत् प्रासादस्थापत्यं दर्शनदृष्ट्यानुप्रणीतं पदे - पदे - प्रत्यक्षमनुभूयते।

जगद्धिताय वास्तुपुरुषस्योत्पत्तिः इति विश्वकर्मा स्वीकरोति भविष्यपुराणे। तत्र कृतयुगे महाभूतं समुद्भूतं येन स्वीयविपुलवपुषा सकलो ब्रह्माण्डः आच्छादितः। तं महाभूतं समवलोक्य सर्वे देवाः भयाकुलाः सन्तः विधातुः सकाशं गतवन्तः। यथोक्तम् -

**पुराकृतयुगे ह्यासीद् महद्भूतं समुत्थितम्।**
**व्याप्यमानं शरीरेण सकलं भुवनं ततः।।**

**तद् दृष्ट्वा विस्मयं देवा गता सेन्द्रा भयावृताः।**
**ततस्तैः क्रोधसन्तप्तैः गृहीत्वा तमथासुरम्।।**

**विनिक्षिप्तमधोवक्त्रं स्थितास्तत्रैव ते सुराः।**
**तमेव वास्तुपुरूषं ब्रह्मा कल्पितवान् स्वयम्**[3]**।।**

विश्वकर्मप्रकाशे च -

**भूतभावन भूतेश महद्भयमुपस्थितम्।**
**क्व यास्यामः क्व गच्छेमः वयं लोकपितामहः।।**[4]

ततः इन्द्रादयः देवा तं महाबलं महासुरं अधोमुखं निक्षिप्तवन्तः। तमेव महाबलं ब्रह्मा वास्तुपुरुषं कल्पितवान्। ततः स वास्तुपुरुषः महाशब्दं कुर्वन् प्रोक्तवान् - भो प्रभो! त्वया समस्तजगत् सृष्टम् इमे देवाश्च मां निरापराधं भृशं पीडयन्ति इति। ततः प्रसन्नेन ब्रह्मणा ग्रामे, नगरे, दुर्गे, पतने, प्रासादे, जलोद्यानेषु च वास्तुपुरुषाय पूजायाः विधानं कृतम्। अतः गृहारम्भे प्रवेशे महोत्सवे जीर्णोद्धारे शिलान्यासादिके च सदैव वास्तुपूजा कर्तव्या–

**नानाक्षतसमोपेतं वस्त्राऽलंकारसंयुतम्।**
**ब्रह्मघोषेण वाद्येन गीतमङ्गलानि स्वनैः।।**

**पायसं भोजयेद्विप्राणां होमन्तु मधुसर्पिषा।**
**वास्तोष्पतेः प्रतीजानीहि मन्त्रेणानेन सर्वदा।।**

3. भविष्यपुराणः - मध्यमपर्वः, अ0 14
4. मत्स्यपुराणः -भवननिर्माणाध्यायः

**सूत्रपाते तथा कार्य्यमेवं स्तम्भोदये पुनः।**
**द्वारवंशोच्छ्रये तद्वत्प्रवेशसमये तथा[5]॥**

वास्तुशास्त्रस्य विकसितस्वरूपस्य ज्ञानं वेदेषु मत्स्यपुराणे, वराहपुराणे, ब्रह्मवैवर्तपुराणे, स्कन्धपुराणे, अग्निपुराणे, देवीभागवतपुराणे, गरुड़पुराणे, भविष्यपुराणे, विष्णुधर्मोत्तरपुराणे, श्रीमद्भागवतपुराणे, वाल्मीकीरामायणे एवं महाभारते च सम्यक्प्रकारेण समुपलभ्यते। बृहद्वास्तुमालायां वास्तुपुरुषस्य सम्यक्प्रकारेण प्रतिपादितमस्ति। समराङ्गणसूत्रधारो वास्तुशास्त्रीयपुराणमस्ति। तत्र सप्तमाध्याये वास्तुविज्ञानस्य व्यापकस्वरूपस्य विषयाणां पौराणिकावतारणा कृता वर्तते।

गृहनिर्माणारम्भे सर्वप्रथमं शिलान्यासो भवति। आग्नेयकोणं सम्पूज्य प्रथमां शिलां संस्थाप्य सर्वाः शिलाः प्रदक्षिणाक्रमेण न्यस्यन्ते। यथोक्तं मत्स्यपुराणे -

**वास्तूपशमने तद्वद्वास्तुयज्ञस्तु पञ्चधा।**
**ईशाने सूत्रपातः स्यादाग्नेये स्तम्भरोपणम्॥**

**प्रदक्षिणा प्रकुर्वीत वास्तोः पदविलेखनम्।**
**तर्जनी मध्यमा तथाङ्गुष्ठस्तु दक्षिणे॥**

तत् खननं कस्यां दिशि भवेत् एतदर्थं राहोर्मुखपुच्छविचारः क्रियते। राहोर्मुखपुच्छे कदापि खननं न करणीयम्। यस्मिन् भागे नागस्य शरीराङ्गानि न स्युः तस्मिन् भागे खननं शुभावहं भवति। देवालयनिर्माणे, गृहारम्भे, तडागारम्भे वा सूसर्यराशिसंचरणवशाद्राहोर्मुखपुच्छविषये जानीयात्। अस्य वास्तुशास्त्रस्य वैशिष्ट्यं वैदिककालादारभ्य संप्रत्यपि सततपरिचर्चायामुपलभ्यते। साम्प्रतं वास्तुशास्त्रस्योपयोगिता गृहनिर्माणे पदे-पदे प्रत्यक्षं स्वीक्रियते।

**वास्तुपुरुषस्य स्थितिज्ञानम् -**

**सवेदास्तिथयोर्द्विघ्ना नामाक्षर समन्विता।**
**त्रिभिश्चैवहरेद्भागं शेषः पुरुष उच्यते॥**

**एके च वसते स्वर्गे द्वाभ्यां पातालमेव च।**
**शून्ये तु मृत्युलोके स्यादिति पाराशरोऽब्रवीत्॥**

**पायसं भोजयेद्विप्राणां होमन्तु मधुसर्पिषा ।**
**वास्तोष्पतेः प्रतीजानीहि मन्त्रेणानेन सर्वदा ॥**

**सूत्रपाते तथा कार्य्यमेवं स्तम्भोदये पुनः ।**

---

5. वृहद्वास्तुमाला - टीकाकारः, हरिशंकरपाठकः, श्लोक संख्या - 123,124,125

**द्वारवंशोच्छ्रये तद्वत्प्रवेशसमये तथा[८] ॥**

**ग्रामवासे काकिणीविचारः-**

**स्ववर्ग द्विगुणं कृत्वा पर वर्गेण योजयेत्।**
**अष्टभिस्तु हरेद्भागं योऽधिकः स ऋणी भवेत्[९]॥**

**सूत्रम् -**

$\frac{(\text{स्वनामवर्ग} \times 2) + \text{ग्रामवर्गसंख्या}}{8}$ = शेषम् व्यक्तिकाकिणी। एवमेव ग्रामकाकिणी अपि साधनीया।

यस्या काकिणी अधिका स्यात् स द्वितीयेन लाभान्वितो भवति।

**भूमिलक्षणम् -**

**सुगन्धा ब्राह्मणी भूमी रक्तगन्धा तु क्षत्रिया।**
**मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिका॥**

**प्रशस्तभूमिः गजपृष्ठः -**

**दक्षिणे पश्चिमे चैव नैर्ऋत्ये वायुकोणके।**
**एभिरुच्चा यदा भूमिर्गजपृष्ठाऽभिधीयते॥**

यस्य दक्षिण, पश्चिम, नैर्ऋत्य, वायव्यश्च भागाः उन्नता सा गजपृष्ठभूमिः, भवति।

**निवासफलम्-**

**गजपृष्ठे भवेद्वासः स लक्ष्मीधनपूरितः।**
**आयुर्वृद्धिकरो नित्यं जायते नात्र संशयः॥**

**गजपृष्ठभूमौ निवासेन धनायुष्यवृद्धिः भवति।**

**गृहनिर्माणमहत्वम् -**

**कोटिघ्नं तृणजे पुण्यं मृण्मये दशसंगुणम्।**
**इष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे[7]॥**

---

6. वृहद्वास्तुमाला - हरिशंकरपाठकः, श्लोक संख्या - 4
7. वृहद्वास्तुमाला - हरिशंकरपाठकः, श्लोक संख्या - 5

क्रमेण यदि तृणेः गृहनिर्माणं क्रियते तदा कोटिगुणं फलं, मृत्तिकया दशगुणितं फलं, इष्टिकया शतगुणितं फलं तथा च प्रस्तरेण यदि गृहनिर्माणं क्रियते तर्हि अनन्तं फलं प्राप्यते।

**वर्गज्ञानम् -**

**वर्गाष्टकस्य पतयो गरुडो विडालः सिंहस्तथैव शुनकोरगमूषकैणाः।**
**मेषः क्रमेण गदिताः खलु पूर्वतोऽपिः यः सः रिपुरेव बुधैर्विवर्ज्यः[8]॥**

**स्पष्टार्थ चक्रम्**

| अवर्गः 1 | कवर्गः 2 | चवर्गः 3 | टवर्गः 4 | तवर्गः 5 | पवर्गः 6 | यवर्गः 7 | शवर्गः 8 | **वर्गाः संख्याश्च** |
|---|---|---|---|---|---|---|---|---|
| पूर्व | अग्नि | दक्षिण | नैर्ऋत्य | पश्चिम | वायव्य | उत्तर | ईशान | **दिक्** |
| गरुड़ | विडाल | सिंह | श्वान | सर्प | मूषक | मृग | मेष | **स्वामीनां नामानि** |
| 8 | 5 | 6 | 4 | 7 | 1 | 3 | 2 | **स्वराङ्काः** |

**मध्येऽत्युच्चं भवेद्यत्र नीचं चैव चतुर्दिशम्।**
**कूर्मपृष्ठा भवेद्भूमिस्तत्र वासो विधीयते॥[9]**

**कूर्मपृष्ठे भवेद्वासो नित्योत्साहसुखप्रदः।**
**धनधान्यं भवेत्तस्य निश्चितं विपुलं धनम्॥[11]**

यस्य मध्यभागोन्नतं तथा च चतुर्दिक्षु नतं सा कूर्मपृष्ठभूमिः भवति। कूर्मपृष्ठभूमौ निवासेन भौतिकसुख - सम्पदादीनां प्राप्तिर्भवति।

**ध्रुवादिषोडशगृहाः**

तत्र दैत्यनागपृष्ठलक्षणान्विता भूमि अशुभा भवति।

**ध्रुवधान्ये जयनन्दौ खरकान्तमनोरमं सुमुख - दुर्मुखोग्रं च।**
**रिपुदं वित्तद नाशे चाक्रन्दं विपुल विजयाख्यं स्यात्[12]॥**

**गृहप्रवेशमुहूर्त्तः -**

**सौम्यायने ज्येष्ठतपोऽन्त्यमाधवे यात्रानिवृत्तौ नृपतेर्नवे गृहे॥**

8. वृहद्वास्तुमाला - हरिशंकरपाठकः, लोक संख्या - 17
9. वास्तुरत्नाकरः - भूपरिग्रहप्रकरणम् , श्लोक संख्या - 23
10. मुहूर्त्तचिन्तामणि - वास्तुप्रकरण, श्लोक संख्या - 3,4
11. मुहूर्त्तचिन्तामणि - वास्तुप्रकरण, श्लोक संख्या - 10
12. मुहूर्त्तचिन्तामणि - वास्तुप्रकरण, श्लोक संख्या - 18

**स्याद्वेशनं द्वाःस्थमृदुध्रुवोडुभिजन्मर्क्षलग्नोपचयोदये स्थिरे**[14] ॥

उत्तरायणे मकरार्कात् मिथुनार्क यावत् ज्येष्ठमासः, माघमासः, फाल्गुनमासः, वैशाखमासश्च, एषु मासेषु गृहस्य द्वारदिशि स्थितेषु नक्षत्रेषु मृगान्त्यचित्रानुराधा–उत्तरात्रयरोहिणीनक्षत्रेषु जन्मराशिः जन्मलग्नम् चानयो उपचये (त्रिषडेकादशदशभवनोपगते लग्नोदये), स्थिरे (स्थिरलग्नोदये च), नृपतेः यात्रानिवृत्तौ नूतननिर्मिते गृहे च प्रवेशनं शुभं भवति।

---

13. मुहूर्त्तचिन्तामणि - वास्तुप्रकरण, श्लोक संख्या - 26
14 मुहूर्त्तचिन्तामणि - गृहप्रवेशप्रकरण, श्लोक संख्या - 1

# वायुतत्वानुशीलनम्

**डॉ. योगेन्द्रकुमारशर्मा**

वस्तुत: **वेदोऽखिलो धर्ममूलम्**[1] इति समुद्घोषयता मनुना समग्रस्यापि धर्मस्य मूलं वेद इति स्वीकृतम्। अत: धर्मज्ञानाय षडङ्ग साहितस्य वेदस्य ज्ञानमावश्यकमस्ति। तत्रापि षडङ्गेषु ज्योतिषमन्यतममिति न केषां विमति:। यथा चोक्तम्–

**वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमुदीरितम्।**

ज्योतिषशास्त्रस्य मुख्यत: त्रयो विभागा: सन्ति। येषु संहितास्कन्धे वास्तुशास्त्रस्य वर्णनं लभ्यते। वास्तुशब्दस्याभिप्राय: निवासोपयुक्तं स्थानं भवति। वसन्ति जना: यत्र इति वास्तु–गृहम्। 'वस्' गृहनिर्माणे – भूमिलक्षणं भूमिपरीक्षणं दिशाज्ञानं मासनक्षत्रादिविचार: वास्तुशास्त्रस्य विषया: सन्ति।

वास्तुशास्त्रे पञ्चमहाभूतानां यथा आकाश–वायु–तेज–जल–पृथ्वीत्यादीनां वर्णनम् अपि वर्तते। एतेषु महाभूतेषु 'वायु' इति महाभूतस्य समग्रवर्णनम् अत्र अस्मिन् शोधपत्रे मया प्रस्तूयते।

वायोरुद्भव: कथं जातम्? वायो: लक्षणं किम्? इत्यस्मिन् विषये भारतीयदर्शनशास्त्रेषु विस्तृतं प्रामाणिकं वर्णनमुपलभ्यते। वैशेषिकदृष्ट्या सप्तपदार्था:[7] सन्ति। तेषु पृथिव्यप्तेजो–वायु–आकाश–काल–दिक्–आत्मा–मनांसि नवैव द्रव्याणि।[8] अत्र वायो: विवेचनप्रसंगे प्रथमं वायोर्लक्षणं वर्ण्यते, यथा –रूपरहितस्पर्शवान्वायु:।[9] स द्विविधो – नित्योऽनित्यश्च। नित्य: परमाणुरूप:, अनित्य: कार्यरूप:। पुनस्त्रिविध:–शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतु:। शरीराऽन्त:सञ्चारी वायु: प्राण:, स चैकोऽपि उपाधिभेदात् प्राणाऽपानादिसंज्ञां लभते।[10] अत्र प्राणादि–पञ्चवायु अस्माकं शरीरे एव तिष्ठति यथा – **प्राण–अपान–व्यान–उदान–समाना:।**[11]

एतेषां स्थानमपि तत्रैवोल्लिखितम् , यथा –

**हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले।**
**उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः॥**[12]

---

1. मनुस्मृति: 2.6
7. द्रव्य–गुण–कर्म–सामान्य–विशेष–समवाय–अभावा: सप्त पदार्था:। (तर्कसंग्रह,पृ. 3,चौखम्बा सुरभारती प्रकाशन)
8. तत्रैव तर्कसंग्रहे,पृ.3
9. तत्रैव,पृ.11
10. तत्रैव तर्कसंग्रहे पृ.11
11. वेदान्तसार: 2.77
12. तर्कसंग्रहे पृ.11

एतदतिरिच्य नाग-कूर्म-कृकल-देवदत्त-धनञ्जयादि[13] पञ्च प्राणा अपि अस्माकं शरीरे निवसन्ति। अत्र नागः उद्गिरणकरः। कूर्म उन्मीलनकरः। कृकलः क्षुत्करः। देवदत्तो जृम्भणकरः। धनञ्जयः पोषणकरः।[14] वायोरुद्भवप्रकरणे मनुना स्वग्रन्थे लिखितम्-

**आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः।**
**बलवानञ्जायते वायुः सर्वे स्पर्शगुणो मतः।।[15]**

अस्माभिर्ज्ञायते यत्वायौ प्राणशक्तिः (Oxygen) वर्तते। ऋग्वेदे वायुदेवतायाः वर्णनमस्ति। तत्रोल्लिखितं यत् वायुः सर्वे जीवधारिणां प्राणशक्तिरूपेण विद्यते वसुन्धरायाम्। तदैव पीयूषनिधि अस्ति। तत् औषधिरूपेण कार्यं करोति। हृदयरोगानपाकरोति। दीर्घायुष्यप्रदातास्ति। प्राणशक्तिवशाद् वायु अस्माकं जनकः, भ्राता- मित्रञ्चास्ति।[16]

वायौ नियुत्-शक्तिः (Nitrogen) वर्तते। ऋग्यजुर्वेदयो नाइट्रोजन इत्यस्य वर्णनं नियुत् शब्देन मिलति। अस्मादेव कारणाद् विभिन्नस्थलेषु अनेकेषु मन्त्रेषु वायुः नियुत् नाम्ना ज्ञायते।[17] वायौ नाइट्रोजन इत्यनेन शत सहस्रञ्च शक्तियुक्तं चोक्तम्।[18] विषयेऽस्मिन् ऋग्वेदे उद्धृतमस्ति।[19] तैत्तिरीयसंहितायामपि लिखितम् वर्तते यत्- नियुत्वत्या यजति (नियुत्वद्देवताकः वायुः)।[20]

वायोरुद्भवविषये सामान्यतः वयं जानीमः यद्वायुः महाभूतोऽस्ति। वस्तुतः किञ्चिदप्येदं जगदस्ति तद् सर्व पञ्चभूतात्मकम् एव। अत एतेषु महाभूतेषु वायोरुद्भवः आकाशाद् एव सञ्जायते यथा तैत्तिरीयोपनिषदि वर्णनं मिलति -

**तस्माद्वा एतस्मादात्मन आकाशःसम्भूतः।**
**आकाशाद्वायुः। वायोरग्निः। अग्नेरापः।। अद्भ्यः पृथिवी।[21]**

सूर्योपनिषदि तु सर्वं खलु इदं जगत् सूर्याज्जायते तत्र वायोरुद्भवविषये लिखितमस्ति- आदित्याद् वायुः जायते।[22]

---

13 . वेदान्तसारः,2.84
14 . तत्रैव,2.85
15 . मनुस्मृतिः 01.76
16. यददो वात ते गृहे - अमृतस्य निधिर्हितः।
ततो नो देहि जीवसे।। ऋग्वेदः 10.186.1-3
17 . नियुत्वान् वायो- आ गहि। यजुर्वेद 27.29
18 . आ नो नियुद्भिः शतिनीभिः .... सहस्त्रिणीभिः। यजु. 27.28
19 . सहस्रेण नियुता नियुत्वते .। ऋग्वेदः 1.135.1
20. तैत्ति. संहिता 2.6.2.3
21. तैत्तिरीयोपनिषद् - ब्रह्मानन्दवल्ली, प्रथम अनुवाकः
22. उद्धृतम् भारतीय ब्रह्माण्ड विज्ञान, पृष्टः 57

एवमेव प्रश्नोपनिषदि स्पष्टमस्ति यत् –

**स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथ्वीन्द्रियं मनोऽन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च।[23]**

इत्यस्य पुष्टिः सूर्यसिद्धान्ते अपि वर्तते।[24] उपनिषत्सु संहिताविषये उपासनाविधेः वायुः संहितायाः उत्तरपूर्वपक्षयोः अर्थात् पृथ्वी–स्वर्गयोः संधानमेव।[25] वायुः साक्षात् परब्रह्मणः स्वरूपमस्ति।[26] अस्माकं शरीरे वायुः प्राणवायोः रूपे स्थितः अतः महर्षिवेदव्यासः कथयति –

**प्राणो ब्रह्मेति व्याजानात्।प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते।**
**प्राणेन जातानि जीवन्ति। प्राणं प्रयन्त्यभिसंविशन्तीति।[27]**

ऋग्वेदे वायोः स्वरूपं देवत्वमभिधीयते।[28] वायुः समस्तेषु देवेषु अग्रगण्योऽस्ति।[29] वायुः त्वष्टुः जामाताऽस्ति।[30] वायुः मरुतस्य जनकः।[31] इन्द्रस्य सारथिरस्ति।[32] ऋग्वेदे वायोरपर नाम वातः वर्तते। संभवतः एतदेव भौतिकवायोः स्वरूपमस्ति।[33] प्राणो हि समस्तभूतानामायुः।[34] विराट–पुरुषस्य श्रौतादुत्पन्नोऽयं वायुः। यथा–

**चन्द्रमा मनसो जातश्चक्षोःसूर्य्योऽअजायत।।**
**श्रौत्राद्वायुश्च प्प्राणश्च मुखादग्निरजायत।।[35]**

वायोः वैशिष्ट्यम् उल्लिखन् आयुर्वेदे वर्णितमस्ति यत् –

**वायुरायुर्बलं वायुर्वायुर्धाता शरीरिणाम्।**
**वायुर्विश्वमिदं सर्वं प्रभुर्वायुश्च कीर्तितः।।[36]**

---

23. प्रश्नोपनिषद्, षष्ठ प्रश्न , मंत्र 4
24. मनसः खं ततो वायुरग्निरापो धरा क्रमात्।
    गुणैकवृद्ध्या पञ्चेति महाभूतानि जज्ञिरे।। सूर्यसिद्धान्तः 12.23
25. पृथिवी पूर्वरूपम्। द्यौरुत्तररूपम्। आकाशः संधिः। वायुः संधानम्।। तैत्तिरीयोपनिषद् –शिक्षावल्ली तृतीयोऽनुवाकः
26. नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि।। तत्रैव प्रथमनुवाके।
27. तत्रैव, भृ.व.तृतीयानुवाकः
28. आदेवासोवाताय, ऋग्वेद 7.92.4
29. वायो मन्दानो अग्रिमः;ऋग्वेद 08.26.25
30. ऋग्वेद,8.26.21–22
31. ऋग्वेद,1.134.4
32. ऋग्वेद,4.46.2, 4.48.2
33. ऋग्वेद,10.168.1
34. तै.उ., 2.3
35. रुद्राष्टाध्यायी 2.12
36. चरकसंहिता, 28.02

छान्दोग्योपनिषदि तु ब्रह्मणः चतुर्थपाद-रूपेण स्वीकृतो वायुः -

**प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च।**[37]

वायो अपरनाम-मरुत्।[38] आंग्लभाषायां मरुद्-गण इत्यस्य Electro-magnetic Waves इत्यर्थः।[39] मरुदादिगणाः वृष्टेः कारणम्। अथ च मेघानां स्वामी वा अन्न-जलयोः प्रदाता तथा च जगतः नियामकः।[40] मरुत्सु चुम्बकीयशक्तिः (Magnetic Power) विद्यते। अस्मादेव कारणादेतेषाम् अयोदंष्ट्र इति उपनामरूपेणास्माभिर्ज्ञायते अपि च एतेषामन्ते अयस् (चुम्बकीयशक्तिः) भवति। विकिरण (Radiation) इत्यस्मात् कारणाद् विधावतः नाम्ना विधियते।[41] विद्युत् (Electricity) मरुतां जनक इति ऋग्वेदे उच्यते।[42]

वस्तुतः मरुतां सप्तबृहद्गणाः (Grup) भवन्ति।[43] वेदानुसारेणैतेषां सप्तमरुद्वर्गाणां सप्त उपभेदा अपि भवन्ति अतः मरुतां संख्या एकोनपञ्चाशत् (49) भवन्तीति।[44] तेषां नामानि क्रमशः प्राण-अपान-व्यान-उदान-समान-नाग-कूर्म-कृकल-देवदत्त-धनञ्जय-प्रवह-विवह-शुभ-संवह-परिवह-उद्वह-आवह-शंकु-कास-प्रावह-शास-अनिल-प्रतिभ-कुमुद-अनल-कांत-शिव-श्वेत-रक्त-कृष्ण-जित-अजित-झञ्झाद्योत-ऋतु-सिद्धि-पिंग-शुचि-शौम्य-काम्य-मारुत-हनु-कंचन-मण्डूक-भीम-कपि-संवर्तक-जड-अतिजड-संणताश्च प्रवर्तन्ते।[45] ऋग्वेदे तु लिखितं यदेतेषु प्रत्येकं शतगुणिता शक्तिरस्ति।[46] शतपथब्राह्मणे तु वर्तते यत् मरुतगणाः वृष्टेः जनकाः स्वामिनो वा।[47] एते एव मेघानां निर्माणम् अथ च वृष्टिं कुर्वन्ति।[48] मरुद्गणानां पार्श्वे तु स्वस्य विद्युतमपि अस्ति तथा च एते स्वस्य विद्युत-चुम्बकीय-क्षेत्रम् (Electro-magnetic field) अप्युत्पादयन्ति।[49] ऋग्वेदस्य मरुत्सूक्ते[50] मरुद्गणानां (Electro&magnetic Waves) विस्तृतरूपेण वर्णनमस्ति।

लक्षणाधारेण वृष्टिसन्दर्भे वायुः भावक-स्थापक-ज्ञापकाश्चेति त्रिधारूपे विभज्यते।[51] यथा -

37. छान्दोग्योपनिषद् 3.18.4
38. आप्टेकोशः, पृष्ठसंख्या 778
39. वेदो में विज्ञान, पृ.32
40. अथर्ववेद 4.27.1-7
41. मरुतः .....अयोदंष्ट्रान् विधावतः ..। ऋग्वेद 1.88.5
42. हस्कराद् विद्युतस्परि-अतो जाता अवन्तु नः। मरुतः .....।। ऋग्वेदः 1.23.12
43. सप्त हि मारुता गणः। शत. ब्रा. 2.5.1.23
44. सप्त हि मारुता गणः। शत. ब्रा. 2.5.1.25
45. प्राचीन कथा-संदर्भ कोश, पृष्ठ संख्या 251
46. सप्त मे सप्त शाकिन एकमेका शता ददुः। ऋग्वेदः 5.52.17
47. मरुतो वै वर्षस्येशते। शत.ब्रा. 9.1.2.5
48. वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः। ऋग्वेदः 5.53.6.
49. आ विद्युन्मद्भिर्- मरुतः स्वर्काः। ऋग्वेदः 1.28.9
50. ऋग्वेदः 5.87
51. वातस्त्रिधा भावकश्च स्थापको ज्ञापकस्तथा।
    अभ्राद्युत्पादयेदाद्यो दिवि संचारयेत् परः।। कादम्बिनी 3.6

| क्र.सं. | वायोःभेदः | लक्षणम् |
|---|---|---|
| 1. | भावकः | ज्ञापको भाविनीं वृष्टिं पूर्वमेव निवेदयेत्। आद्यस्तु वृष्टिं तत्काले कुर्यात्कालांतरेऽपि वा।।[52] |
| 2. | स्थापकः | आर्तवो नियतो वायुः स्थापकः स्थापयेद्दिवि। समुद्रादुत्थितं तोयं दोषाद् व्यभिचरत्यपि।।[53] |
| 3. | ज्ञापकः | ज्ञापका धारणाकाले ये चोक्ता गर्भमासिके। तिथिसम्बन्धजा वाता इत्थं वातस्त्रिधोदितः।।[54] |

**वायोराधारः भेदाश्च** -

वायुमाग्लभाषायांAIR इति कथ्यते तथा च पवनम् WIND इत्युच्यते। वस्तुतः वायुपवनयोः मध्ये किञ्चिदन्तरमस्ति यथा यः स्थिरः वायुः वर्तते तद्वायुः नाम्नाविधीयते। अथ च यः प्रवाहमानः वायुः भवति सः पवनः नाम्ना ज्ञायते। वायुः यद् वर्तते तदनैकानां वायूनाम्मिश्रणमस्ति, अस्य आवरणं नाम वायुमण्डलम् उच्यते। वायुमण्डलं भूमेः गुरुत्वाकर्षणवशादेव संलग्नस्तीति।[55]

वर्षाया: वायोश्च अन्योन्याश्रितसम्बन्धोऽस्ति। वर्षायाः कृते वायौ जलवाष्पकणानाम् उपस्थिति अनिवार्योऽस्ति। इत्थमेव वायोः समुचितस्थितिः आवश्यकी अस्ति। यतो हि वायौ पर्याप्तजलवाष्पेन साकम् उपयुक्तवायोरभावान्मेघानामुत्पत्तिः वृष्टिश्च न भवितुं शक्यते। मेघनिर्माणार्थं जलवाष्पयुक्तवायुमूर्ध्वं नयतः संतुलितस्योर्ध्वगामिनश्च वायोरावश्यकता भवति। ऊर्ध्ववायुः जलवाष्परूपमेघं देश-देशान्तरेषु भ्रमणं कारयन् यदा तद्भारं वोढुमक्षमो भवति तदा शीतलजलवाष्पयुक्ताः मेघाः द्रवीभूत्वा वर्षन्ति। अतो मरुत्सूत्रे वर्णितमस्ति यद्वर्षाकाले स्वरश्मिद्वारा आहृत्यजलेन सूर्यः वायुमेव तृप्तीकरोति।[56] वस्तुतो वायुः मेघोत्पत्तिकालादारभ्य वृष्टिकालपर्यन्तं प्रत्येकं-क्षणे मेघेन सहैव वसति। अतो वायोरानुकूल्यं मेघानां कृते आवश्यकमस्ति। मेघगर्भकाले तीव्रः रुक्षश्च वायुः प्रचलति चेत्तदा मेघगर्भनाशः सम्भावितोऽस्ति। अनुकूलो वायुः सदा कल्याणकारी भवति। अतो वायोः सुदृढ-आधारो वृष्ट्याः कृते अत्यन्तमावश्यकोऽस्ति।[57]

**वायोः भेदाः** -

वस्तुतोऽस्माकं शास्त्रेषु सप्तवायोरावरणानि उल्लिखितानि सन्ति। ते क्रमशः आवहः (भूवायुः)

52 . तत्रैव 3.7
53 . तत्रैव 3.9
54 . तत्रैव 3.10
55 . उद्धृतं भारतीय वृष्टिविज्ञान परिशीलन, पृष्ट-113
56 . आदित्य एवं तर्पयिता येषां ते कधप्रियः (मरुतः)।
मरुतो हि वर्षासु रश्म्याहृतैरूदकैरादित्येन तर्प्यन्ते।। ऋ.सं.म.सू.(उद्धृतं भा.वृ.वि.परि.पृ. 92)
57 . उद्धृतं भारतीय वृष्टिविज्ञान परिशीलन पृ.92

प्रवह उद्वहः संवहः सुवहः परिवहः परावहश्च नाम्ना परिगण्यन्ते। उक्तञ्चात्र श्रीपतिना –

**स्यादावहः प्रवह उद्वहसंवहौ च स्वादिर्वहः परिवहश्च परावहश्च।**
**स्कन्धाः क्रमेण मरुतामिति सप्तसंख्या विश्वम्भरावहनमावहमाहुरेके।।**[58]

पृथिवीं परितो वायोः सप्तावरणानि विद्यन्ते। आवरणस्य अन्या संज्ञा वायुमण्डलमस्ति। पृथिव्याः वायुमण्डलं सततरूपेण गुरुत्वाकर्षणस्य प्रभावेन पृथिव्या सह संलग्नं भूत्वा परिभ्रमति। प्रथम आवहः, द्वितीयः प्रवहः, तृतीय उद्वहः, चतुर्थः संवहः, पञ्चमः सुवहः,(विवहः)षष्ठः परिवहः सप्तमः परावह एते सप्तवायवोऽनेन क्रमेण भूमेरुपर्युपरिपरिभ्रमन्ति। मनुस्मृतौ[59] वायुपुराणे[60] महाभारते[61] अन्येषु पुराणेषु च सप्तवायुनामुल्लेखो विस्तृतरूपेण वर्तते। एकस्मिन् प्रसङ्गे महाभारते कथितं यत् **'इमे दितेः पुत्राः परमाद्भुताः'**[62] सन्ति। जैनग्रन्थतत्वार्थसूत्रस्य तृतीयाध्याये सुखबोधिनीटीकायामुल्लिखितं यत् – भूमेरुपरि घनवात–अम्बुवात–तनुवाताश्च त्रयो वलयाः सन्ति।[63] ब्रह्माण्डपुराणेऽपि किञ्चिदेतादृशं वर्णनमुपलभ्यते। यथा–

**पृथिव्या मण्डलं कृत्स्नं घनतोयेन धार्यते।**
**घनोदधिः परेणाथ धार्यते घनतेजसा।।**

**वाह्यतो घनतेजश्च तिर्यगूर्ध्वं तु मण्डलम्।**
**समन्ताद् घनवातेन धार्यमाणं प्रतिष्ठितम्।।**[64]

**घनवातं तथाकाशम् आकाशं च महात्मना।**
**भूतादिनां वृतं सर्वं भूतादिर्महतावृतः।।**[65]

भूमेरुपरि सप्तवायूनां प्रसङ्गे सिद्धान्तशिरोमणौ भास्कराचार्यैः निम्नाङ्कितरूपेण कथितम्–

**भूवायुरावह इह प्रवहस्तदूर्ध्वः स्यादुद्वहस्तदनु संवहसंज्ञकश्च।**
**अन्यस्ततोऽपि सुवहःपरिपूर्वकोऽस्माद् बाह्यः परावह इमे पवनाःप्रसिद्धाः।।**

## 01. आवहः (भूवायुः)

58 . उद्धृतम् अर्वाचीनं ज्योतिर्विज्ञानम् , पृष्ठसंख्या – 49
59 . मनुस्मृतिः –1.26 (उद्धृतम् भुवनकोशविमर्शः पृ. – 105)
60 . वायुपुराणम्–49.163 (उद्धृतम् भुवनकोशविमर्शः पृ. – 105)
61 . महाभारते, शान्तिपर्वः – 328.36–52 (उद्धृतम् भुवनकोशविमर्शः पृ. – 105)
62 . उद्धृतम् भुवनकोशविमर्शः पृ. – 105
63 . वेदविद्या निदर्शन पृ. १३२–१३३(उद्धृतम् भुवनकोशविमर्शः पृ. – 105)
64. ब्रह्माण्डपुराणम् १.२१– २५–२७ (तत्रैव)
65 . सि.शि.गो.मध्यमगति वासना, श्लो.१ (तत्रैव)
66 . उद्धृतम् अर्वाचीनं ज्योतिर्विज्ञानम्, पृष्ठ 49

आवहश्च भूवायुरस्माकमाधुनिकशब्दावल्यां वायुमण्डलम्।[66] भूमेरुपरि प्रथममार्ग: 'आवह:' इति नामकवायोर्वर्त्तते परन्तु महाभारतस्यानुसारं भूमेरुपरि प्रथममावरणं प्रवहवायोस्तथा च द्वितीय-मावरणमावहवायोरस्ति।[67] अयङ्क्रम: ज्योतिषशास्त्रे नोपलभ्यते। ज्योतिषशास्त्रे तु प्रथममावह द्वितीयञ्च प्रवह:। अन्ये सर्वेऽवशिष्टावरणा: सर्वत्र समानरूपेण दृश्यन्ते। आवहवायु: धूमजा नाम ऊष्मजानामभ्रसंघातानां मेघानां प्रेरकोऽस्ति। अस्मिन् आवहवायुसंस्थाने विद्युद्गुणविहीना: निर्घोषा:(मूका:) जीमूतमेघा: निवसन्ति।[68] भास्कराचार्यानुसारेणास्य वायो: क्षेत्रम्भूमेरुपरि द्वादशयोजनपर्यन्तमस्ति।[69] अस्मिन् भूवायौ सहजमेघानाञ्चपलाया इन्द्रधनुष: गन्धर्वनगरादीनाञ्च स्थितिर्भवति। आवहवायुविषये आचार्यश्रीपतिमहोदयानां विचारा अत्रोपस्थाप्यन्ते-

**निर्घातोल्काघनसुरधनुर्विद्युदन्त: कुवायो:।**
**सन्दृश्यन्ते खनगरपरीवेषपूर्वं तथान्यत्।।[70]**

**2. प्रवह:**

भूवायुमण्डलोपरि द्वितीय: प्रवहवायुमण्डलोऽस्ति। प्रसङ्गेऽस्मिन् भास्कराचार्यैरुक्तं यथा-

**तदूर्ध्वगो य: प्रवह: स नित्यं प्रत्यग्गतिस्तस्य तु मध्यसंस्था।।**
**नक्षत्रकक्षाखचरै: समेतो यस्मादस्तेन समाहतोऽयम्।**
**भपञ्जर: खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन।।[71]**

अस्य वायोर्गतिरेकरूपा स्थिरात्मिका पश्चिमाभिमुखी मध्यमा गतिरस्ति। अस्य वायो: प्रभावेन सूर्यादीनाङ्ग्रहै: सह क्रान्तिवृत्तस्थानि प्रसिद्धानि सप्तविंशतिनक्षत्राणि भ्रममाणानि दृश्यन्ते परन्तु नक्षत्राणाङ्गतिर्नैव भवति अतस्तेषां संज्ञा नक्षत्रम्। अस्मिन् भचक्रे ग्रहा: प्रवहवायो: प्रभावेण प्रत्यङ्मुखं गच्छन्तो प्रतिक्षणं विलक्षणप्रकारेण पूर्वाभिमुखं गमनं कुर्वन्तीति दृश्यन्ते। ग्रहाणां पूर्वाभिमुखीगतिविषये भास्करोक्तम्मतम् -

**यान्तो भचक्रे लघुपूर्वगत्या खेटास्तु तस्या: परशीघ्रगत्या।**
**कुलालचक्राभ्रमिवामगत्या यान्तो न कीटा इव भान्ति यान्त:।।[72]**

---

67 . अम्बरे स्नेहमभ्येत्य विद्युद्भ्यश्च महाद्युति:।
आवहो नामसंवाति द्वितीय: श्वसनो नदन्।। महा.शान्ति.-328.37(उद्धृतम् भुवनकोशविमर्श: पृ. - 106)

68. वेद विद्या निदर्शन. पृ.325 (तत्रैव)

69. भूमेर्बहिद्वादशयोजनानि भूवायुरत्राम्बुदविद्युदम्। तत्रैव

70. तत्रैव भुवनकोशविमर्शे

71. तत्रैव पृ.109

72. सि.शि. गो.म.ग.वा.श्लो.४(उद्धृतं भुवनकोशविमर्श: पृ. 109)

प्रसंगेऽस्मिन् श्रीपतिमहोदयैरपि सिद्धान्तशेखरे वर्णनं कृतम्।[73] पृथिवीस्थघृततैलादिपदार्थानां स्नेहकारणमस्यवायोः प्रभावेणास्ति। प्रवहाभ्रयोः मिश्रणस्य विचित्रोऽयं परिणामः दृश्यते।[74]

**3. उद्वहः**

प्रवहवायोरुपरि 'उद्वह' वायोः मार्गोऽस्ति। अयं वायुः जीमूतमेघानां जलमाप्यायति।

प्रसंगेऽस्मिन् महाभारते उक्तम्-

**उदयं ज्योतिषां शश्वत् सोमादीनां करोति यः।**
**अन्तर्देहेषु चोदानं यं वदन्ति मनीषिणः॥**

**यश्चतुर्भ्यः समुद्रेभ्यो वायुर्धारयते जलम्।**
**उद्धृत्याददते चापोजीमूतेभ्योऽम्बरेऽनिलः॥**

**योऽद्भिः संयोज्यजीमूतान् पर्जन्याय प्रयच्छति।**

**उद्वहो नाम बर्हिष्ठस्तृतीयः सः सदागतिः॥**[75]

**4.संवहः**

उद्वहः वायोरुपरि संवहवायोः मार्गोऽस्ति। अयं वायुः देवानां विमानवहनं करोतीति।

यथा महाभारते-

**समूह्यमाना बहुधा येन नीताः पृथग्घनाः।**
**वर्षमोक्षकृतारम्भास्ते भवन्ति घनाघनाः॥**

**संहता येन चाविद्धाभवन्ति नदतां नदाः।**
**रक्षणार्थाय सम्भूता मेघत्वमुपयान्ति च॥**

---

73. नौस्थोऽनुलोमगमनादलचलं यथा च चामन्यते चलति नैवमिलाभ्रमेण।
लङ्कासमापरगतिप्रचलद्भचक्रमा भाति सुस्थिरमपीति वदन्ति केचित्।।
यद्येवमम्बरचरा विहगाः स्वनीड मासादयन्ति न खलु भ्रमणे धरित्र्याः।
किञ्चाम्बुदा अपि न भूरिपयोमुचः स्युर्देशस्य पूर्वगमनेन चिराय हन्तः।।
भूगोल वेगजनितेन समीरणेन केत्वादयोऽप्यपरदिग्गतयः सदा स्युः।
प्रासादभूधरशिरांस्यपि सम्पतन्ति तस्माद् भ्रमत्युडुगणस्वचलाऽचलैव।।
तत्रैव 15.15-17 (उद्धृतं भुवनकोशविमर्शः पृ. 110)

74. उद्धृतं भुवनकोशविमर्शः पृ. 110 ( वेद विद्या निदर्शन, पृ.325)

75. उद्धृतं भुवनकोशविमर्शः पृ. 110 (महाभारत शा.प.-328.38-40)

**येऽसौ वहति भूतानां विमानानि विहायसा।**
**चतुर्थः संवहो नाम वायुः सगिरिमर्दनः।।**[76]

**5.विवहः**

अस्य वायोः मार्ग संवहवायोरुपरि वर्तते। अयं वायुः नभसि मेघान् स्तनयित्नुमानं करोति स्तनयित्नुं प्रेरयति वा। महाभारतेऽस्मिन् प्रसङ्गे लिखितम् -

**येन वेगवता रुग्वा रूपेण रुवता नगान्।**
**वायुना सहिता मेघास्ते भवन्ति बलाहकाः।।**

**दारुणोत्पातसंचारो नभसः स्तनयित्नुमान्।**
**पञ्चमः स महावेगो विवहो नाम मारुतः।।**[77]

**6.परिवहः**

परिवहवायोः स्थानं विवहस्योपर्यस्ति। अस्मिन् वायौ आपः दिव्याश्चञ्चलाश्च तिष्ठन्ति।

**यस्मिन् परिप्लवा दिव्या वहन्त्यापो विहायसा।**
**पुण्यं चाकाशगङ्गायास्तोयं विष्टभ्य तिष्ठति।।**

**दूरात् प्रतिहतो यस्मिन्नैकरश्मिर्दिवाकरः।**
**योनिरंशुसहस्रस्य येन भाति वसुन्धरा।।**

**यस्मादाप्यायते सोमो निधिर्दिव्योऽमृतस्य च।**
**षष्ठः परिवहो नाम स वायुर्जायतां वरः।।**[78]

**7.परावहः**

परिवहवायोरुपरि परावहवायोः स्थानम्। अस्य वायोः क्षेत्रं द्युलोकपर्यन्तं विद्यते। ऋग्वेदस्याग्निमरुत्सूक्तौ अपि अस्य चर्चा वर्तते। स्कन्धभाष्येऽपि उक्तं महर्षिभिः यद्ये आदित्यस्योपरि दीप्तेः दिवि एकदेशे स्थाने सप्तमे वायुस्कन्धे देवा अधिवसन्ति तैर्मरुद्भिः। परावहवायोः प्रसङ्गे महाभारते निम्नाङ्कितं वर्णनं प्राप्यते -

---

76. उद्धृतं भुवनकोशविमर्शः पृ. 110 (महाभारत शा.प.-328.41-43)
77. महाभारत शान्तिपर्व -328.44-45
78. तत्रैव (म.भा.शा.प.-328.46.48)

**सर्वप्राणभूतां प्राणान् योऽन्तकाले निरस्यति।**
**यस्य वर्त्मानुवर्तेते मृत्युवैवस्वतावुभौ।।**

**सम्यगन्वीक्षतां बुद्ध्या शान्तयाध्यात्मनित्यया।**
**ध्यानाभ्यासाभिरामाणां योऽमृतत्वाय कल्पते।।**[79]

**यं समासाद्य वेगेन विशोऽन्तं प्रतिपेदिरे।**
**दक्षस्य दशपुत्राणां सहस्राणि प्रजापतेः।।**[80]

**येन स्पृष्टः पराभूतो यात्येव न निवर्तते।**
**परावहो नाम परो वायुः स दुरतिक्रमः।।**[81]

**वायोर्गतिर्दिशश्च -**

वायुगर्भप्रसवकालयोः सूर्यचन्द्रकुजादीनां ग्रहाणां ज्योति-नक्षत्रयोः मेलनेनोत्पादकनाम्नः वायुः प्रभवति प्रकटयति वा।[82] अस्मिन् सन्दर्भे वायोः दिगनुसारेण उत्पादकवायोः किं फलम् इत्यस्य विवरणं निम्नसारण्यनुसारेण वर्तते।[83]

| **क्र.सं.** | **वायोःदिशा** | **वृष्टिफलम्** | **वैशिष्ट्यम्** |
|---|---|---|---|
| 01. | पूर्वा | शीघ्रवृष्टिः | दक्षिणस्यां दिशि वृष्टिः। |
| 02. | आग्नेयनी | वृष्टिनाशः | अशुभः युद्धाग्निभम्। |
| 03. | दक्षिणा | अल्पवृष्टिः | पश्चिमस्यां दिशि वृष्टिः। |
| 04. | नैर्ऋत्या | अवृष्टिः | रोगः, दुर्भिक्षः, युद्ध-भयम्। |
| 05. | पश्चिमा | विलम्बेन वृष्टिः | उत्तरस्यां दिशि वृष्टिः। |
| 06. | वायव्या | वायुना सह वृष्टिः | मशकादिकीटोत्पन्नाः भवन्ति। |
| 07. | उत्तरा | शीघ्रवृष्टिः | पूर्वस्यां दिशि वृष्टिः। |
| 08. | ईशानी | सुवृष्टिः | सर्वदा शुभम्। |

---

79. ये नाकस्याधिरोचने दिवि देवास आसते। मरुद्भिन्न आगहि। (उद्धृतं भुवनकोशविमर्शः , पृ. 112)
80. वेदविद्या निदर्शन पृ. 325 (उद्धृतं भु.को.विमर्शः पृ.112)
81. म.भा.शान्तिपर्वः 328.49-52 (उद्धृतं भु.कोशविमर्शः,पृ.112)
82. सूर्यचन्द्रकुजादीनां ज्योतिर्भिर्भैश्च योगतः।
भवेदुत्पातको वायुर्गर्भप्रसवकालयोः।। तत्रैव 3.8
83. उद्धृतम् भारतीय वृष्टिविज्ञान परिशीलन, पृ.97

**स्थापकवायो ऋत्वनुसारं फलम्**[84] -

| क्र.सं. | ऋतुनम | वायु-दिक् | फलम् |
|---|---|---|---|
| 01. | हेमन्तः | दक्षिणा | शुभम् |
| 02. | शिशिरः | नैर्ऋति | शुभम् |
| 03. | वसन्तः | पश्चिमा उत्तरा | शुभम्फलपुष्पनष्टाः |
| 04. | शरत् | पश्चिमा पूर्वा | शुभम्फलपुष्पनष्टाः |

एवमेव ज्ञापक-वायोः दिगनुसारेण फलमस्ति।[85] यथा -

| क्र.सं. | वायोः दिशा | फलम् |
|---|---|---|
| 01. | पूर्वा | धान्यवृद्धिः |
| 02. | आग्नेयी | अग्निभयम् |
| 03. | दक्षिणा | अल्पवृष्टिः |
| 04. | नैर्ऋति | मध्यम-वृष्टिः |
| 05. | पश्चिमा | उत्तमा-वृष्टिः |
| 06. | वायव्या | वायुना सह प्रचुर-वृष्टिः |
| 07. | उत्तरा | उत्तमा-वृष्टिः पुष्टिश्च |
| 08. | ईशानी | शुभ-वृष्टिः |

एवमेव घाघ-भड्डरीपुराणे आषाढीपूर्णिमायां संध्यासमये वायोः परीक्षणमनुसृत्य वायु-प्रवाहानुसारेण संवत्सरस्यः वृष्ट्यानुमानं भवति। यथोद्धृतं भारतीयवृष्टिविज्ञानपरिशीलनग्रन्थे[86] -

| क्र.सं. | वायोः दिशा | फलम् |
|---|---|---|
| 01. | नैर्ऋति | दुर्भिक्षम्। |

84. उद्धृतम् भारतीय वृष्टि विज्ञान परिशीलन , पृ. 98
85. तत्रैव
86. आषाढी पूनो को सांझ। वायु देखिए नभ के मांझ।।
    नैऋत्य भई बूँद ना परै। राज परजा भूखौं मरै।
    अगिन कोन जो बहै समीरा। पडै काल दुःख सहै सरीरा।।
    उत्तर से जल फूहौं परै। भूस साँप दोनों अवतरैं।।
    पश्चिम समै नीक जायो। आगे परै तुषार प्रमान्यो।।
    जो कहुँ बहै इसाना कोना। उपजै विस्वा दो दो दोना।।
    जो कहुँ हवा अकासै जाय। परै न बूँद काल परिजाय।।
    दक्खिन पश्चिम आधौ समयौ। भडुर जोसी ऐसौ भन्यौ।। उद्धृतं भारतीय वृष्टिविज्ञान परिशीलन,पृ.101

| | | |
|---|---|---|
| 02. | आग्नेयी | शारीरिक-कष्टम्ः, दुःखम्। |
| 03. | उत्तरा | सामान्य-प्रचुरवृष्टिः, सर्प-मूषकानां वृद्धिः। |
| 04. | पश्चिमा | समयेन उत्तमावृष्टिः, हिम-तुषारपाताम्। |
| 05. | ईशानी | अल्पन्नोत्पत्तिः। |
| 06. | नैर्ऋत्यति | अर्धधान्यम्। |

आषाढपूर्णिमायामवसरे वायोः परीक्षणानुसारेण फलं निम्नमस्ति[87]

| **क्र.सं.** | **वायोः प्रवाहदिशा** | **फलम्** |
|---|---|---|
| 01. | पूर्वा | सर्वधान्यमारोग्यताप्रदायिका। |
| 02. | आग्नेयः | दुर्भिक्षम्। |
| 03. | दक्षिणा | जलाभाव-अवृष्टिः। |
| 04. | नैर्ऋत्यः | दुर्भिक्षम्। |
| 05. | पश्चिमा | सर्वधान्या-वृष्टिप्रदायिका। |
| 06. | वायव्य | नकुल-शलभ-मूषकानाञ्च भयं धन-धान्यप्रदायिका च। |
| 07. | उत्तरा | सुभिक्षम्। |
| 08. | सर्वदिशा | अग्निदहनम्, महर्घः |

बृहत्संहिताग्रन्थे तु वर्तते यत् वृष्टिगर्भाः दिवस-रात्रि-पक्ष-संध्यादीनां विपर्ययेण वर्षन्ति तथैव वृष्टिगर्भाणां वर्षणे दिग्विपर्ययो वायुविपर्ययाश्चापि भवतः। पूर्वस्यां दिशि धृताः वृष्टिगर्भाः पश्चिमायां, तथा च पश्चिमायां दिशि धृताः वृष्टिगर्भाश्च पूर्वस्यां दिशि वर्षन्ति। एवमेव अन्यासु दिक्ष्वपि धृताः वृष्टिगर्भाः दिग्विपर्ययेण वर्षन्ति। अत्र विशेषरूपेणा ध्यातव्य मस्ति यद् वृष्टिगर्भाणां वर्षणे यथा दिग्विपर्ययो भवति तथैव वायुविपर्ययो अपि भवति। तद्यथा पूर्ववायौ धृता वृष्टिगर्भाः पश्चिमवायौ वर्षन्ति। इत्थमेवेतरदिग्गामिषु वायुष्वपि ज्ञेयम्। यथा दक्षिणा उत्तरास्यां, उत्तरा दक्षिणस्याम्। आग्नेया वायव्यां वायव्या आग्नेय्याम्। ऐशानीसम्भूता नैर्ऋत्याम्, नैर्ऋत्यां सम्भूता ऐशान्यामिति।[88]

---

87. उद्धृतं भारतीय वृ.वि.परिशीलन,पृ.101
88. पूर्वोद्भूताः पश्चादपरोत्थाः प्रग्भवन्ति जीमूताः।

# पिण्डसाधनं गृहमेलापकविचारश्च

**गणेशदत्तचतुर्वेदी**

गृहस्य निर्माणं गृहस्वाम्यर्थं सुखकरम् आयुकरं स्वास्थ्यकरञ्च भवेदिति विचारणाय विदुषां मते पिण्डानयनं महत्त्वपूर्णमस्ति। यथा आकाशे देवानां निवासः कल्प्यते तथैव भूमौ जीवानां वासनात् वास्तु कथ्यते। दिग्देशादिविभागेन वास्तुनः अनेके भेदाः सन्ति। अखण्डभूमेरेकः खण्डः पिण्डशब्देनोच्यते। जीवानां श्रेणीभेदेन पिण्डोऽपि विविधः। सर्वे जीवाः सुखपूर्वकं जीवननिर्वाहं पिण्डोपरि कुर्वन्ति। अतः पिण्डसाधनं अवश्यमेव करणीयम्। यथा विवाहे वर-वधूमेलापकविचारः सुखपूर्वकदाम्पत्यजीवनयापनहेतु अनिवार्य अस्ति तथैव गृहेऽपि सुख-समृद्धि-स्वास्थ्यविचारणाय गृहस्वामी गृहपिण्डयोर्मध्ये नक्षत्रगणनानुसारेण शुभाशुभत्वं ज्ञात्वा गृहस्य निर्माणं कर्तव्यम्। विवाहे भिन्ननाडी शुभा परन्तु वास्तुनिर्माणे अशुभप्रदा भवति। तत्र गृहस्वाम्यर्थं यन्नक्षत्रं शुभदं तस्य इष्टनक्षत्ररूपे चयनं कृत्वा अपि च विषमायेषु स्ववर्णाद्यनुसारेण आयचयनं कृत्वा इष्टनक्षत्रायानुसारेण गृहपिण्डनिर्धारणं भवति यथा–

इष्टनक्षत्रसंख्यातः एकमूनीकृत्य पुनः 152 संख्यया गुणयेत्। इष्ट-आयादपि एकमूनीकृत्य-एकाशीति(81)संख्यया गुणयेत्। एतद् द्वयोः गुणनयोः सप्तदश (17)संख्यां योजयेत्। पुनः 216 संख्यया भागमाहरेत्। यदेव शिष्यते तदेव पिण्डमानं भवति।

पिण्डे दैर्घ्यसंख्यात् विभाजनेन या लब्धिः आगच्छति तत्पिण्डस्य विस्तारः। अनेन प्रकारेण विस्तारसंख्यया विभाजनेन या लब्धिः समायाति तद्दैर्घ्यं ज्ञेयम्। तत्र राशिकूटादिकं सर्वे दम्पत्योरिव चिन्तयेत्। यन्नक्षत्रं व्यवहारनाम्ना विवाहोक्तमेलापकविधिना शुभदं स्यात्तदेव स्वेष्टर्क्षं परिकल्प्यम्। अथ ध्वजाष्टायेषु विषम-आय एव वेष्टायः कल्प्यः। ताभ्याम् आयनक्षत्राभ्यां पिण्डस्य ज्ञानं कार्यम्।[1] एकनाडीविषये वास्तुरत्नावल्यामुल्लेखं वर्तते–

**प्रभुपण्याङ्गनामित्रं देशग्रामपुरं गृहम्।**
**एकनाडीस्थितं भव्यं विरुद्धं वेधवर्णितम्॥**[2]

**अत्रोदाहरणम्** - नागराजस्य अनुराधानक्षत्रस्य रोहिण्या सह मेलापकः सम्भवतीति। इष्टभं रोहिणी कल्पितम्। विषमायः सिंहः (तृतीयः)।

---

1 वा. र. व. पृ. 88,89

2 तत्रैव पृ. 88

इष्टनक्षत्रसंख्या 4-1 = 3×152 = 456

आय (सिंह:) 3-1=2×81 = 162

456+162=618+17=635÷216 शेषम् 203

शेषम् 203 इदमेव गृहस्य क्षेत्रफलं

अथ कल्पित दैर्घ्यम् = 29

अनेन भक्तः 207÷29=7 लब्धिः

लब्धि 7 अस्य पिण्डस्य विस्तारः

अथ कल्पितविस्तृतिः 7

अनेन विभाजनेन 207÷7 = लब्धि 29 = दैर्घ्यश्च

चन्द्रविद्धं पिण्डं शुभं भवति परन्तु सूर्यविद्धं पिण्डं शुभं नास्ति। यथा -

**पूर्वपश्चिमतो दैर्घ्यं सपादं दक्षिणोत्तरम्।**
**शुभावहं चन्द्रविद्धं सूर्यविद्धं न शोभनम्।।**[4]

**आयसाधनम्**

**विस्तरेण हतं दैर्घ्यं विभजेदष्टभिस्ततः।**
**यच्छेषं स भवेदायो ध्वजाद्यास्तेस्युरष्टधा।।**
**ध्वजो धूम्रो हरिश्वागौ खरेभौ वायसोऽष्टमः।**
**पूर्वादिदिक्षु चाष्टानां ध्वजादीनामवस्थितिः।।**[5]

एतेषां फलानि -

भूविस्तारेण तद्दैर्घ्यं गुणयित्वा अष्टभिर्भजनेन यच्छेषं तद् ध्वजादिक्रमेण आयः भवन्ति। यथा-एकशेषे ध्वजः, द्विशेषे धूम्रः, त्रिशेषे सिंहः, चतुश्शेषे श्वानः, पञ्चशेषे गौः, षटशेषे गर्दभः, सप्तशेषे हस्ती, अष्टशेषे वायसः (काकः) आयः भवति। केषाञ्चिन्मते काकस्थाने उष्ट्रः आयाः भवति।

---

3 वा. र. क. 5/5

4 वा. र. क. 5/4

5 वृ. वा मा. आयाद्यानयनम् पृ. 50 श्लो. 3-4

**कीर्तिः शोको जयो वैरं धनं निर्धनतासुखम्।**
**रोगश्चेति गृहारम्भे ध्वजादीनां फलं क्रमात्॥[6]**

ध्वजाये कीर्तिः धूमाये शोकः सिंहाये जयः, श्वानाये वैरं गवाये धनं, खराये धनाभावः, हस्त्याये सुखं काकाये रोगञ्चेति फलं ज्ञेयम्।

| **संख्या** | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 |
|---|---|---|---|---|---|---|---|---|
| **आय-नामानि** | ध्वजः | धूमः | सिंहः | श्वानः | गो | खरः | गजः | काकः |
| **फलानि** | कीर्तिः | शोकः | जयः | वैरः | धनः | निर्धनता | सुखम् | रोगः |
| **वा फलानि** | बहुधनम् | भ्रमः | लक्ष्मीः | कलहः | धन-धान्यम् | स्त्रीनाशः | पुत्रलाभः | शून्यता |
| **दिशा** | पूर्वा | आग्नेया | दक्षिणा | नैर्ऋत्या | पश्चिमा | वायव्या | उत्तरा | ईशानी |

अन्योऽपि -

**ध्वजे बहुधनं प्रोक्तं धूम्रे चैव भ्रमं भवेत्।**
**सिंहे च विरला लक्ष्मीः श्वाने च कलहं भवेत्॥**

**धनधान्यं वृषे चैव खरेषु स्त्रीविनाशनम्।**
**गजाख्ये पुत्रलाभश्च ध्वांक्षे सर्वत्र शून्यता॥[7]**

ध्वजाये धनलाभः, धूम्रे भ्रमः, सिंहे लक्ष्मीः, श्वाने कलहः, वृषे धनधान्यलाभः, खरे स्त्रीविनाशः, गजे पुत्रलाभः, काके अशुभफलञ्च भवति।

**स्वस्वस्थाने ध्वजः श्रेष्ठो गजः सिंहस्तथावृषः।**
**ध्वजः सर्वगतो देयो वृषं नान्यत्र दापयेत्॥**

**वृष-सिंह-गजाश्चैव दुष्टकर्पटकोटयोः।**
**द्वीपः पुनः प्रयोक्तव्योः वापी-कूप-सरःसु च॥**

**मृगेन्द्रमासनेव दद्याच्छयनेषु पुनर्गजः।**
**वृष भोजनपात्रेषु छत्रादिषु पुनर्ध्वजम्॥**

**अग्निवेश्मसु सर्वेषु गृहे वह्नयुपजीविनाम्।**

6 वृ. वा मा. आयाद्यानयनम् श्लो. 5
7 वृहद्वास्तुमाला पृ. 60 श्लो. 12-13

**धूमं नियोजयेत् केच्च्छिवानं म्लेच्छादिजातिषु॥**

**खरो वेश्यागृहे शस्तो ध्वाङ्क्षः शेषकुटीषु च।**
**वृषंसिंहगजाश्चापि प्रासादपुरवेश्मसु॥**[8]

स्वस्वस्थानेषु यद्यपि सर्वे आयाः शुभाः भवन्ति तथापि ध्वज-गज-सिंह-वृषायाः विशेषेण शुभाः सन्ति। ध्वजाय सर्वत्र शस्तः। वृषः स्वस्थानादन्यत्र न देयः। वृषसिंहगजायाः पुटकर्पटकोटेषु देयाः। गजायाः वापीकूपतडागेषु देयः। अग्निसम्बन्धिकार्येषु गृहेषु अग्निजीविकानां च धूम्रः आयः श्रेष्ठः। म्लेच्छादीनां धूमायः वेश्मानां खरायः कुट्यादिषु काकायः प्रासाद गोगृहेषु वृषसिंहगजायः श्रेष्ठो भवति।

**वसिष्ठमते आयविचारः**

**गजाये वा ध्वजाये वा गजानां सदनं शुभम्।**
**अश्वालये ध्वजाये च खराये वृषभेऽपि वा॥**

**उष्ट्राणां मन्दिरं कार्यं गजाये वा वृषे ध्वजे।**
**पशुसद्म वृषाये च ध्वजाये व शुभप्रदम्॥**

**शय्यासु वृषभः शस्तः पीठे सिंहः शुभप्रदः।**
**अन्यत्र छत्रवस्त्राणां वृषाये वा ध्वजेऽपि वा॥**

**पादुकोपानहौ कार्यौ सिंहाख्येप्यथवा ध्वजे।**
**उक्तानामप्यनुक्तानां मन्दिराणां ध्वजः शुभः॥**[9]

**च्यवनमते आयविचारः**

**महानसेऽग्निशालायां गृहे वाग्न्युपजीविनाम्।**
**धूम्रं दद्यात्तथा श्वानं यवनान्त्यजयोर्गृहे॥**

**खरो वेश्यागृहे योज्यो ध्वांक्षः पक्षिपतेर्गृहे।**
**वृषं सिंहं गजं दद्यात्प्रासादे पुरमन्दिरे॥**

**वस्त्रेषु धर्मशालायां कुम्भस्तम्भे ध्वजे ध्वजः।**
**गोगजौ भूगृहे देयो साधारणतृणौकसि॥**

---

8 वृहद्वास्तुमाला 14-18

9 वृहद्वास्तुमाला पृ. 61 श्लो. 19-22

**मन्त्रे शस्त्रे रथे सिंहो भाण्डागारे शुभो गजः।**
**धान्याम्बुस्थानगोश्वेभशालायां वृषभः शुभः।।**[10]

अन्यच्च –

**ब्राह्मणस्य ध्वजं दद्यात्सिहं दद्यातु क्षत्रिये।**
**वैश्यस्य च वृषं दद्याद्गजं शूद्रे सदर्पयेत्।।**

**चर्मकारगृहे धूम्रः श्वानोऽपि रजकस्य च।**
**खरश्चैव तथा वेश्या ध्वांक्षे चान्यत्र जातिषु।।**[11]

**आयानां स्वरूपाणि**

काकायः शिल्पिनां तापसानाञ्च गृहे शुभः। अस्यायस्य मुखं काकसदृशो भवति। धूमायस्य मुखं बिडालसदृशः, सिंहस्य मनुष्यसदृशः, शेषाणां स्वनामरूपं मुखं भवति। सर्वेषां चरणाः पक्षिणाम् इव, कण्ठाः सिंहमिव हस्ताश्च मनुष्यस्य इव भवन्ति। पूर्वादिक्रमेण आयाः बलिनो भवन्ति। एतद्दिशाभिमुखमेव एतन्मुखमपि भवति। अतः गृहमुखमपि एतन्मुखानुसारमेव कार्यम्।[12]

**विशेषः –**

**सिंहायः सर्वथा त्याज्यो ब्राह्मणेन वृषेप्सुना।**
**सिंहाये चण्डता गेहे स्वल्पापत्यश्च जायते।।**

**ध्वजाये पूर्णसिद्धिः स्याद् वृषायः पशुवृद्धिदः।**
**गजाये सम्पदां सिद्धिः शेषायाः शोकदुःखदाः।।**[13]

**ब्राह्मणादिजातिपरत्वेन ग्राह्यायाः**

**अग्रजानां ध्वजायः स्याद् ध्वजकुञ्जरगोमृगाः।**
**क्षत्रस्य ध्वजसिंहेभा वैश्यस्य शुभदाः स्मृताः।।**

**ध्वजो मृगादिः शूद्राणां सर्वेषां वृषभः शुभः।**
**हीनजातेः समाः देयाः सूक्ष्मकृत्येऽङ्गुलात्मकः।।**[14]

---

10 तत्रैव पृ. 62 श्लो. 23-26
11 उद्धृतं वास्तुसारः पृ. 110 श्लो. 56
12 वृहद्वास्तुमाला पृ. 59 श्लो. 6
13 वास्तुरत्नाकर अ. 5 श्लो. 25-26
14 वृहद्वास्तुमाला पृ. 59 श्लो. 7-8

ब्राह्मणानां ध्वजाय:, क्षत्रियाणां ध्वजकुञ्जरगोमृगा:, वैश्यानां ध्वजसिंहगजा:, शूद्राणां ध्वज: मृगश्चेति आयै शुभफलदै: भवति:। प्राय: गौ-आय: सर्वशुभद: निम्नजातीनां समसंख्याका: आया: (धूम-श्वान-खर-ध्वाङ्क्षा:) शुभा: भवन्ति। अत: सूक्ष्मकृत्ये पिण्डग्रहणं कृत्वा आय: साधनीय:।

**राशिपरत्वेन आयविचार:**

कर्कवृश्चिकमीनराशीनां ध्वजाय:, मेषसिंहधनुराशीनां वृषाय:, वृषकन्यामकरराशीनां सिंहाय:, मिथुनतुलाकुम्भराशीनां गजाय: शुभदो भवति।[15]

**रामदैवज्ञमते आयाद्यानयनम्**

**पिण्डे नवाङ्काङ्गगजाग्निनागनागाब्धिनागैर्गुणिते क्रमेण।**
**विभाजिते नागनगाङ्कसूर्यनागर्क्षतिथ्यर्क्षखभानुभिश्च॥**

**आयो वारोंऽशको द्रव्यमृणमृक्षं तिथिर्युति:।**
**आयुश्चाथ गृहेशर्क्षं गृहभैक्यं मृतिप्रदम्॥**[16]

पिण्डसाधनं कृत्वा गृहपिण्डं नवस्थानेषु निर्दिष्टक्रमेण 9-9-6-8-3-8-8-4-8 निवेश्य एतान् अङ्कान् पृथक्-पृथक् गुणयित्वा गुणनफले 8-7-9-12-8-27-15-27-120 अङ्कै: विभाजनेन यदवशिष्यते तत् क्रमश: आय-वार-अंश-द्रव्य-ऋण-नक्षत्र-तिथि-योग-आयूंषि भवन्ति।

| क्र.सं. | गृहपिण्डं | गुणक: | गुणनफल: | भाजक: | लब्धि: | शेषम् | संज्ञा: |
|---|---|---|---|---|---|---|---|
| 1. | 203 | 9 | 1827 | 8 | 228 | 3 | आय: |
| 2. | 203 | 9 | 1827 | 7 | 261 | 0 | वार: |
| 3. | 203 | 6 | 1218 | 9 | 135 | 3 | अंश: |
| 4. | 203 | 8 | 1624 | 12 | 135 | 4 | द्रव्य: |
| 5. | 203 | 3 | 609 | 8 | 67 | 2 | ऋणम् |
| 6. | 203 | 8 | 1624 | 27 | 60 | 4 | नक्षत्रम् |
| 7. | 203 | 8 | 1624 | 15 | 108 | 4 | तिथि: |
| 8. | 203 | 4 | 812 | 27 | 32 | 18 | योग: |
| 9. | 203 | 8 | 1624 | 120 | 13 | 64 | आयु: |

15 वृहद्वास्तुमाला पृ. 59 श्लो. 9-10

16 वृहद्वास्तुमाला पृ. 57 श्लो. 1-2

**तिथिवारलग्नानयनम्**

> **आयर्क्षताराव्ययमंशकञ्च एकत्रकृत्वा विभजेत्क्रमेण।**
> **तिथ्या च वारेण तथैव लग्नैः शेषेषु तान्येव भवेयुरङ्के॥**[17]

आय-नक्षत्र-तारा-व्यय, अंशादिभिः सर्वैः योजयित्वा क्रमशः 15, 17, 12, एभिः विभजनेन शेषानुसारेण क्रमश्सः तिथि-वार-लग्नानि भवन्ति।

**उदाहरणम् -**

परिकल्प्यते यथा आयः 7, नक्षत्र (स्वाती) 15, तारा-मनोहरा सम्पत् (2) व्यय 7, अंशः 9 एतेषां संयोजनेन 7 + 15 + 2 + 7 + 9 = 40

15 संख्याभिः विभजनेन

40 ÷ 15 = लब्धिः 2 शेषम् 10 = तिथिः

40 ÷ 7 = लब्धिः 5 शेषम् 5 = वार (बृहस्पतिवारः)

40 ÷ 12 = लब्धिः 3 शेषम् 4 = लग्नम् (कर्कः)

**कुत्रायादिकं न चिन्तनीयम् -**

> **द्वात्रिंशाधिकहस्तमब्धिवदनं तार्णं त्वलिन्दादिकम्।**
> **नैष्वायादिभीरितं तृणगृहं नान्येषु गेहेष्विदम्॥**[18]

द्वात्रिंशत् (32) हस्तमानादधिकविस्तारे गृहे चतुर्द्वारे, तृणगृहे, अलिन्दे च आयादिविचारः न करणीयः। एवमेव-

> **अलिन्दनिर्व्यूहविनिर्गमाद्याश्चतुर्दिशं ये गृहभूषणाय।**
> **आयादिकं तेषु न चिन्तनीयं यतो न ते वास्तुपरिग्रहे स्युः॥**[19]

**अन्यच्च**

> **यत्र दैर्घ्यं गृहादीनां द्वात्रिंशद्धस्ततोऽधिकम्।**
> **न तत्र चिन्तयेद् विद्वान् गुणानायव्ययादिकम्॥**[20]

द्वात्रिंशदधिकविस्तारे गृहे विद्वद्भिः आयादिविचारो न कार्यः।

---

17 उद्धृतं वास्तुसारः पृ. 112 श्लो. 64

18 बृहद्वास्तुमाला पृ. 67 श्लो. 12

19 उद्धृतं वास्तुसारः पृ. 113 श्लो. 66

20 बृहद्वास्तुमाला पृ. 67 श्लो. 13

**वसिष्ठेनोक्तम् -**

**एकादशयवादूर्ध्वं द्वात्रिंशद्धस्तकावधिः।**
**तावादायादिकं चिन्त्यं तदूर्ध्वं नैव चिन्तयेत्॥**[21]

**तृणादिगेहेषु शिलान्यासनिषेधः**

**आयव्ययौ च भूशुद्धिं तृणगेहे न चिन्तयेत्।**
**शिलान्यासादि नो कुर्यात् तथागारे पुरातने॥**[22]

आयः, व्ययः, भूशुद्धिः, तृणगेहे न चिन्तयेत्। प्राचीनगृहे जीर्णोद्धारसमये तृणगृहे शिलान्यासः न करणीय।

**पिण्डद्वारा वाराद्यानयनम्**

**ग्रहैर्विगुण्य भवनस्य पिण्डं विभाजितं पर्वतभिर्मुनीन्द्रैः।**
**शेषं भवेच्चात्र रवीन्दुभौमाः बुधो गुरुर्भार्गवसूर्यनन्दनौ॥**[23]

इष्टपिण्डं नवभिगुणनेन सप्तभिः विभाजनेन एकशेषे - सूर्यः, द्विशेषे चन्द्रः, त्रिशेषे भौमः, चतुशेषे बुधः, पञ्चशेषे गुरोः, षष्ठशेषे शुक्रः, सप्तशेषे शनेः दिनानि भवन्ति)।

**एतेषां फलम्**

सूर्यभौमवारयोः-राशि-अंशाः सदा अग्निभयदाः। शेष ग्रहाणां वाराः राशयः अंशाश्च गृहस्वामिनः शुभाः मङ्गलकारिणश्च भवति[24]।

**अंशानयनम्-**

**गृहपिण्डं रसैर्गुण्यं ग्रहैश्चापि विभाजितम्।**
**यच्छेषं तद्भवेदंशास्तस्यैशाश्चापि कीर्तितः॥**

**अर्कश्चन्द्रः कुजो राहुर्जीविमन्दज्ञकेतवः।**
**भृगुपुत्रक्रमेणैव अंशाधीशाः प्रकीर्तिताः॥**[25]

**पिण्डाद् द्रव्यानयनप्रकारः**

**पिण्डाष्टगुणितं चात्र सूर्यसंख्या विभाजितम्।**
**अवशिष्टं भवेद्द्रव्यं तत्तन्नामाऽब्रवीदिदम्॥**

21 बृहद्वास्तुमाला पृ. 67 श्लो. 14
22 वास्तुसारसंग्रह अष्टमसोपानं श्लो. 43
23 वा. सा. सं. नवमसोपानम् श्लो. 1
24 तत्रैव श्लो. 2
25 वा. सा. सं. नवमसोपानम् श्लो. 3,4

**वस्त्राणि शस्त्राणि च पुस्तकानि।**
**द्रव्याणि धान्यानि वसुन्धरा च॥**
**कुटुम्ब-विद्या-पशु वाटिकाश्च।**
**भाण्डानि भूषाश्च धनानि सूर्याः॥**[26]

गृहपिण्डम् अष्टभिः गुणयित्वा गुणनफले द्वादशभिः भाजयित्वा यच्छेषं तं निम्नप्रकारेण द्रव्यं जानीयात्। एकशेषे वस्त्रम्, द्विशेषे शस्त्रम्, त्रिशेषे पुस्तकम्, चतुश्शेषे द्रव्यं (मुद्रां), पञ्चशेषे धान्यम्, षट्शेषे वसुन्धरा, सप्तशेषे कुटुम्बं, अष्टशेषे विद्या: नवशेषे पशवः, दशशेषे वाटिका, एकादशशेषे भाण्डभूषणं, द्वादशशेषे धनं जानीयात्।

**ऋणानयनप्रकारः**

**इहाग्निगुणितं पिण्डं वसुभिश्चैव भाजितम्।**
**अवशिष्टमृणं संज्ञं तस्येशाः कथिताः पुराः॥**[27]

गृहपिण्डं त्रिभिः गुणयित्वा अष्टभिः भाजिते यदवशिष्यते तद् ऋणं भवति। क्रमेण विंशोत्तरीदशेशाः स्वामिनः भवन्ति। परन्तु अत्र केतुग्रहस्य गणना न भवति।

**नक्षत्रानयनप्रकारः**

**गृहपिण्डं गजैर्हत्वा सप्तविंशतिभिर्भजेत्।**
**यच्छेषं तद्भवेदृक्षम् अश्वादिक्रमतो बुधैः॥**[28]

## तारानयनम्

**गणेयत् स्वामी नक्षत्राद्यावदृक्षं गृहस्य च।**
**नवभिस्तु हरेद्भागं शेषास्ताराः प्रकीर्तिताः॥**
**शान्ता मनोहरा क्रूरा विजया च कलहोद्भवा।**
**पद्मिनि राक्षसी वीरा आनन्दा नवमी स्मृता॥**[29]

गृहपतिनामतः गृहनक्षत्रपर्यन्तं गणानया पाप्त संख्ययां नवभिः भक्तेन यदवशिष्यते तत् तारा बोध्यम्। क्रमेण 1. शान्ता 2. मनोहरा 3. क्रूरा 4. विजया 5. कलहोद्भवा 6. पद्मिनी 7. राक्षसी 8. वीरा एव 9. आनन्दी। तृतीय-पञ्चम सप्तमताराः अशुभाः। जन्म-सम्पत्-विपर्-क्षेम- प्रत्यरि-साध ना-वध-मैत्र-अतिमित्रः-भवन्ति।

---

26 बृहद्वास्तुमाला पृ. 68 श्लो. 18,19
27 वास्तुसारसंग्रहः नवमसोपानम्, श्लो. 7
28 वास्तुसारसंग्रहः नवमसोपानम्, श्लो. 33
29 वास्तुमण्डनम् तारानयनम्, पृ. 100 श्लो. 47-48

**तत्राफलानि तु–**

> **विपत्प्रदा विपत्तारा प्रत्यरिः प्रतिकूलदा।**
> **निधनाख्यतारका वापि सर्वथा निधनप्रदा।।**

**कश्यपमते निषिद्धतारा:**

> **दत्ते दुःखं तृतीयक्षं पञ्चमर्क्ष यशः क्षयम्।**
> **आयुः क्षयं सप्तमक्षं कर्तृभाद्गृहभावधि।।**[30]

एषु तृतीयविपत्तारया विपत्तिः प्रत्यरितारया शत्रुता निधनतारया मृत्युः प्राप्यते। अतः तृतीय-पञ्चम-सप्तमतारा न शुभा। तृतीयतारा विपत्ति दुःखदा, पञ्चमा तारा प्रत्यरि च यशविनाशिनी तथा सप्तमा निधना तारा आयुषः क्षयकारिणी भवति।

**वसिष्ठस्तु -**

**'गृहस्य स्वामिनश्चैव नक्षत्रैक्यं निधनप्रदम्।'** गृहस्वामिनो गृहस्य एकैव नक्षत्रं चेत् गृहस्वामिनो मृत्युर्भवति।

> **अन्योऽपि - गृहगृहेशयोर्भैक्यं मृतिः स्यान्नियमेन तु।**[31]
> **मेलपकादौ नामराशिप्रधानत्वम्**
> **देशग्रामगृहज्वरव्यवहृतिषु दाने मनौ।**
> **सेवाकाकिणिवर्गसङ्गरपुनर्भूमेलके नामभम्।।**[32]

अर्थात् देशग्रामगृहज्वरव्यवहारदानमन्त्रसेवाकाकिणीवर्गशुद्धिसंग्रामपुनर्विवाहेषु नामराशिद्वारा एव विचारः कार्यः।

**गृहमेलनादौ राशिज्ञाने विशेषः**

> **अश्विन्यादित्रयं मेषे सिंहे प्रोक्तं मघात्रयम्।**
> **मूलादित्रितयं चापि शेषभेषु द्वयं द्वयम्।।**[33]

अश्विन्यादित्रयं मेषराशौ, मघादित्रयं सिंहराशौ, मूलादित्रयं धनुराशौ, शेषराशयः नक्षत्रद्वययुक्ताः भवन्ति। इदमपि मेलनं विवाहवत् कार्यम्।

---

30 वास्तुसारसंग्रहः नवमसोपानम्, श्लो. 34

31 वास्तुसारः पृ. 119 श्लो. 90

32 बृहद्वास्तुमाला गणनाविचारः श्लो. 1

33 तत्रैव श्लो. 2

**ग्रहनक्षत्रविचारः**

> **त्रिभिस्त्रिभिर्वेश्मनि कृतिकाद्यैरुद्वेगपुत्राप्तिधनाप्तिशोकम्।**
> **शत्रेर्भयं राजभयं च मृत्युः सुखं प्रवासश्च नवप्रभेदाः॥**[34]

**स्पष्टार्थं चक्रम्**

| | |
|---|---|
| **गृहनक्षत्राणि** | कृति. रोहि. मृग. आर्द्रा पुन. पुष्य आश्ले. मघा पू. फा. उ. फा. हस्त चित्रा स्वाती विशाखा अनुराधा ज्येष्ठा मूल पू. षा. उ. षा. श्रवणा घनिष्ठा शत. पू. भा. उ. भा. रे. अ. भ. |
| **फलानि** | उद्वेगः पुत्र प्राप्तिः धन प्राप्तिः शोकः शत्रु भयम् राज भयम् मृत्युः सुखम् प्रवासः |

**रामदैवज्ञमते योनिविचारः**

> **अश्विन्यम्बुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः।**
> **सिंहो वस्वजयाद्भयोस्समुदितो याम्यान्त्ययोः कुञ्जरः॥**
>
> **मेषो देवपुरहिताऽनलभयोः कर्णाम्बुनोर्वानरः।**
> **स्याद्वैश्वाभिजितोस्तथैव नकुलश्चान्द्राब्जयोऽन्योरहिः॥**
>
> **ज्येष्ठामैत्रभयोः कुरङ्ग उदितो मूलार्द्रयोः श्वा तथा।**
> **मार्जारोऽदितिसार्पयोरथ मघायोन्योस्तथैवोन्दुरुः।**
> **व्याघ्रो द्वीशभचित्रयोरपि च गौरर्यम्णबुधन्यर्क्षयो-**
> **योनिः पादगयोः परस्परमहावैरं भयोऽन्त्यस्त्यजेत्॥**[35]

अर्थात् नक्षत्रयोनयः-अश्विनीशतभिषानक्षत्रयोः अश्वः, स्वातीहस्तनक्षत्रयोः महिषः, धनिष्ठापूर्वाभाद्रपदयोः सिंहः, भरणीरेवत्योः गजः, पुष्यकृतिकयोः मेषः, श्रवणपूर्वाषाढयोः वानरः, उत्तराषाढाभिजितो नकुलः, मृगशिरारोहिण्योः सर्पः, ज्येष्ठानुराधयोः हरिणः, मूलाद्रयोः श्वानः, पुनर्वस्वाश्लेषयोः विडालः, मघापूर्वफाल्गुन्योः मूषकः, विशाखाचित्रयोः व्याघ्रः, उत्तराफाल्गुन्युत्तरभाद्रपदयोः गौः योनिः। पूर्वपश्चात् योनयोर्मध्ये महावैरं भवति। अतः सर्वथा त्याज्यं करणीयम्।

---

34 बृहद्वास्तुमाला गणनाविचारः पृ. 63 श्लो. 3

35 वृ. वा. मा. पृ. 64 श्लो. 4-5

**नाडीविचारः**

**सेव्यसेवकयोश्चैव गृहतत्स्वामिनोरपि।**
**परस्परं मित्रयोश्च एकनाडी प्रशस्यते।।**[36]

**अन्यच्च -**

**प्रभुः पण्यङ्गना मित्रं देशं ग्रामं पुरं गृहम्।**
**नाडीविद्धं मतं श्रेष्ठं न शुभं वेधवर्जितम्।।**[37]

स्वामी-क्रीतस्त्री-मित्र-देश-ग्राम-पुर-गृहादिषु नाडी विचार्यते। एका नाडी शुभा विपरीता अशुभम्।

**एकनाडी स्थिता यत्र गुरुमन्त्राश्च देवताः।**
**तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत्।।**[38]

यदि गुरुः, मन्त्रः तथा देवता एतेषां त्रयाणां एकनाडी प्रवर्तते तदा क्रमशः द्वेषः रागः मृत्युश्च फलं भवति।

**आवृत्तिर्भिर्भैस्त्रिभिरश्विभाद्यं क्रमोत्क्रमात् सङ्गणयेदुडूनि।**
**यदेकपर्वण्युभयोश्च हर्म्यहर्म्ये शयोर्भेऽति शुभं तदा स्यात्।।**[39]

उक्तनाडीविचारः- गृहनक्षत्रानुसारं गृहस्वामिनक्षत्रानुसारं च क्रियते। गृह-गृहस्वामिनो आदिमध्यान्त्येषु क्वचित् एका नाडी भवति तदा शुभा। नाडीविचारे नक्षत्रक्रमः सर्पाकारो भवति चक्रेण स्पष्टं भवति।

**नाडीचक्रम्-**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| **आदि** | अश्वि. | आर्द्रा | पुन. | उ. फा. | हस्त | ज्ये. | मूल | शत | पू. फा. |
| **मध्य** | भरणी | मृग | पुष्य | पू. फा. | चित्रा | अनु. | पू. षा. | धनि. | उ. भा. |
| **अन्त्य** | कृतिका | रो. | आश्लेषा | मघा | स्वाती | विशाखा | उ. षा. | श्रवण | रेवती |

**यथा क्षीरार्णवे -**

---

36 वास्तुमण्डनम् द्वितीयोऽध्यायः श्लो. 72
37 वास्तुमण्डनम् द्वितीयोऽध्यायः श्लो. 70
38 वास्तुमण्डनम् द्वितीयोऽध्यायः श्लो. 71
39 वृ. वा. मा. पृ. 66 श्लो. 8

**त्रयोनाड्यात्मकं चक्रं सर्पाकारस्वरूपकम्।**
**नवभागाङ्कितं कुर्यादश्विन्यादित्रिकं लिखेत्।।**

**एकनाडीस्थितं तस्मिन् भं चेद् वरकन्ययोः।**
**तेन मरणं विजानियादंशतश्चेत् स्थिरं त्यजेत्।।**

**स्वामीसेवकमित्राणां गृहाणां गृहस्वामिनाम्।**
**राज्ञस्तथा पौराणां च नाडीवेधः सुखावहः।।**[40]

अनेन प्रकारेण सर्वप्रथमं पिण्डानमनं विधाय तस्माद्गृहमेलापकं विचिन्त्य गृहनिर्माणं कार्यम्। तर्हि गृहनिर्माणे सति गृहं सुखायुष्यवृद्धिप्रदायकञ्च भवतीति।

40 क्षीरार्णव 1/31-33

# वास्तुशास्त्रदृष्ट्या नगरस्य भेदाः

**नीतू कुमारी**

नगरं मानवस्य सभ्यतायाः अत्यन्तं महत्त्वपूर्णमङ्गमस्ति। नगरयोजनायाः परिकल्पना अस्माकं भारतदेशे प्राचीनकालादेव दरीदृश्यते। एतस्याः नगरयोजनायाः वर्णनं वास्तुशास्त्रीयग्रन्थेषु प्रचुरतया प्राप्यते। कस्यापि नगरस्य ग्रामस्य गृहस्य तडागस्य वा निर्माणात् पूर्वमेका योजना परमावश्यकी भवति। वस्तुतो वास्तुशब्दस्य मर्म एषा एव योजना वर्तते। श्रीमद्भागवतमहापुराणानुसारन्तु सर्वप्रथमं पृथुः स्वधनुष्कोट्या पर्वतानुत्पाट्य पृथिवीं समतलीकृत्य सम्यक्प्रकारेण सुव्यवस्थितावासस्य परिकल्पनां प्रस्तुतवान्। तदनन्तरं पृथोरभिलाषानुसारं विश्वकर्मादयः पुराणां, ग्रामाणां, नगराणाञ्च समुचितव्यवस्थामकुर्वन्।[1]

**नगरस्याभिप्रायः**

नगरेण मानवस्य विविधाः आवश्यकताः परिपूरिताः भवन्ति। पुरस्य नगरस्य च विषये विद्वत्सु मतभेदाः सन्ति। एतदनुसारं यत्र अनेकानां ग्रामाणां व्यवहारस्थानानि भवन्ति तानि पुराणि तथा च पुरसमूहानां यत्र **विचारालयाः** वर्तन्ते तानि नगराणि कथ्यन्ते।[2] स्थापत्यशास्त्राणां कोशग्रन्थानाञ्चानुसारेण पुरेण अर्थात् नगरेणाभिप्रायः मनुष्याणां विशालनिवासस्थानादस्ति (बस्ती) यत् ग्रामतः कस्बा इत्यस्माद्वा विशालो भवेत्, यत्र विविधानां कार्याणां कृते मनुष्याणामावागमनं भवेत्। यस्मिन् चानेकानां वर्णानां जनाः निवसन्ति।[3] नगराय पत्तनं, पुरी, स्थानीयं, पुटभेदनं, निगमं, पट्टनं, नगरी चेति शब्दाः प्राप्यन्ते।[4]

**नगरस्य भेदाः**

प्राचीनकालाद् आधुनिककालपर्यन्तं पुरविकासस्य विविधानि रूपाणि दृश्यन्ते। वैदिककाले पुरं दुर्गरूपेण प्राप्तं भवति परमुत्तरवैदिककाले एतानि दुर्गाणि नगररूपेषु विकसितानि जातानि।

1. निवासान् कल्पयाञ्चक्रे तत्र तत्र यथार्हतः।
   ग्रामान् पुरः पत्तनादि दुर्गाणि विविधानि च।।
   घोषान् व्रजान् सशिविरान्नगरान् खेटखर्वटान्।
   प्राक् पृथोरिह नैवेषा पुरग्रामादिकल्पना।। श्रीमद्भागवतपुराणम्, 4/18/29-32
2. हिन्दीविश्वकोशः, भागः 11, पृ. 336
3. तत्रैव, भाग 1, पृ. 336
4. संस्कृतहिन्दीकोशः, पृ. 662, हिन्दीशब्दसागरः, पृ. 2517, हिन्दीविश्वकोशः, पृ. 336, 637 हिन्दीपर्यायवाचीकोशः, पृ. 311

स्थापत्यशास्त्राणामनुसारेण पुरनिवेशे पत्तन-पुटभेदन-निगम-स्थानीय-राजधानी-खेट-खर्वट-ग्राम-दुर्गादीनां विस्तृतानि क्षेत्राणि समाहितानि वर्तन्ते। पुरस्य नगरस्य वा भेदाः अत्र मानानुसारेण सन्निवेशाधारेण च स्पष्टाः क्रियन्ते।

**(1) विस्तारदृष्ट्या नगरस्य भेदाः** - विविधेषु वास्तुशास्त्रीयग्रन्थेषु विस्तारदृष्ट्या नगरस्य अनेके भेदाः प्राप्यन्ते। भोजाचार्येण समराङ्गणसूत्रधारग्रन्थे विस्ताराधारेण नगरस्य मुख्यरूपेण त्रयो भेदाः स्वीकृताः।[5] ज्येष्ठनगरस्य परिमाणं चापव्यासमानेन 4000 मध्यमनगरस्य मानं 2000 चापव्यासमापेन तथा च कनिष्ठनगरस्य मानं 1000 स्वीकृतम्।[6] विस्तारप्रमाणेन नगराणामुत्तमादिभेदाः वास्तुरत्नावल्यामपि वर्णिताः सन्ति।[7]

तत्र मनुष्यालयचन्द्रिकाग्रन्थेऽपि मानानुसारेण नगरस्य व्याख्या प्राप्यते।[8] तत्र त्रयाणां नगराणां मध्ये कनिष्ठनगरं 1000 हस्ततः 1125 हस्तपर्यन्तं ततः मध्यमनगरं 1500 प्रमाणतः 1625 हस्तपर्यन्तं वर्तते। ज्येष्ठमर्थात् उत्तमनगरं 2000 प्रमाणतः 2125 हस्तपर्यन्तं भवति। अपराजितपृच्छायामपि नगरस्य अधम-मध्यम-ज्येष्ठञ्चेति त्रयो भेदाः प्रदर्शिताः सन्ति।[9] इत्थं सर्वेषु वास्तुग्रन्थेषु त्रयाणां नगराणां विस्तारमानं अधोलिखितरूपेण ज्ञातुं शक्यते। यथा हि -

ज्येष्ठपुरम् - 4000तः 8500 चापव्यासमितम्
मध्यमपुरम् - 2000तः 4500 चापव्यासमितम्
कनिष्ठपुरम् - 1000तः 2500 चापव्यासमितम्

**(2) सन्निवेशदृष्ट्या नगरस्य भेदाः** - स्थापत्यशास्त्रानुसारं सन्निवेशाधारे नगरस्यान्तर्गतानि राजधानी-पत्तन-पुटभेदन-स्थानीय-निगम-खेट-खर्वटादीनि क्षेत्राणि सम्मिलितानि भवन्ति। 'नगर' शब्दः अत्र विभिन्नकोटीनां यथा-शाखानगर-राजधानीनगर-ग्रामनगर-पल्लीनगराणाञ्च बोधं कारयति। समराङ्गणसूत्रधारग्रन्थे राजधानीवर्गीयनगरस्य तथा च शाखानगरस्य रूपे पत्तन-पुटभेदन-निगमं, खेटं-

---

5. पुरस्य त्रिविधस्यापि .......। समराङ्गणसूत्रधारः, अध्यायः 10.1
6. ज्येष्ठं तत्र चतुश्चापसहस्रं पुरमिष्यते
   मध्यं द्वाभ्यां सहस्रीभ्यामेकेन व्यासतोऽधमम्।
   साष्टमांशं सपादं वा सार्धं वा व्यासमायतम्
   कुर्यादेकैकमायामं चतुरस्त्रीकृतं शुभम्।। तत्रैव, अध्यायः 10.2-3
7. वक्ष्येऽथो विविधं पुरं मुनिमतं मध्योत्तमं कन्वसं
   तेषां हस्तसहस्रमन्तिमपुरं मध्यं ततः सार्धकम्।
   ज्येष्ठं युग्मसहस्रमेषु चरमं भागाष्टकेनान्वितं मध्यं
   द्वादशभागतः शशिकलं ज्येष्ठं विदध्यात्सुधीः।। वास्तुरत्नावली, श्लो. 192
8. नगरस्य सहस्रादि द्विसहस्रान्तं च दण्डमानं स्यात्। मनुष्यालयचन्द्रिका, अध्यायः 3.17
9. सहस्रैरधमं हस्तैर्मध्यं सार्धसहस्रकैः।
   द्विसहस्रैर्भवेज्ज्येष्ठं त्रिविधं हस्तसङ्ख्यया।। अपराजितपृच्छा, अध्यायः 70.3

खर्वट-ग्राम-पल्ली-पल्लिका-गोष्ठ-गोष्ठकमित्यादीनां क्रमशः उल्लेखो मिलति।[10] विश्वकर्माचार्येण विश्वकर्मवास्तुशास्त्रे सप्तविधनगरलक्षणानि प्रतिपादितानि।[11] ग्रन्थेऽस्मिन् निगमः, स्कन्धावरः, द्रोणकः, कुब्जकः, पट्टनः, शिविरः, वाहिनीमुखञ्चेति सप्तनगरभेदाः नृपसेवनयोग्याः कथिताः। एतदतिरिक्तमत्र विंशति (20) नगराणामपि वर्णनं प्राप्यते।[12] राजवल्लभग्रन्थेऽपि विंशतिप्रकाराणां नगराणां विधानमस्ति परं तत्र केचन नामभेदाः प्रवर्तन्ते।[13] मानसारे[14] मयमते[15] च नगरभेदान्तर्गतं राजधानी-नगर-पुर-नगरी-खेट-खर्वटादयः कथिताः। सन्निवेशाधारेण पुरस्य कतिपयेषु प्रमुखेषु प्रभेदेषु स्थापत्यशास्त्रदृष्ट्या विचारः परमावश्यको वर्तते। अतः अधुना नगरभेदाः वर्ण्यन्ते–

* **नगरम्** – 'नग इव प्रासादाः सन्त्यत्र'[16] इति व्युत्पत्त्यनुसारेण यत्र भवनानां भित्तिः छदिश्च विशेषतः पाषाणैः पक्वेष्टिकाभिः वा निर्मितौ भवेतां तन्नगरमिति कथयितुं शक्यते। वास्तुशास्त्रीयग्रन्थेषु नगरस्य परिभाषा भिन्न-भिन्नप्रकारेण कथिता अस्ति। मयमतग्रन्थे नगरस्य परिभाषा यद् यस्मिन् नगरे चतसृषु दिक्षु चतुर्द्वारं, द्वारस्योपरि शालायुक्तं गोपुरं, क्रय-विक्रयार्थं स्थानं (आपणं), सर्ववर्गाणां जनानां निवासः, नानादेवानां प्रासादाश्च विनिर्मिताः भवन्ति तन्नगरमिति शब्देन सम्बोध्यते।[17] मानसारग्रन्थानुसारं एतस्य नगरस्य चतुर्दिक् गोपुरसंयुक्तानि चत्वारि द्वाराणि तथा च सुरक्षादृष्ट्या सैन्यविन्यासो भवति। स्थानेऽस्मिन् वाणिज्य-कार्याणि तथा च देवालयाः भवन्ति।[18] अनेन प्रकारेण वास्तुशास्त्रस्य दृष्ट्या नगरस्य चतुर्दिक्षु पृथक्-पृथक् गोपुरैः परिवेष्टितानि द्वाराणि निर्मितव्यानि। अस्मिन् नगरे नागरिकानां निवासाय आवासीयभवनानि तथा च विविधानां प्रयोजनानां कृतेऽन्यानां भवनानां विन्यासः समुचितरूपेण करणीयः।[19]

प्राचीनार्वाचीनपरम्परायां नगरं वाणिज्यस्य व्यापारस्य च केन्द्रं स्वीक्रियते। इत्थं समस्तसुविधासम्पन्नं सुनियोजितावास युक्तं सूचनासञ्चारयोजनासमन्वितञ्च नगरं शिल्पिभ्यः, नगराकारस्वरूपेण द्योतयति।

* **पत्तनम्** – जलमार्गेण यातायातक्रमेण प्राप्तानां जनानां कृते सौविध्ययुतमावासीयव्यवस्था

---

10. समराङ्गणसूत्रधारः, 22.2-5
11. आद्यस्तु निगमः प्रोक्तस्कन्धावारो द्वितीयकः।
    द्रोणकस्तु तृतीय .... वाहिनीमुखः।। विश्वकर्मवास्तुशास्त्रम्, 8.38-39
12. तत्रैव, अध्यायः 9.1-4
13. राजवल्लभमण्डनम्, अध्यायः 4.4-5
14. मानसारः, अध्यायः 10.19-21
15. मयमतम्, अध्यायः 10
16. संस्कृतहिन्दीकोशः, पृ. 506
17. दिक्षु चतुर्द्वारयुतं गोपुरयुक्तं तु शालाद्वयम्।
    क्रयविक्रय ......... केवलं प्रोक्तम्।। मयमतम्, अध्यायः 10.20-21
18. मानसारः, अध्यायः 10.24-26
19. पुरमिति नरवरभवनप्रधानमाहुर्वणिगजनादियुतम्।
    नगरं राजवरालयसकलजनागारमण्डितं विदितम्।। मनुष्यायलयचन्द्रिका, अध्यायः 3.18

पत्तनमिति। प्राचीनग्रन्थेषु पत्तनशब्दस्य प्रयोगः 'समुद्रीबन्दरगाहः' इत्यस्यार्थे मिलति। जैनसाहित्ये एतस्य कृते जलपट्टनमपि विलिखितमस्ति अर्थात् यस्मिन् नगरे विदेशीयवस्तूनामायातः भवति तथा च स्वदेशीयवस्तूनां निर्यातः क्रियते।[20] अमरकोशानुसारं पत्तनस्य व्याख्या पतन्त्यत्र पत्तनं कुर्वन् तादृशं केन्द्रं मन्यते यत्र चतुर्दिग्भ्यो वस्तूनि आनयन्ति।[21] अनेन प्रकारेण सुस्पष्टं भवति यत् पत्तनमेकं बृहद् वाणिज्यबन्दरगाह इति अथवा समुद्रीबन्दरगाह इति वर्तते।[22] अर्थशास्त्रग्रन्थेऽपि पण्यपत्तनं प्रयोगः दृश्यते यत्तु वाचस्पतिगैरोलामहोदयानुसारं बृहद्विपण्यर्थे प्रयुक्तो भवति स्म।[23] समराङ्गणसूत्रधारे पत्तनं तूपस्थानं भवति। राजा यत्र तत् पत्तनं विदुः इति। वस्तुतः पत्तनं नृपाणामुपस्थानं भवति अर्थात् यत्र ग्रीष्मकालिकं शीतकालिकं वा राजपीठं भवेत्।[24] मनुष्यालयचन्द्रिकायां पत्तनशब्दस्य व्याख्या प्राप्यते।[25] मानसारानुसारेण समुद्रतीरस्योपरि नानाजातिगृहैः संयुक्तं स्थानं पत्तनं यस्मिन् प्रमुखरूपेण व्यापारीवर्गाः निवासं कुर्वन्ति। यत्र वस्तूनां सदैव क्रय-विक्रयो भवति तथा च विदेशाद् विक्रयार्थं एकत्रीकृतानि वस्तूनि रेशमपटानि कपूर्रकादीनि च भवेयुः तत्पत्तनशब्देन अभिहितम्।[26] अन्येषु वास्तुशास्त्रीयग्रन्थेष्वपि पत्तनस्य एतदेव लक्षणं समुपलभ्यते। मयाचार्येण अन्यदेशतः आयातवस्तुयुक्तं सर्वजनसमाहितञ्च पत्तनं कथितम्। नगरेऽस्मिन् क्रय-विक्रयादिवाणिज्यनिपुणमानवानाम् आधिक्यं भवति। अत्रैव रत्नक्षौमसुगन्ध द्रव्यादीनां प्राचुर्यं सम्प्राप्यते। इत्थं वक्तुं शक्यते यत् नगरस्यास्य सम्बन्धः सागरतटेन सह भवति।[27] विश्वकर्मवास्तुशास्त्रग्रन्थानुसारं पत्तननगरस्य वास्तुभूमिस्तु प्रायः समुद्रतटगता पर्वतासन्नभूमिगता वा स्यात्। स्थलेऽस्मिन् स्वादुतोयं सर्वथा सुलभग्राह्यं भवेत्। अस्मिन्नगरे द्वारस्थलं तत्तद्दिग्देशगतेन महामार्गेण युक्तं निर्मितव्यम्। नगरं परितः परिखास्थानं दत्वा वास्तुभूमिं द्वादशभागेषु विभज्य केन्द्रे प्रासादस्थानं प्रदीयते। तत्रैव वास्तुभूमेर्मध्ये अथवा वारुणीदिशायां नृपमन्दिरन्तु सपरिखं कर्तव्यम्। अन्यावशिष्टेषु एकादशभागेषु एकैकस्मिन्नपि भागे अष्टौ महावीथयः स्थाप्याः। नगरे महावीथीनां संख्या अष्टाशीति महावीथयः भवन्ति। अस्मिन्नेव स्थले उपवीथीं क्षुद्रवीथीञ्च सुन्नतस्थानानुकूलं च स्थापयेत्। पत्तननगरे सभामण्डपशालागोपुरादीनामन्वितं बहुदेवतायतनं कल्पनीयम्। नगरेऽस्मिन् च विद्यालयः, रङ्गशाला, काचित् चिकित्साशाला च स्थापनीया। अत्र वर्णानुसारेण आवासीयभवनानि प्रकल्पितानि भवन्ति।[28] इत्थं सकलजनसुखप्रदायकनगरं पत्तननगरमिति नाम्ना सुप्रसिद्धमस्ति। शिल्पग्रन्थरत्नेऽपि पूर्वोक्तं पत्तनं

---

20. सार्थवाहः, पृ. 163
21. अमरकोशः (सत्यदेवमिश्र सम्पादितम्), पृ. 126
22. पद्मचरिते प्रतिपादितं भारतीयसंस्कृतिः, पृ. 208
23. अर्थशास्त्रम्, पृ. 95
24. समराङ्गणसूत्रधारः, अध्यायः 18.5
25. पत्तनसञ्ज्ञं तद्वत् पोतान्वितवरि(नि)धितटोपेतम्। मनुष्यालयचन्द्रिका, अध्यायः 3.17
26. अब्धितीरे प्रदेशे तु नानाजातिगृहैर्वृतम्।
    वाणिग्जातिभि ...... समन्वितम्।। मानसारः, 10.32-33
27. द्विपान्तरागवस्तुभिरभियुक्तं सर्वजनसहितम्।
    क्रयविक्रयकैर्युक्तं रत्नधनक्षौमगन्धवस्त्वाढ्यम्।। मयमतम्, अध्यायः 10.28-29
28. पारावारतटे वापि भूधरोपत्यकातटे। स्वादुतोयस्थले वाऽपि पत्तनङ्कारयेद्बुधः।।
    महामार्गेण संयुक्तं सर्वतः परिखावृतम्। वीथ्यष्टकसमोपेत ..बहुसौख्यदम्।। विश्वकर्मवास्तुशास्त्रम्, 8.60-65

सागरानूपसंश्रितं सयान्त्रिकवणिग्जुष्टञ्च मन्यते।[29] एतेषु नगरेषु कावेरीपत्तनं मुसलीपत्तनमादिनगराणामुदाहरणं दातुं शक्यते।

* **द्रोणमुखम्** – द्रोणमुखनगरं समुद्रतीरस्योपरि सरित्सङ्गमे वा स्थितं भवति। नगरेऽस्मिन् व्यवसायिकजनानामावागमनं सर्वदा भवत्येव। अत्र जलमार्गेण स्थलमार्गेण च वस्तूनामायातः क्रियते।[30] अत एव एतस्य नगरस्य सम्बन्धः जलमार्गेण स्थलमार्गेण च सह भवति। वस्तुतः एतेन आपणकनगरस्य (Market Town) व्यापारिकनगरस्य च प्रतीतिः भवति। अर्थशास्त्रानुसारं द्रोणमुखनगरं चतुश्शतग्रामाणां मुख्यकेन्द्रमस्ति।[31] द्रोणमुखं खार्वाटिकानामपेक्षया विशालतमं भवति। विश्वकर्माचार्येण कथितमस्ति यद् द्रोणकनगरे भूपालेच्छानुसारं समुचितस्थले राजप्रासादस्थापनं करणीयम्। नगरेऽस्मिन् प्राच्यादिचतुर्दिक्षु गोपुरसहितं चतुर्द्वारं द्वारद्वयं वा कर्त्तव्यम्। नगरस्य मध्यभागे वारुणीदिशायां वा शिवप्रासादः स्थापनीयः। तत्र आराम–कुटीरादीनामपि निर्माणं भवेत्। द्रोणमुखनगरे अनेकाः वीथयः, मठ–मण्डपानि, वाप्यः, कूपाः, विविधजनानां कृते आवासस्थलानि कल्पनीयानि।[32] मानसारग्रन्थे द्रोणमुखनगरं समुद्रतटोपरि नद्याः दक्षिणोत्तरे वा वणिग्जनैः युक्तं भणितम्। अत्र नानावस्तूनां क्रय–विक्रयोऽपि स्वीक्रियते। एतस्मात् कारणात् नगरस्यास्य प्रत्येकं तटे ग्राहकाः दरीदृश्यन्ते।[33] मयमते नगरस्यास्य उल्लेखः नद्याः दक्षिणदिशायां उत्तरदिशायाञ्च अथवा समुद्रतटे वा प्राप्यते। नगरेऽस्मिन् वणिग्जनाः विशेषरूपेण निवसन्ति तथा च नानाजातीनां मानवानां निवासमपि अत्र भवति।[34]

अन्येषु ग्रन्थेषु नगरस्यास्य कृते 'द्रोणीमुखम्' इति शब्दप्रयोगः प्राप्यते। शिल्परत्ननामकग्रन्थानुसारं नगरस्यास्य स्थलं नद्याः समुद्रस्य च सङ्गमे स्वीक्रियते यतोहि नगरेऽस्मिन् व्योमविमानानामावागमनं सदैव भवति। एतत् वणिग्जनैः प्रतिदिनं समावृत्तं दृश्यते। अनेन प्रकारेण एतत् नगरं पत्तन (बन्दरगाह) एव कथयितुं शक्यते।[35] काले काले शस्त्रास्त्राणां सैन्यवाहनानां सञ्चालनाभ्यासकार्यार्थं स्थानान्तरेणागतानां सैन्ययूथावासव्यवस्था द्रोणमुखेऽभवत्। यत्र नवागतप्रविधीनामध्ययनानां प्रयोगः प्रचलितो भवति।

* **राजधानी** – प्रायः देशे राज्ये वा किमपि समुन्नतं विकासशीलनगरं राजधानीनगररूपेण ज्ञायते। नगरेऽस्मिन् सर्वाधिकः जनसन्निवेशो भवति। अस्य प्रमुखं कारणं राजधान्यां राजप्रासादस्य

29. शिल्परत्नम्, अध्यायः 5, पृ. 19
30. सार्थवाहः, पृ. 163
31. चतुश्शतग्राम्या द्रोणमुखम्। अर्थशास्त्रम्, अधिकरणम् 2, अध्यायः 1
32. द्रोणकस्तु महीपेतुस्सदनेन विराजितः।
    पूर्ववद्वप्रसंयुक्तो ........ राजसेवकैः।। विश्वकर्मवास्तुशास्त्रम्, 8.51-55
33. समुद्रा(द्र) तटिनीयुक्तं तटिन्या दक्षिणोत्तरे।
    वणिग्भिः सह ......... द्रोणान्तरमुद्राहृतम्।। मानसारः, 10.38-39
34. नद्यब्धिदक्षिणादक्षिणमाग्वणिगादिसंयुक्तम्।
    सर्वजनावासं यद् द्रोणमुखं प्रोक्तमाचार्यैः।। मयमतम्, अध्यायः 10.32-33
35. तदेवाब्धेश्च नद्याश्च सङ्गमागतपोतकम्।
    द्वीपान्तरवणिग्जुष्टं विदुर्द्रोणीमुखं बुधाः।। शिल्परत्नम्, अध्यायः 5, पृ. 19

शासनपीठस्य वा स्थानं भवति। स्थापत्यग्रन्थेषु प्राचीनग्रन्थेषु च राजधानीशब्दस्य प्रयोगः नृपस्य प्रधाननगरस्य कृते विहितः। भोजाचार्येण स्पष्टरूपेण कथितं यद् यस्मिन् नगरे भूपतिः निवासं करोति, तन्नगरं राजधानी स्वीक्रियते।[36] मयमतग्रन्थेऽपि राजधानीनगरस्य इयमेव परिभाषा वर्तते।[37] कविकुलगुरुः कालिदासः रघुवंशमहाकाव्ये इक्ष्वाकूणां राज्ञां राजधानीम् अयोध्यानगरीं समुक्तवान्।[38] एतेन प्रकारेण बिल्हणः अपि अयोध्यानगरं राजधानी कथितवान्।[39] इत्थं स्पष्टं भवति यत् प्राचीनकाले राजधान्याः सम्बन्धः प्रमुखरूपेण नृपेण सह भवितुमर्हति। अद्यत्वेऽपि एषैव परम्परा प्रचलिता दरीदृश्यते। मयाचार्यानुसारेण राजधान्याः नगरस्य स्थापना सज्जनबहुलराष्ट्रस्य मध्यभागे नद्याः पार्श्वे वा करणीया।[40] एतन्नगरं परितः परिखा प्राकारेण परिवेष्टितं भवति। नगरस्य सुरक्षादृष्ट्या नगरद्वारस्य पुरतः सैन्यशिविरस्य स्थापना अपि भवति। यत्र दुर्गरक्षकाणां प्रत्येकं दिशायां दृष्टिर्भवति नगरस्य बाह्याभ्यन्तरशत्रूणामाक्रमणं निरोधार्थं पूर्वाभिमुखं दक्षिणाभिमुखञ्च सैन्ययूथमवश्यमेव भवित स्म। नगरेऽस्मिन् बृहद्गोपुराणां निर्माणमासीत्। नगरे नानादेवमन्दिराणि, गणिकाः, उद्यानाश्च विद्यमानाः आसन्। अत्रैव राजप्रासादेन साकं गजाः, अश्वाः, रथाः, पदातिसैन्यबलाश्च नियुक्ताः भवन्ति स्म। सर्ववर्णानां कृते सुनिश्चितनिवासस्थानं नगरेऽस्मिन् कथितम्। नगरे पूर्वनिर्धारितं द्वारमेवमुपद्वारं निर्मितं भवति स्म।। तथा च सर्वजनावासानां स्थानं भवति।[41] मानसारग्रन्थस्य राजधानीनगरसम्बन्धितं लक्षणं मयमतस्य समानमेव दृश्यते। मानसारानुसारं राजधानीवर्गस्य नगरस्य सन्निवेशः राष्ट्रस्य मध्यभागे नद्याः तटप्रदेशे वा भवति। अत्र नगरकेन्द्रे राजभवनं विराजितं भवति। नगरेऽस्मिन् विभिन्नजनानामावासाः भवन्ति। भगवतः विष्णोः देवालयकारणात् राजधानीनगरमन्येषु नगरेषु पृथक् मन्यते स्म। नगरस्यास्य चतुर्दिक्षु चतुर्द्वारं गोपुरेण सह भवेत्। अत्रैव सर्वत्र आवागमनस्य कृते स्वतन्त्राः आपणकाः कथ्यन्ते। एतस्मिन् नगरे विविधानि भवनानि आपणैः सह भवन्ति स्म।[42] शुक्रनीतौ राजधान्याः नगरस्य लक्षणानां निरूपणं दृश्यते। राजधान्याः नगरस्य भूमेः आकृतिः अर्धचन्द्राकारं वृत्ताकारं समचतुरस्रायताकारं वा भवति स्म। राजधानीनगरं सुमनोहराप्राकारपरिखाभिः परिवेष्टितो भवति स्म। एतस्य नगरस्य आन्तरिकभागः नगरग्रामादीनां कृते अनुकूलमासीत् भवित स्म। नगरकेन्द्रे नृपप्रासादान्तर्गतं सभाभवनस्य सन्निवेशेन सह तडागवापीकूपादीनां निर्माणमपि आसीत्।

---

36. यत्रास्ते नगरे राजा राजधानीं तु तां विदुः। समराङ्गणसूत्रधारः, अध्यायः 18.2
37. या नृपवेश्मसमेता सा कथिता राजधानीति। मयमतम्, 10.25
38. अयोध्यामनुराजधानीम्। रघुवंशम्, 13.61
39. राजधानीमयोध्याम्। विक्रमादेवचरितम्, 18.94
40. राष्ट्रस्य मध्यभागे सज्जनबहुले नदीसमीपे च।
    नगरं केवलमथवा राजगृहोपेतराजधानी वा।। मयमतम्, 10.19
41. परितः परिखा बाह्ये शिबिरयुतानेकमुखरक्षा।
    पूर्वायां ................ अनेकजनवासा।। तत्रैव, 10.22-24
42. राष्ट्रमध्ये नदीतीरे बहुपुण्यजनावृतम्।।
    मध्ये राजयुतं चैव नगरं कृतमिष्यते।
    तत्रागते नगर्यन्तं यदि विष्णवालयं भवेत्।।
    राजधानीति ...... समावृतम्।। मानसारः 10.22-25

अस्य चतुर्दिक्षु प्रमुखानि चतुर्द्वाराणि भवन्ति। एतत् नगरं सुराजमार्गैः वाटिकाभिः सुदृढदेवालयैः मठैः पान्थशालादिभिश्च सुशोभितं भवति स्म।[43]

भारतीयस्थापत्यग्रन्थेषु राजधान्याः कृते येषां लक्षणानां प्रतिपादनमस्ति तानि सर्वाणि प्राचीनभारतस्यानेकेषु राजधानीनगरेषु दृष्टिगोचराणि भवन्ति। प्राचीनकाले पाटलिपुत्र[44]- कान्यकुब्ज[45]- हस्तिनापुर[46]- द्वारका[47]-मथुरा[48]दिषुनगरेषु प्राकार-परिखा-गोपुर-शिविर-बृहद्प्रासादादिभिः सह नगरस्यान्तभागे देवालयानां सरोवराणां वाटिकानां राजमार्गाणाञ्च स्थानानि निर्धारितानि आसन्।

* **पुटभेदनम्** - प्राचीनकाले बृहद्व्यापारिककेन्द्राणि पुटभेदननाम्ना ज्ञायन्ते स्म। नगरस्यास्य आकारः शंखवच्छोभते।[49] मिलिन्दपञ्होग्रन्थानुसारं शाकलनगरं पुटभेदनमासीत्।[50] वर्तमानकालस्य स्यालकोटः (पाकिस्ताने) शाकलनगरं वर्तते।[51] प्राचीनभारते व्यापारिककेन्द्राणां नामानि पुटभेदनं स्वीकृतम्।[52] तदा पाटलिपुत्रनगरमपि पुटभेदनमासीत्।[53] अमरसिंहानुसारेण बृहन्नगरस्य कृते पुटभेदनशब्दप्रयोगः प्रचलितः आसीत्।[54] पुटभेदनस्य व्याख्या अमरकोशेऽपि प्राप्यते।[55] कविः माघः स्वरचितग्रन्थे शिशुपालवधमहाकाव्ये इन्द्रप्रस्थनगरमपि पुटभेदनं स्वीकरोति।[56] वास्तुशास्त्रीय- ग्रन्थसमराङ्गणसूत्रधारे भोजाचार्येण पुटभेदनस्य परिभाषायां कथितं यदिदमत्यन्तं विस्तृतं नगरं वणिग्वर्गेण युक्तं भवति।[57] पुटभेदननगरस्य लक्षणानां प्रतिपादनं विश्वकर्मवास्तुशास्त्रग्रन्थेऽपि प्राप्यते।[58] अस्य ग्रन्थस्यानुसारेण पुटभेदननगरस्य भवति शङ्खाकृतिः भूमिः। तस्मिन् स्थले निम्नभागे विप्रवैश्य- शूद्रादीनामन्यजनावासानाञ्च निर्माणं भवति। नगरेऽस्मिन् उन्नतस्थाने देवालयस्य, राजप्रासादस्य, राजकीयव्यवहारस्य कृते बहूनां

---

43. अर्द्धचन्द्रां वत्तुलां वा चतुरश्रां सुशोभनाम्। सप्राकारां सपरिखां ग्रामादीनां निवेशिनाम्।।
सभामध्यां कूपवापीतडागादियुतां सदा। चतुर्दिक्षु चतुर्द्वारां सुमार्गारामवीथिकाम्।।
दृढसुरालयमठ पान्थशालाविराजिताम्। कल्पयित्वा वसेत् तत्र सुगुप्तः सप्रजो नृपः।। शुक्रनीतिः, 1.215-217
44. भारतीयवास्तुशास्त्रस्य इतिहासः, पृ. 224
45. प्राचीनभारते नगरं नगरजीवनञ्च, पृ. 69
46. महाभारतम्, आदिपर्वः, परिशिष्टः, 48.22
47. विष्णुपुराणम्, अध्यायः 23.14, हरिवंशपुराणम्, विष्णुपर्वः, अध्यायः 100.32
48. हरिवंशपुराणम्, हरिवंशपर्वः, अध्यायः 54.47-52
49. विश्वकर्मवास्तुशास्त्रम्, 9.134
50. मिलिन्दपञ्हो, पृ. 2
51. य्वान् च्वांगः, वाटर्सः, 2.337
52. गोपीनाथकविराजः अभिनन्दनग्रन्थः, पृ. 451
53. पाटलिपुत्तं पुटभेदनम्, दीर्घनिकायः 2, महापरिनिब्बानसुत्तम्, 152, पृ. 69
54. अमरकोशः, काण्डः 2, पृ. 116
55. पुटानि पात्राणि भिद्यन्तेऽत्र पुटभेदनम्, अमरकोशः (सत्यदेवमिश्र सम्पादितम्) पृ. 126
56. शिशुपालवधः 13.16
57. बहुस्फीतवणिग्युक्तं तदुक्तं पुटभेदनम्, समराङ्गणसूत्रधारः, 18.5
58. क्वचिच्छङ्खाकृतिर्भूमिर्विधाता निर्मिता पुरा।
नदीतीरगता वापि ........ शिल्पशास्त्रविशारदैः।। विश्वकर्मवास्तुशास्त्रम्, 9.134-141

शालादीनां स्थापना प्राप्यते।। इत्थं स्पष्टं भवति यत् पुटभेदननगरस्यान्तर्गतं व्यापारिकनगरं समाहितम् आसीदिति।

* **निगमः** - अस्माकं प्राचीनग्रन्थेषु निगमशब्दस्य प्रयोगः वेदानां, वैदिकग्रन्थानां नीतिशास्त्राणां, व्यापारिकसभानाञ्च कृते वर्तते। एतेन सह अस्य निगमस्य प्रयोगः नगरार्थमपि दरीदृश्यते। अमरकोशानुसारमेतत् निगममेकप्रकारस्य नगरमस्ति।[59] सार्थवाहग्रन्थस्यानुसारेण नगरेऽस्मिन् विशेषरूपेण क्रय-विक्रययोः कार्याणां सम्पादनं भवित स्म। अत एव स्पष्टं वर्तते यद् एतत् नगरं वणिक्जनानां नगरमासीत्।[60] विश्वकर्मवास्तुशास्त्रस्य मते निगमनगरं वनमध्ये गिरिपार्श्वे वा विद्यमानं भवित स्म। निगमसंज्ञकनगरं सदैव तोययुक्तनद्याः तटे समन्तात् पुररक्षकजनैः दुर्गप्राकारैश्च संरक्षितुं कथितम्। नगरस्यास्य प्राच्यादिचतुर्दिक्षु चतुर्द्वारेण सह महामार्ग-पीठ-गोपुरादीनाञ्च सन्निवेशो भवति। अस्मिन्नगरे प्राचीदिगारब्धाः प्रतीचीगामिन्यः प्रतोलिकास्तु चत्वारिंशत् प्रकीर्तिताः। अस्य नगरस्य मध्यभागे बृहद् उन्नतं राजभवनं स्थापनीयम्। भूपालमन्दिरेण सह तस्मिन् स्थले राजकार्याधिकारीणां, श्रमिकानां, शिल्पीजनानां, वणिजानाञ्च सुनिवासं कथितम्। न्यायालयादीनां रचनया सह तत्रैव नानावर्गीयजातीनां निवासो भवेत्। पश्चिमदिशायां देवालयः निर्मितव्यः।[61] भोजाचार्यानुसारेण गुणदृष्ट्या किञ्चित् कर्वटस्य न्यूनम् अर्थात् शाखानगरस्य कृते निगमशब्दस्य प्रयोगो भवति स्म।[62] मानसारग्रन्थेऽपि ब्राह्मणादिचतुर्वर्णानां विविधान्यजनानां शिल्पीनाञ्च परिपूर्णमावासं निगमरूपेण निरूपितमस्ति।[63] अनेन प्रकारेण मयमताचार्यः निगमं चतुर्वर्णानां युक्तमेवमन्यसर्वबहु- कर्मकारयुक्तं तथा च बहुसंख्यकशिल्पीनां युक्तं स्वीकरोति।[64] शिल्परत्नग्रन्थानुसारं स्पष्टं भवति यत् निगमनगरं वस्तुतः चतुर्वण्यजनैः शिल्पिभिः नानाकर्मजीविभिश्च संयुक्तं वर्तते। एतत् नगरं क्रय-विक्रयसंयुक्तं धन-धान्यादिभिः परिपूरितं च भवति।[65] एतस्मिन्नगरे विविधजनाः निवसन्ति परमत्र प्राधान्यं शिल्पीनामेव स्वीक्रियते। इत्थं कथयितुं शक्यते यत् वणिक्जनानां निवासार्थं प्राचीनेषु ग्रन्थेषु पृथक् पृथक् नगरं वर्णितमस्ति। जातकसाहित्यस्याध्ययनेन ज्ञायते यत् वाराणसीं निकषा एतादृश एकः बृहद् जनावासः स्थित ंआसीत् यस्मिन् एकसहस्र-

---

59. पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम्।
 स्थानीयं निगमः अन्यत्तु यन्मूलनगरात्।। अमरकोशः, काण्डः 2, पुरवर्गः 1
60. सार्थवाहः, पृ. 163
61. वनमध्यगतो वापि गिरिसानुगतोऽपि वा।
 सदातोयातीरभाग्वा ........ निगमो बुधैः।। विश्वकर्मवास्तुशास्त्रम्, 8.40-46
62. ऊनं कर्वटमेवेह गुणैर्निगम उच्यते। समराङ्गणसूत्रधारः, 18.3
63. द्विजातिचतुर्वर्णैर्वर्णान्तरजनैर्वृतम्।
 बहुकर्मकरैर्युक्तं निगमं तदुदाहृतम्।। मानसारः 10.42
64. मयमतम्, 10.34-35
65. चातुर्वर्ण्यैः कर्मकारैर्नानाकर्मोपजीविभिः।
 पण्यश्वधनधान्याद्यैर्युक्तं तु निगमं स्मृतम्।। शिल्परत्नम्, 5.33

तक्षकजना: वसन्ति स्म।[66] अस्य प्रकारस्य निवाससदनानामाविर्भाव: व्यवसायस्य केन्द्रीयकरणाय कदाचित् अभवत्। वास्तुशास्त्रीयग्रन्थानामनुसारेण निगमशब्दस्याभिप्राय: शिल्पीनां निवासस्थलेयोऽस्ति भवन्ति। एतदेव कालपरिवर्तनकारणात् नगररूपे परिणतं जातम्।[67]

* **स्थानीयम्** - कौटिल्याचार्यविरचितेऽर्थशास्त्रे स्थानीयशब्दस्यार्थ: अष्टादशग्रामाणां मध्ये स्थितं नगरं स्वीकृतम्।[68] अमरकोशेऽपि स्थानीयनगरमर्थशास्त्रवचनसदृशं मन्यते।[69] एतद् अष्टाशतग्रामाणां एतावत् बृहद् राजनैतिकं केन्द्रमासीत् यत्र त्रय: न्यायाधीशा: सम्पूर्णं न्यायिक कुर्वन्ति स्म।[70] मयमतानुसारेण एतत् नगरमपि नदीतीरे गिरिसमीपे वा प्राप्यते। ग्रन्थेऽस्मिन् नगरमिदं राजप्रासादयुक्तं बहुरक्षाबलसैन्ययुक्तञ्च राज्ञा स्थापितं भवति ।[71] मानसारग्रन्थेऽपि मयमतमनुसारं स्थानीयनगरस्य वर्णनमस्ति। एतेनानुसारेण स्थानीयनगरं नदीं गिरिं वा समया नृपेण स्थापितं क्रियते। यत्र राजभवनेन सह बहुसैन्यबलजना: निवसन्ति। अत एव अस्य नगरस्य निवासिन: जना: स्वयमत्यन्ता: सुरक्षिता: सुखिनश्च अनुभवन्ति।[72] शिल्परत्ने स्थानीयनगरस्य लक्षणानामुल्लेख उपर्युक्तवर्णनानुसारमेव प्राप्यते। अत्रापि नदीपार्श्वे गिरिपार्श्वे वा स्थानीयनगरस्य स्थिति: दृश्यते।[73] स्थानीयनगरविषये डॉ. शुक्लस्य विचार: उपयुक्त: प्रतीयते यत् प्राचीनकाले यदा आधुनिकसाधनानामभाव आसीत् तदा राजसत्ताया: राजव्यवस्थायाश्च समुचितसञ्चालनाय राजान: आवश्यकतानुसारेण स्व-स्वस्थानीयकं (Head Quarter) स्थापयन्ति स्म।[74] इत्थं स्पष्टं भवति यत् कालान्तरे एतस्य नगरस्य संज्ञा स्थानीयनगरम तदनन्तरं स्थानीयनगरेषु सुरक्षाहेतो: करग्रहणस्य च कृते नृपेणोच्चराज्याधिकारीणां निवासव्यवस्था सुनिश्चिता कृता।[75] आधुनिकभारते मण्डलायुक्तस्य च कृते स्थानीयशब्दस्य प्रयोगो भवति।[76] सन्दर्भेऽस्मिन् डॉ. महोदयेन शिल्परत्नग्रन्थे उल्लिखितं यत् **'राष्ट्रस्थान्तकपालाय'** शब्दाधारे स्थानीयशब्द: कालपरिवर्तनात् आरक्षकाणां स्थलं **'पोलीसचौकी'** इति अर्थे प्रयुक्तोऽभवत्।[77] स्थापत्यग्रन्थानामनुसारेण एतत् नगरं एकप्रकारस्य डिवीजनल-ऑफिसरमुख्यालय: (Muffasil Town) स्वीक्रियते। वस्तुत: एतत् नगरं

---

66. महावड्ढकिगामो। जातक:, 4.151
67. प्राचीनभारतीय: पुरनिवेश:, अध्याय: 4, पृ. 108
68. अष्टशतग्राम्या मध्ये स्थानीयम्, अर्थशास्त्रम्, अधिकरणम् 2, अध्याय: 1
69. तिष्ठन्त्यस्मिन्नित्यष्टशतग्राममध्ये स्थानीयम्, अमरकोश:, पृ. 74
70. स्थानीयेषु व्यावहारिकानर्थान् कुर्यु:। अर्थशास्त्रम्, अधिकरणम् 3, अध्याय: 1, पृ. 313
71. नद्यद्रिपार्श्वयुक्तं नृपभवनयुतं सबहुरक्षम्।
    यन्नृपतिस्थापितकं तत् स्थानीयं समुद्दिष्टम्।। मयमतम्, 10/31-32
72. मानसार: 10.36-37
73. पर्वतस्याथवा नद्या: पार्श्वे राजबलान्वितम्।
    राष्ट्रस्यान्तकपालाय तत् स्थानीयं विदुर्बुधा:।। शिल्परत्नम्, अध्याय: 5, पृ. 20
74. प्राचीनभारतीय: पुरनिवेश:, अध्याय: 4, पृ. 109
75. भारतीयवास्तुशास्त्रम्, पृ. 107
76. तत्रैव, पृ. 108
77. प्राचीनभारते नगरजीवनम्, पृ. 38

स्थलसेनायाः मुख्यालयात् दूरं नगराद् बहिः जनस्थानात् राजधानीतः सुदूरं सैन्यबलनिरीक्षणव्यवस्थायाः अङ्गभूतेन पदातिसैनिकानां सैन्धवारोहिणाञ्च नित्यनैमित्तिककार्याभ्यासार्थं केन्द्रस्थानं भवति स्म।

* **खेटकं खेटो वा** – भोजाचार्येण समराङ्गणसूत्रधारग्रन्थे निर्देशितमस्ति यत् खेटस्य विस्तारः नगरस्यार्धं भवति। खेटस्यार्धं ग्रामस्य विस्तारः कथ्यते।[78] अत एव स्पष्टं वर्तते यत् खेटं नगरात् लघुः ग्रामात् च बृहद् कलेवरयुक्तम् अस्ति। अस्य निवेशनं नगरात् योजनमानेन दूरं स्वीक्रियते।[79] विश्वकर्मवास्तुशास्त्रानुसारमेतत् नगरं ग्रामस्यान्तर्गतं समाहितं क्रियते। खेटनगरस्य वास्तुभूमिः प्रायशः वनमध्ये स्वीकृतम्। नगरेऽस्मिन् एकवीथितंः दशवीथ्यन्तं वीथयः भवेयुः। अत्र बहवः क्षुद्रवीथ्यादयस्तु स्थानानुकूलं स्थाप्येत्। खेटस्यगृहाणि प्रायशः पर्णनिर्मितानि भवन्ति परं कुत्रचित् इष्टिकारचितानि गृहाणि अपि दरीदृश्यन्ते। एतस्मिन् बहुविधमांसविक्रयशीलजनाः शबरपुक्तिन्दादयः निकृष्टजनाः निवसन्ति। वस्तुतः खेटकं खेटनगरं वा लघुनगरमस्ति।[80] ग्रामाणां मध्ये सन्निवेशकारणात् कुमारस्वामीः खेटे ग्रामतत्त्वस्य सम्मिश्रणमपि कृतवान्।[81] पाणिनि खेटनगरं गर्हितनगरं कथितवान्।[82] अनेन कारणेन स्पष्टं यत् खेटनगरं व्याधाद्यधमसाधारणजनानां निवासस्थानानि आसन् यस्मिन् सभ्यजनाः न निवसन्ति स्म। मानसारानुसारेण नगरेऽस्मिन् बहुधा शूद्रा एव निवासं कुर्वन्ति स्म।[83]आधुनिकखेडाशब्दः खेटात् अजायत्। आदिपुराणे नदी–पर्वतैः परिवेष्टितं नगरं खेटं मन्यते।[84] मानसारग्रन्थेऽपि खेटकं नद्याः पर्वतस्य च शबरन्दादयः, पुलिन्दैश्च प्रान्ते स्थितम् अथवा एतौ परितः मन्यते। नगरेऽस्मिन् शूद्र निवसन्ति।[85] मयमतग्रन्थानुसारं नगरस्यास्य सन्निवेशः सरितस्तटे पर्वतप्रदेशयुक्तवनप्रदेशे वा भवेत्। अत्र नगरनिवासिनां रूपेण शूद्राणां साम्राज्यं भवति।[86] अमरकोशे अमरसिंहः अपि खेटस्य खेटकस्य वा कृते गर्हितनगरस्य, अधमनगरस्य च प्रयोगं कृतवान्।[87] मध्यप्रदेशतः पश्चिमगुजरातपर्यन्तं खेडाशब्दस्य प्रचलनमधुनापि दृश्यते।[88] गुजरातप्रदेशे आणन्दनगरं समया खेडानामकनगरमद्यापि दरीदृश्यते। खेटनगरं

---

78. खेटं तदर्धविष्कम्भमाहुग्रामं तदर्धतः। समराङ्गणसूत्रधारः, 8.79
79. योजनेन पुरात् खेटम्। तत्रैव, 8.80
80. खेटस्य वास्तुभूमिस्तु प्रायः काननमध्यगाः।
    शबरैश्च पुलिन्दैश्च संयुता मांसजीविभिः।।
    पर्णगेहान्विता विष्वगथ वेष्टिकगेहभाक्।
    एकादिदशवीथ्यन्ताः क्षुद्रवीथ्यस्समन्ततः।। विश्वकर्मवास्तुशास्त्रम्, 8.20–21
81. ग्रामयोः खेटकं मध्ये ..........। शिल्परत्नम्, अध्यायः 5, पृ. 17
82. चेलखेटकटुककाण्डं गर्हायाम्। अष्टाध्यायी, 6/2/125
83. शूद्रालयसमन्वितं खेटमुक्तं पुरातनैः। मानसारः, अध्यायः 10.29
84. सरिद्गिरिभ्यां संरुद्धं खेटमाहुर्मनीषिणः। आदिपुराणम्, 16/171
85. नदीपर्वत(त्) प्रान्ते (च) शूद्रालयसमन्वितम्।
    महाप्रावृतसंयुक्तं खेटमुक्तं पुरातनैः।। मानसारः, 10.29
86. शूद्रैरधिष्ठितं यन्नद्यचलावेष्टितं तु तत्खेटम्। मयमतम्, 10.26
87. अमरकोशः, काण्डः 3, वर्गः 1/54
88. पाणिनिकालीनभारतवर्षः, पृ. 78

वस्तुतो लघुग्रामः एव यस्मिन् दश-पञ्चदशपरिवाराणामावासो भवेत्।

* **खर्वटं कर्वटं वा** - खर्वटम् आचार्यः कौटिल्यः द्विशतग्रामाणां मध्ये प्रधानमधिष्ठानं स्वीकरोति।[89] अतः सम्भवमस्ति यत् जनसन्निवेशस्य प्रधानभागः नगरमिदं भवति स्म। इदं ग्रामाणां रक्षणार्थं दुर्गरूपे स्थितमासीत्। अमरकोशानुसारेण खर्वटं नद्याः पार्श्वे पर्वतस्य पार्श्वे वा भवेत्।[90] आदिपुराणानुसारमेतत् नगरं पर्वतीयप्रदेशात् परिवेष्टितं मन्यते।[91] मानसारग्रन्थेऽपि खर्वटमधिकांशतः पर्वतस्य सन्निकटं प्रदर्शितम्। नगरेऽस्मिन् नानाजातीनां जनाः निवसन्ति।[92] वात्स्यायनाचार्यस्य कथनानुसारं खर्वटे सभ्यनागरिकाः निवासं कुर्वन्ति स्म।[93]राजाभोजेन एतस्य कृते कर्वटशब्दस्य प्रयोगं कृत्वा नगरमिदं शाखानगरस्यान्तर्गतं विहितम्।[94] विश्वकर्मवास्तुशास्त्रेऽस्योल्लेखः ग्रामरूपे मिलति।[95] खर्वटस्य वास्तुभूमिस्तु प्रायः नदीतीरगतैव भवति। एतत् छायावृक्षसमूहयुक्ता निष्कुञ्जोपेता उपवनयुक्ता च कथ्यते। अत्र विंशतिवीथयः अनेकाश्च क्षुद्रवीथयः भवन्ति। एतस्मिन् शतगृहैः युक्ता एक मुख्या वीथी अपि भवति यत्र मुख्यवीथ्याः मध्ये कालिकाप्रासादः स्यात्। कृषकाः भृत्याः मदिरागृहाणि आपणाश्च स्थानेऽस्मिन् भवन्ति।[96]

मानसारग्रन्थानुसारं एतत् नगरं पर्वतेन परिवेष्टितं नानावर्णजनानामावासयुक्तं वर्तते। सर्वविध-प्रचारसाधनयुक्तैः एतत् खर्वटनाम्ना ज्ञायते।[97] आचार्यः मयः अपि खर्वटनगरस्य प्रायः इमामेव परिभाषां कृतवान्।[98] अनेन प्रकारेण सर्वेषु वास्तुशास्त्रीयग्रन्थेषु प्राप्तस्य खर्वटनगरस्य लक्षणेन सुस्पष्टं वर्तते यत् एतत् नगरं पर्वतप्रदेशे मन्यते यत् समन्तात् पर्वतात् परिवेष्टितं भवति स्म। सुरक्षादृष्ट्या नगरेऽस्मिन् प्राकारस्य भूमिका महत्त्वपूर्णा वर्तते। अत एव खर्वटनगरं सकलजनानां निवासहेतुः उपयुक्तं कथ्यते। इत्थं नगरेभ्यः न्यूनावाससुविधासम्पन्नग्रामविशेषः एव खर्वटनगरं वर्तते।

* **सेनामुखम्** - शिविररूपे स्थापितसेनामुखनगरं प्रायः क्रमिकास्थायिनिवास- केन्द्राणि कथ्यन्ते यानि सीमाप्रान्तेभ्यः आगतसैन्यधिकारिणां नवीनायुध-प्रशिक्षणाभ्यासचिकित्सा-

---

89. द्विशतं ग्राम्या खार्वटिकम्। अर्थशास्त्रम्, अधिकरणम् 2, अध्यायः 1
90. खर्वटं नाम नदीगिरिसमाश्रयम्। अमरकोशः (सत्येन्द्रमिश्रसम्पादितम्), पृ. 550
91. केवलं गिरिसंरुद्धं खर्वटं तत्प्रयक्षते। आदिपुराणम्, 16.171
92. परितः पर्वतैर्युक्तं नानाजातिगृहैर्वृतम्। मानसारः, अध्यायः 10.30
93. कामसूत्रम्, सूत्रम् 2, पृ. 66
94. शाखानगरमेवाहुः कर्वटं नगरोपम्। समराङ्गणसूत्रधारः, 8.3
95. विश्वकर्मवास्तुशास्त्रम्, 8.61
    कदम्बैर्नारिकेलैश्च श्रीपर्णैस्तिलकैरपि।
    छायावृक्षसमाकीर्णा ..... विपण्यादिभिराकृता।। तत्रैव, 8.22-25
96. वास्तुभूमिः खर्वटस्य नदीतीरगता मता।
    रसालसालबकुलैस्तिन्त्रिणीवेणुपाटलैः।।
97. परितः पर्वतौर्युक्तं नानाजातिगृहैर्वृतम्।
    सर्वप्रचारसंयुक्तमेतत्खर्वटमीरितम्।। मानसारः 10.30
98. परितः पर्वतयुक्तं खर्वटकं सर्वजनसहितम्। मयमतम् 10.27

मनोरञ्जनयुक्तसम्पूर्णसचलसाधनसम्पन्नसुरक्षितस्थानानि इतरजनप्रवेशबाधितानि भवन्ति।[99] मयमतानुसारेण नगरेऽस्मिन् सर्वप्रकाराणां जनानां निवासस्थानेन सह राजभवनमपि विद्यमानो भवति। अत्र बहुसैन्यजनाः नूतनास्त्रशस्त्रप्रशिक्षणभ्यासयुक्तं भूत्वा सैन्यैकांशव्यवस्थायुतानि वसन्ति।[100] सेनामुख्यनगरस्य विषये सर्वेषु वास्तुशास्त्रग्रन्थेषु उल्लेखो न प्राप्यते।

* **शिबिरम्** - शिबिरनगरे नृपसचिवसेनानायकबलिसंग्राहकन्यायविद्सभाध्यक्षादयः निवासं कुर्वन्ति। एतदतिरिक्तं यस्मिन् नगरे राजपुरुषाणामधिकारीणाञ्च कृते सर्वदा सुयोग्यनिवासस्थलानि निर्मितानि भवन्ति, तन्नगरं शिबिरं कथ्यते।[101] शिल्पज्ञैः एतानि नगराणि चलाचलरूपेण स्थापनीयानि। मानसारे[102] मयमते[103] च नगरस्यास्य वर्णनं मिलति। इत्थं स्पष्टमस्ति यत् सीमामुख्यालयकेन्द्रेभ्यः अन्यत्र गन्तव्यमार्गे विश्रामस्य कृते सैन्याभ्यासार्थमापणचिकित्सोपचारमनोरञ्जनादीनां कृते चलव्यवस्थायुतानि काष्ठपटवज्रचूर्णेष्टिकादिभिश्च निर्मितानि जनावासात् दूरं स्थापितानि राजपथसमीपवर्तिकुटीराणि नगरेऽस्मिन् भवन्ति।

स्थापत्यशास्त्रानुसारं नगरभेदस्यान्तर्गतं नगर-पत्तन-द्रोणमुख-राजधानी-पुटभेदन-निगम-स्थानीय-खेट-खर्वटमित्यादीनाञ्च विस्तृतं क्षेत्रं सम्मिलितमस्ति। मार्कण्डेयपुराणेऽपि नगरसम्बन्धिनः व्याख्याः सम्प्राप्यन्ते।[104] एतदतिरिक्तं पुरं, नगरी, कुब्जकं, वाहिनीमुखं, कोत्मकोलकं, स्कन्धावारं, ज्येष्ठं, मध्यमं कनिष्ठञ्च नगराणां भेदाः अपि अत्र विवेचिताः सन्ति। इत्थं सुस्पष्टं भवति यत् वास्तुशास्त्रदृष्ट्या प्राचीनकाले अनेकानि नगराणि आसन्।

---

99. संस्कृतवाङ्मये विज्ञानम्, पृ. 397
100. परनृपदेशसमीपे युद्धारम्भक्रियोपेतम्।
सेनासेनापतियुक्तं ............ तज्ज्ञैः।। मयमतम्, 10.29-30
101. भूपालस्सचिवस्सेनानायको बलिकारकः।
न्यायविच्च सभाध्यक्षो ये चान्ये राजपुरुषाः।। विश्वकर्मवास्तुशास्त्रम्, 8.66-67
102. मानसारः, अध्यायः 10
103. मयमतम्, अध्यायः 10
104. यो जनेन पुरात् खेटं खेटात् ग्रामं प्रचक्षते।
गव्यूति परिमाणेन ............. राष्ट्रमुच्यते।। मार्कण्डेयपुराणम् 49.42.43

# दिगनुरूपद्वारनिर्धारणम्

**श्रीमृत्यञ्जय त्रिपाठी**

भारतीयसंस्कृतिः संस्कृतवाङ्मयश्च विश्ववाङ्मयसमुदाये मूर्द्धन्यमिति नैवात्युक्तिः। वेदा एवास्माकं संस्कृतसाहित्यस्य संस्कृतेश्च आधारभूताः प्राणभूताश्च सन्ति नास्त्यत्र सन्देहावकाशः। वास्तुशास्त्रस्य मूलाधारभूतः स्थापत्यवेदोऽपि अथर्ववेदस्योपवेदोऽस्ति। वेदेष्वपि वास्तुशास्त्रस्य महत्वं प्रतिपादितमस्ति। कालान्तरे तस्योन्नतं स्वरूपमेव अन्येषु ग्रन्थेषु दृश्यते। शास्त्रस्यास्य वैशिष्ट्यमनेनैव ज्ञायते यज्जनैरिदं शास्त्रं व्यवहारशास्त्रत्वेन समाद्रियते। इदं शास्त्रं शास्त्रदृष्ट्या व्यवहारदृष्ट्या च अन्यशास्त्रेषु शीर्षस्थत्वेन स्मर्यते।

यस्यां भूमौ भवनादिकं निर्मीयते अथवा वासयोग्यः भूखण्डः भवनञ्च वास्तुशब्देनाभिधीयते। "मयमतम्" नामाख्ये ग्रन्थे वास्तुशास्त्रविषये समुचितमुक्तं यद् देवाः मानवाश्च यत्र निवसन्ति तदेव वास्तु तद्यथा–

**अमर्त्याश्चैव मर्त्याश्च यत्र तत्र वसन्ति हि।**
**तद्वस्त्विति मतं तज्ज्ञैस्तद्भेदं च वदाम्यहम्॥**[1]

अपि च वास्तुशास्त्रस्य चत्वारः भेदाः अपि तत्र वर्णिताः, परं तेषु भेदेषु भूमेरेव प्राधान्यमस्ति।

**भूमिप्रासादयानानि शयनं च चतुर्विधम्।**
**भूरेव मुख्यवस्तु स्यात्तत्र जातानि यानि हि॥**[2]
**प्रासादादीनि वास्तूनि वस्तुत्वाद् वस्तुसंश्रयात्।**
**वस्तून्येव हि तान्येव प्रोक्तान्यस्मिन् पुरातनैः॥**[3]

वास्तुशास्त्रानुसारेण भवननिर्माणात् पूर्वं भूखण्डचयनं, भूशोधनं, भूखण्डोपरि दिक्शोधनादिकं कर्त्तव्यम्। तदनन्तरं स्वप्रयोजनानुसारेण वास्तुशास्त्रीयनिमानुसारेण च भवनानां निर्माणं करणीयम्। वास्तुशास्त्रीयनियमाननुसृत्यैव वयं भवनानां, गृहाणां, राजप्रासादानां, नगराणां, देवालयानाञ्च उत्तमोत्तमशुभफलं प्राप्तुं शक्नुमः।

---

1. मयमतम् अध्याय 2 श्लोक 1
2. मयमतम् अध्याय 2 श्लोक 2
3. मयमतम् अध्याय 2 श्लोक 3

गृहनिर्माणसमये सर्वप्रथमं दिग्ज्ञानमावश्यकम्। दिग्ज्ञानं विना भूखण्डस्य शुभाशुभत्वं ज्ञातुमेव न शक्यते। दिग्ज्ञानेन वास्तुशास्त्रीयनियमान् अनुसृत्य भवनानां निर्माणं क्रियते। दिशं शोधयित्वा देवालयानां, राजप्रसादानां, सामान्यभवनानां, द्वाराणां, यज्ञादिक्रियासम्पादनार्थं विविधकुण्डानां वेदिकानाञ्च निर्माणं क्रियते। दिग्ज्ञानं विना निर्मितभवनं यदि दिङ्मूढो भवति तर्हि शास्त्रानुसारेण गृहपतेः कुलनाशो भवति। उक्तं हि–

**प्रासादे सदनेऽलिन्दे द्वारे कुण्डे विशेषतः।**
**दिङ्मूढे कुलनाशः स्यात् तस्मात् संसाधयेद्दिशः॥**[4]

दिक्साधनविषये न केवलं सिद्धान्तग्रन्थेषु, वास्तुशास्त्रीयग्रन्थेष्वपि विस्तरेण वर्णनं प्राप्यते। वास्तुशास्त्रस्य विविधेषु ग्रन्थेषु न केवलं दिवसे अपितु रात्रावपि दिक्साधनस्य विधयः वर्णितास्सन्ति। इदानीन्तने काले चुम्बकीययन्त्रमाध्यमेन दिक्साधनस्य परम्परा सर्वत्र दृश्यते परञ्च चुम्बकीययन्त्रमिदं यदा चुम्बकीयक्षेत्रे विद्युत्क्षेत्रे वा प्रयुज्यते तदा अनेन यन्त्रेण वयं चुम्बकीयक्षेत्रेषु न सम्यक् दिग् ज्ञातुं न शक्नुमः। तदा सम्यक्तया दिग्निर्धारणमेव न भवति। यद्यपि प्राचीन विधिना दिक्साधनस्य रीतिः क्लिष्टा त्वस्ति परञ्च विश्वसनीयाऽस्ति।

वास्तुशास्त्रानुसारेण भवनस्य द्वारं न केवलं द्वारं वर्तते अपि तु तत्र निवासकर्तृणां उन्नतेः द्वारमपि भवति। भवनेषु वास्तुशास्त्रीरीत्या कक्षविन्यासं कृत्वा यदि द्वारस्थापनं निषिद्धस्थानेषु क्रियते तर्हि तत्र निवासकर्तृणां विकासो बाधितो भवति। अतोऽत्र द्वारस्थापने वास्तुशास्त्रीयनियमानां ध्यानमावश्यकं वर्तते।

वास्तुशास्त्रे राशि–वर्ण–आय–वास्तुचक्रेण च द्वारस्थापनं क्रियते। यथा–

**1. राश्यनुसारं द्वारस्थापनम्–** ज्योतिषशास्त्रवास्तुशास्त्रयोश्च पारस्परिकं अङ्गाङ्गिभावश्च वर्तते। यतो हि प्राच्यादिदिशां स्वामिनः ग्रहा एव सन्ति। अतः वास्तुशास्त्रीयग्रन्थेषु ग्रहाणां, राशीनाञ्च चर्चा अनेकत्र प्राप्यते। गृहस्य मुख्यद्वारस्थापनेऽपि राशिविचारः क्रियते। गृहपतेः राश्यनुसारमेव मुख्यद्वारं निर्धार्यते। यथा– मेष–सिंह–धनुराशीनां द्वारं उत्तरदिशि, वृष–तुला–कुम्भराशीनां द्वारं पश्चिमदिशि, मिथुन–कन्या–मकरराशीनां दक्षिणदिशि अपि च कर्क–वृश्चिक–मीनराशीनां द्वारं पूर्वदिशि शुभदं भवति।

**2. वर्णानुसारेण द्वारस्थापनम्–**ज्योतिषशास्त्रस्य विविधेषु ग्रन्थेषु राशीनां वर्णकथनमपि कृतम्। द्वादशराशीनां विभागः ब्राह्मणादीनां चतुर्षु वर्णेषु कृतः। त एव वर्णाः गृहस्य मुख्यद्वारनिर्धारणे वैशिष्ट्यं भजन्ते। राशीनां वर्णाधारेण द्वारदिग्ज्ञानं क्रियते। यथा ब्राह्मणराशीनां पूर्वदिशि, क्षत्रियराशीनां उत्तरदिशि, वैश्यराशीनां दक्षिणदिशि, शूद्रराशीनां पश्चिमदिशि द्वारं शुभदः भवति। तद्यथा–

---

4. बृहद्वास्तुमाला, दिक्साधनप्रकारः, श्लोक 1

**पूर्वे ब्राह्मणराशीनां वैश्यानां दक्षिणे शुभम्।**
**शूद्राणां पश्चिमे द्वारं नृपाणामुत्तरे मतम्।।**[5]

**3. आयानुसारेण द्वारस्थापनम्** आयसाधनमपि वास्तुशास्त्रस्य मूलाधारेषु अन्यतमं वर्तते। कस्यपि भवनस्य निर्माणात् पूर्वं पिण्डसाधनस्य प्रक्रिया भवति। निर्मितस्य भवनस्यापि आयसाधनं कर्तुं शक्यते। भवनस्य दीर्घविस्तारयोः गुणनफलमष्टभिः विभज्य शेषवशाद् आयः ज्ञायते। अर्थात् शेषसंख्यानुसारमेव ध्वजादि–आयाः भवन्ति। तदनुगुणमेव मुख्यद्वारस्य दिक्निर्धारणं भवति।

**सर्वद्वार इहध्वजो वरुणदिग्द्वारं च हित्वा हरिः।**
**प्राग्द्वारो वृषभो गजो यमसुरेशाशामुखः स्याच्छुभः।।**[6]

| **आयः** | **द्वारदिक्निर्णयः** |
|---|---|
| ध्वजः | चतुर्षु दिक्षु |
| सिंहः | पूर्व–उत्तर–दक्षिणदिक्षु |
| गजः | पूर्वदक्षिणयोः दिशोः |
| गौ | पूर्वदिशि |

**4. वास्तुचक्रेण द्वारस्थापनम्** एकाशीतिपदवास्तुमण्डले चतुष्षष्टिःपद वास्तुमण्डले वा स्थितदेवानां प्रकृतेराधारेण द्वारस्थापनं क्रियते। अस्मिन् विषये वास्तुप्रदीपकारस्य मतमस्ति यत् भूखण्डस्य नवभागं कृत्वा दक्षिणहस्ते पञ्चभागं वामहस्ते च त्रयभागं विहाय द्वारस्थापनं शुभदं भवति।

वास्तुशास्त्रीयचक्रानुसारेण भवनेषु द्वारस्थापनं निम्नप्रकारेण क्रियते। तद्यथा–

**नवभागं गृहं कृत्वा पंचभागं तु दक्षिणे।**
**त्रिभागमुत्तरे कार्यं शेषं द्वारं प्रकीर्तितम्।।**[7]

---

5. बृहद्वास्तुमाला, गृहारम्भेद्वारनिर्णयः, श्लोक 149
6. बृहद्वास्तुमाला, गृहारम्भेद्वारनिर्णयः, श्लोक 150
7. उद्धृतं वास्तुसारः, वास्तुविन्यासप्रकरणं, पृ. सं. 75 श्लोक 111

**ईशानः** **पूर्वः** **आग्नेयः**

**उत्तरः** **दक्षिणः**

| ईश | पर्जन्य | जयन्त | इन्द्र | सूर्य | सत्य | भृश | आकाश | वह्नि |
|---|---|---|---|---|---|---|---|---|
| दिति | आप | जयन्त | इन्द्र | सूर्य | सत्य | भृश | सावित्र | पूषा |
| अदिति | अदिति | आपवत्स | अर्यमा | अर्यमा | अर्यमा | सविता | वितथ | वितथ |
| शैल | शैल | पृथ्वीधर | ब्रह्मा | ब्रह्मा | ब्रह्मा | विवस्वान् | गृहक्षत | गृहक्षत |
| कुबेर | कुबेर | पृथ्वीधर | ब्रह्मा | ब्रह्मा | ब्रह्मा | विवस्वान् | यम | यम |
| भल्लाट | भल्लाट | पृथ्वीधर | ब्रह्मा | ब्रह्मा | ब्रह्मा | विवस्वान् | गन्धर्व | गन्धर्व |
| मुख्य | मुख्य | राजयक्ष्मा | मैत्र | मैत्र | मैत्र | इन्द्र | भृंग | भृंग |
| नाग | रूद्र | शोष | असुर | वरूण | पुष्पदन्त | सुग्रीव | जय | मा |
| रोग | पाप | शोष | असुर | वरूण | पुष्पदन्त | सुग्रीव | दौवारिक | पितर |

**वायव्यः** **पश्चिमः** **नैर्ऋत्यः**

एकाशीतिपदवास्तुचक्रे चतुर्षु दिक्षु नव-नव भागाः भवन्ति परञ्च चतुःषष्टिपदवास्तुचक्रे चतुर्षु दिक्षु अष्ट-अष्टकोष्ठकाः भवन्ति। अनेन एकस्मिन् भूखण्डे द्वात्रिंशद्द्वाराणि भवितुमर्हन्ति। अतोऽत्र चतुर्षु दिक्षु स्थितविभिन्नदेवानां प्रकृतेराधारेण द्वारस्थापनस्य शुभाशुभफलं प्राप्यते। पूर्वदिशमारभ्य क्रमेण चतुर्षु दिक्षु द्वात्रिंशद्पदेषु द्वारस्थापनस्य शुभाशुभफलन्तु-

**नवगुणसूत्रविभक्तन्यष्टगुणेनाथवा चतुःषष्टेः।**
**द्वाराणि यानि तेषामनलादीनां फलोपनयः॥**[8]

**अनिलभयं स्त्रीजन्म प्रभूतधनता नरेन्द्रवाल्लभ्यम्।**
**क्रोधाधिकत्वमनृतं क्रौधं चौर्यं क्रमात्पूर्वे॥**[9]

---

8. बृहत्संहिता, वास्तुविद्याध्याय 53 श्लोक 69
9. बृहत्संहिता, वास्तुविद्याध्याय 53 श्लोक 70

**अल्पसुतत्वं प्रैष्यं नीचत्वं भक्ष्यपानसुतवृद्धिः।**
**रौद्रं कृतघ्नमधनं सुतवीर्यघ्नं च याम्येन॥**[10]

**सुतपीडा रिपुवृद्धिर्न सुतधनाप्तिः सुतार्थफलसम्पत्।**
**धनसम्पत्तिनृपतिभयं धनक्षयो रोग इत्यपरे॥**[11]

**वधबन्धो रिपुवृद्धिः सुतधनलाभः समस्तगुणसम्पत्।**
**पुत्रधनाप्तिर्वैरं सुतेन दोषाः स्त्रिया नैःस्वम्॥**[12]

| **क्रमसंख्या** | **दिक्** | **देवाः** | **द्वारफलम्** |
|---|---|---|---|
| 1. | ईशानः | ईशः | अग्निभयम् |
| 2. | पूर्वः | पर्जय | कन्याप्राप्तिः |
| 3. | पूर्वः | जयन्तः | धनलाभः |
| 4. | पूर्वः | इन्द्रः | राजप्रियता |
| 5. | पूर्वः | सूर्यः | मनस्तापः, क्रोध |
| 6. | पूर्वः | सत्यः | असत्यता |
| 7. | पूर्वः | भृशः | क्रूरता |
| 8. | पूर्वः | आकाशः | चौरभयम् |
| 9. | आग्नेयः | अग्निः | पुत्रकष्टम्/अल्पपुत्रप्राप्तिः |
| 10. | दक्षिणः | पूषा | परिजनकष्टः/दासवृत्तिः |
| 11. | दक्षिणः | वितथः | कल्याणम्/भक्ष्यपानवृद्धिः |
| 12. | दक्षिणः | गृहक्षतः | पुत्रलाभः |
| 13. | दक्षिणः | यमः | मृत्यु/रौद्रम् |
| 14. | दक्षिणः | गन्धर्वः | अपमानम् |
| 15. | दक्षिणः | भृंगः | धनहानिः |
| 16. | दक्षिणः | मृगः | बलहानिः |
| 17. | नैर्ऋत्यः | पितरः | पुत्रनाशः |
| 18. | पश्चिमः | दौवारिकः | कर्णरोगः/शत्रुवृद्धिः |

10. बृहत्संहिता, वास्तुविद्याध्याय 53 श्लोक 71
11. बृहत्संहिता, वास्तुविद्याध्याय 53 श्लोक 72
12. बृहत्संहिता, वास्तुविद्याध्याय 53 श्लोक 73

| | | | |
|---|---|---|---|
| 19. | पश्चिमः | सुग्रीवः | अर्थसंकटम्/पुत्रहानिः |
| 20. | पश्चिमः | पुष्पदन्तः | सन्तुष्टिः/धन-सम्पतिप्राप्तिः |
| 21. | पश्चिमः | वरुणः | आरोग्यता/धनसम्पतिः |
| 22. | पश्चिमः | असुरः | राजभयम्/हानिः |
| 23. | पश्चिमः | शोषः | अर्थक्षयः |
| 24. | पश्चिमः | पापयक्ष्मा | रोगः |
| 25. | वायव्यः | वायुः | मृत्युः/बधबन्धनभयम् |
| 26. | उत्तरः | नागः | शत्रुवृद्धिः |
| 27. | उत्तरः | मुख्यः | सन्ततिलाभः/धनलाभः |
| 28. | उत्तरः | भल्लाटः | गुणवृद्धिः/सम्पत्तिः |
| 29. | उत्तरः | कुबेरः | ऐश्वर्यप्राप्तिः |
| 30. | उत्तरः | शैलः | परिजनैः/विवादः |
| 31. | उत्तरः | अदितिः | स्त्रीकष्टम् |
| 32. | उत्तरः | दितिः | कार्यबाधा, निर्धनता |

**श्रीपतिमतेन द्वारमुखज्ञानम्**

श्रीपतिमतानुसारेण भूखण्डोपरि द्वारनिर्धारणं विभिन्नराशिषु सूर्यस्थित्यनुसारेण क्रियते। कर्क-मकर-कुम्भ-सिंहराशिषु सूर्यो भवति चेत् पूर्वपश्चिमदिशोः द्वारं शुभदं भवति, अपि च तुला-मेष-वृष-वृश्चिकराशिषु सूर्यो भवति चेत् भूखण्डस्य दक्षिणोत्तरदिशोः द्वारं शुभदं भवति। यदि सूर्यस्य स्थित्यनुसारं विहितदिक्षु द्वारं न स्थाप्यते, अपितु अन्यासु दिक्षु गृहस्य मुख्यद्वारं क्रियते, तदा दुर्मति-व्याधि-शोक-धननाशादीनामशुभफलानां प्राप्तिर्भवति-

**कर्कनक्रहरिकुम्भगतेऽर्के पूर्वपश्चिममुखानि गृहाणि।**
**तौलिमेषवृश्चिकयाते दक्षिणोत्तरमुखानि च कुर्यात्।**
**अन्यथा यदि करोति दुर्मतिर्व्याधिशोकधननाशमाप्नुयात्॥**[13]

अनेन प्रकारेण गृहस्य द्वारविन्यासविषये वास्तुशास्त्रस्य विविधेषु ग्रन्थेषु विस्तरेण चर्चा समुपलभ्यते। कस्यापि गृहस्य प्रवेशद्वारमेव तस्य गृहस्य मुखं भवति। मनुष्यशरीरे मुखस्य यत् महत्त्वमस्ति तदेव महत्त्वं गृहे मुख्यद्वारस्य भवति, अतः गृहस्य मुख्यद्वारनिर्धारणे वास्तुशास्त्रीयसिद्धान्ता-नामनुपालनमत्यन्तमावश्यकं वर्तते। एतेषां सिद्धान्तानामनुपालनं कृत्वा वयं चतुर्षु दिक्षु गृहस्य द्वारं कर्तुं शक्नुमः। अनेन दक्षिणदिश्यपि गृहस्य द्वारं स्थापयितुं शक्यते। चतुर्षु दिक्षु यस्मिन् यस्मिन् पदे द्वारस्थापनस्य शुभफलं वर्णितं तस्मिन् तस्मिन्नेव पदे गृहस्य मुख्यद्वारं स्थापनीयमिति।

13. उद्धृतं वास्तुसारः, वास्तुविन्यासप्रकरणं, पृ. सं. 74 श्लोक 110

# भारतीयवास्तुविज्ञानम्

**दीपकवशिष्ठः**

प्रागैतिहासिककालादेव मानवैः जीवनरक्षायै कस्यचिद् आश्रयस्य आवश्यकता अनुभूता। तस्मिन् काले वृक्षकुञ्जरेषु पर्वतकन्दरासु च आदिमानवस्याश्रयस्थानमासीत्। बहव्यः कन्दराः प्राकृतिकाः आसन्। बहव्यः कन्दराः प्राकृतिकाः आसन्। शिलाश्रयेषु निवासमानाः जनाः कदाचित् कन्दराणां अन्तःभित्तिषु छदिस्सु च विभिन्नानि रोचकानि चित्राणि रचयन्ति स्म। प्राचीनकन्दराचित्रैः तत्र निवासमानानां जनानां दिनचर्यायाः ज्ञानं भवति। तेषु मुख्यरूपेण विभिन्नायुधैः पशु-पक्षिणां आखेटः, पशुनां युद्धः, मानवेषु युद्धः, पशुवाहनं, गीतं, नृत्यं, पूजनं, मधुसञ्चयं तथा च जनानां दिनचर्यासंबद्धाः नैके दृश्याः प्राप्यन्ते। जनानां जीविकोपार्जनस्य मुख्यसाधनमाखेट आसीत्। आखेटस्य विविधाः दृश्या एषु चित्रेषु समुपलभ्यन्ते।

मानवसभ्यतायाः विकासेन सह जनानां निवासेऽपि परिवर्तनम् अभवत्। आखेटस्य स्थाने कृषिपशुपालनं जीविकोपार्जनस्य मुख्यसाधनम् अभवत्। शिलाश्रयान् परित्यज्य मानवेन समतलभूमौ वास आरब्धः, स्वनिवासाय शिलानां, मृत्तिकायाः एवञ्च काष्ठानां गृहं निर्मितम्। सुव्यवस्थितजीवनस्य परम्परा आरब्धा येन ग्रामाणां, पुराणां नगराणाञ्च जन्म अभवत्। गृहनिर्माणं विकसितसभ्यतायाः प्रमुखमेकम् अङ्गं जातम्। ग्रामनगरसन्निवेशस्य विविधानि उपाङ्गानि अस्तित्वे समागतानि तथा च भवननिर्माणे भूचयन-मापन-संस्कारादीनां विकासोजातः।

भारतवर्षस्य इतिहासकल्पना जनाः आर्यजात्या तथा च तेषां सभ्यतायाः विकासेन कुर्वन्ति। एतेषाम् आर्यानां प्रधानसाहित्ये ऋग्वेदे भवननिर्माणस्य नैके उल्लेखाः प्राप्यन्ते। तत्र एकस्मिन् स्थाने सहस्रस्थूणानां भवनस्य उल्लेखो विद्यते। यथा-

**राजानावसभिद्रुहा ध्रुवे सदस्यत्तये। सहस्रस्थूण आसाते।**[1]

अर्थात् अत्यन्ततेजस्विनौ एतौ मित्रवरुणौ एतादृशे यज्ञमण्डपे उपविशतः यत्तु सहस्रस्थूणैः निर्मितः उत्तमः दृढश्च वर्तते। एतादृशे यज्ञमण्डपे उपविश्य एतौ सोमं पिबतः तथा च उपासकस्य प्रार्थनां श्रृणुतः। एवमेव-

**अद्या मही न आयस्य नाघृष्टो नृपीतये। पूर्भवा शतभुजिः।**[2]

1. ऋग्वेद संहिता (2/41/5)
2. ऋग्वेद संहिता (7/15/14)

अर्थात्-हे अग्ने! यथा दुर्गे निवसितान् जनान् दुर्गं चतुर्विधं रक्षति। बाह्यशत्रूणां तेषु आक्रमणं न भवितुं शक्यते तथैव अग्निः स्वोपासकानां रक्षां कुर्यात्।

पुरातात्विकोत्खननेन प्रमाणितं भवति यत् प्राचीनकालादेव अत्र मूर्तिपूजा प्रचलिता आसीत्। सिन्धुसभ्यताया उत्खननेन केचन एतादृश्यः मूर्तयः, अंकनचिह्नानि च उपलब्धानि अभवन् यैः निष्कर्षमिदं समुपलब्धं यत् मूर्तिपूजा हड़प्पासंस्कृतेः प्रमुखमङ्गमासीत्। उत्खननेन प्राप्ताः मातृदेव्याः बहुभिः मूर्तीभिः इदं सिद्धयति यत् हड़प्पा एवञ्च मोहन-जो-दडोनिवासिनः मूर्तिपूजकाः आसन। केचन विद्वांसः अस्याः सभ्यतायाः वैदिकसभ्यतया सह सम्बन्धं न स्वीकुर्वन्ति तथाऽपि केचन विद्वांसः हड़प्पायाः अभिन्नता 'हरि-यूपिया' इत्यनेन सिद्धयन्ति।[1] 'हरि-यूपिया' इत्यस्य उल्लेखः वारमेकम् ऋग्वेदे अभवत्।[2] केषाञ्चनविदुषां मतानुसारेण हड़प्पायाः सभ्यता वैदिकसभ्यतैव आसीत्। एवं प्रतीयते यत् हडप्पासभ्यता वैदिक-आर्यानां अपि च अनार्याणां संश्लिष्टसंस्कृति आसीत्। आधुनिकाध्ययनेन इदं सिद्धयति।

हड़प्पायाः उत्खननेन इदं ज्ञातं यत् नगरं प्रायः 3 मीलपरिसरे विस्तृतम् आसीत्। ये भग्नावशेषाः प्राप्ताः तेषु स्थापत्यकलायाः दृष्ट्या दुर्गं एवञ्च रक्षाप्राचीरम् अतिरिच्य निवासगृहाणां, चतुर्णामन्नागाराणाञ्च विशेषमहत्वं दृश्यते। वैदिककाले प्रादुर्भूतस्य वास्तुशास्त्रस्य पूर्णविकासः आगम काले पुराणकाले च अभवत्। महाभारतकाले अस्य शास्त्रस्य पूर्णविकासस्य प्रमाणं प्राप्यते। प्रारम्भिका-वस्थायां एषा विद्या पूर्णरूपेण ''द्विजानां विद्या'' नाम्ना विख्याता आसीत्।[3] कालान्तरे एषा विद्या द्विजेभ्यः द्विजेतराणां हस्ताङ्गता जाता। अस्मिन् सन्दर्भे ब्रह्मवैवर्तपुराणे विश्वकर्मणः शापदग्धपुत्राणां यथा मालाकारः, कर्मकारः, शंखकारः, कुविन्दः, कुम्भकारः, कांस्यकारः, सूत्रधारः, चित्रकारः, स्वर्णकारश्चैतेषांणाञ्च वर्णनमुपलभ्यते।[4]

पुराणानुसारं सर्वप्रथमं ब्रह्मणः आदेशानुसारं पृथुना पृथ्वीं समतलं कृत्वा सुव्यवस्थितस्य आवासस्य कल्पना कृता। ब्रह्मणा स्वचतुर्भिः मुखैः विश्वकर्मादीनामुत्पत्तिः कृता। ब्रह्मणः पूर्वमुखं विश्वभूः, दक्षिणमुखं विश्वविद्, पश्चिममुखं विश्वस्रष्टा तथा च उत्तरमुखं विश्वस्थ इति नाम्ना प्रसिद्धमस्ति। ब्रह्मणः विश्वभूनामकमुखात् विश्वकर्मणः, विश्वविन्नामकदक्षिणमुखात् मयस्य,

---

1. जरनल आफ दि बाम्बे ब्रांच आफ रॉयल एशियाटिक सोसायटी, जिल्द 26 (1950) पृ. 56
   उधृत-भारतीय वास्तुकला का इतिहास तृ.सं. 2002, उत्तर प्रदेश हिन्दी संस्थान, हड़प्पा-सभ्यता युग पृष्ठ-17
2. वधीदिन्द्रो वरशिखस्य शेषो*भ्यावर्तिने चायमानाय शिक्षन्।
   वृचीबतो यद्धरियूपीयायां हन् पूर्वे अर्धे भियसापरो दत्।। ऋग्वेद संहिता (6/27/5)
3. सुशीलः चतुरो दक्षः शास्त्रज्ञो लोभवर्जितः।
   क्षमायुक्तो द्विजश्चैव सूत्रधारः स उच्यते।। राजवल्लभमण्डनम् अध्याय-1, श्लोक-41
4. ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः।
   मालाकारकर्मकारशङ्खकारकुविन्दकाः।।
   कुम्भकारः कांस्यकारः स्वर्णकारस्तथैव च।
   पतितास्ते ब्रह्मशापाद् अयाज्या वर्णसङ्कराः।। ब्रह्मवैवर्तपुराण 1/10/19-20

विश्वस्रष्टानामकपश्चिममुखात् मनोः एवञ्च विश्वस्थनामक-उत्तरमुखात् त्वष्टोत्पत्तिः अभवत्। ब्रह्मादेशानुसारं चतुर्भिः पुत्रैः नगर-ग्राम-पुरादीनां पृथक्-पृथक् रचना कृता। ब्रह्मणः आदेशानुपालनार्थं कुशलशिल्पकारस्य आवश्यकता अनुभूता। अतः चतुर्भिः शिल्पकारैः विभिन्नकार्येषु दक्षाः पुत्राः उत्पादिताः। विश्वकर्मणः पुत्रः स्थपतिः, मयस्य पुत्रः सूत्रग्राही, मनोः पुत्रः तक्षकः, त्वष्टुः पुत्रः वार्द्धकिश्च आसीत्।[1] कस्यचिदपि निर्माणस्य कृते विभिन्नप्रकाराणां शिल्पकाराणामावश्यकता दृश्यते। कश्चन पाषाणविशेषज्ञः, कश्चन काष्ठविशेषज्ञः कश्चन धातुविशेषज्ञः च भवति। सर्वेषां विशेषज्ञानां संयुक्तप्रयासेन किमपि निर्माणकार्यं सम्भवति। सुखेन जीवनयापनाय गृहस्थः गृहनिर्माणं करोति। गृहनिर्माणस्य वैशिष्ट्यं प्रतिपादयन् चाणक्यः कथयति- **'परसदननिविष्टः को लघुत्वं न याति'**। गृहं स्त्रीपुत्रादीनां सौख्यदायकं, धर्मार्थकामप्रदायकं, प्राकृतिकापदाभिः रक्षकञ्च भवति।[2] भारतीयवास्तुशास्त्रस्य मूलसंकल्पनास्ति यत् शास्त्रमिदं पञ्चमहाभूतेभ्यः निर्मितयोः मानवशरीरप्रकृत्योः मध्ये सामञ्जस्यस्थापनं तथा च प्राकृतिकशक्तीनां (सौर-गुरुत्व-चुम्बकीयानां) प्रबन्धनं करोति। भारतीयस्थापत्यानुसारं देवभवनं सामान्यजनभवनस्य राजभवनस्य वा अपेक्षया एकं विशेषं निवेशं भवति। निवेशेऽस्मिन् सैद्धान्तिकम् एव न अपितु कलात्मकमन्तरमपि दृश्यते। प्राचीनभारते प्रायः स्थापत्यकलायाः शैलीद्वयं प्रसिद्धमासीत्-एका 'नागरशैली' अपरा च 'द्राविड़शैली'। 'नागरशैली' इत्यस्य उत्तरभारतेन सह सम्बन्धः, 'द्राविड़शैल्याः' सम्बन्धस्तु दक्षिणभारतेन सह वर्तते। तत्र उत्तरभारतस्य विधायाम् आचार्यत्वेन शम्भु-गर्ग-अत्रि-वसिष्ठ-पाराशर-बृहद्रथ-विश्वकर्मा-वासुदेवादयः आसन्। दक्षिणभारते तावत् ब्रह्मा-त्वष्ट्रा-मय-मातङ्ग-भृगु-कश्यपादयः आसन्। वस्तुतः वास्तुशास्त्रस्य उद्भवे मयस्य विश्वकर्मणः च प्रसिद्धिः अधिका वर्तते।' देवानां शिल्पी 'विश्वकर्मा' मयः असुराणां शिल्पी इति प्रसिद्धोऽस्ति।

संस्कृतवाङ्मये प्रासादानां चर्चाऽपि बहुत्र दृश्यते यथा महाभारते विविधराजप्रासादानां चर्चा वर्तते, आदिकाव्ये श्रीमद्वाल्मीकिरामायणे अयोध्यायाः वर्णनं लङ्कायाश्च वर्णनं प्राप्यते। उभयत्रापि प्रासादानां विशदतया चर्चा समागता। तथैव जैनग्रन्थेषु बौद्धग्रन्थेष्वपि वास्तुविषयकसामग्री बहुषु स्थलेषु प्राप्यते। एवञ्च श्रीमद्भागवतपुराणे द्वारिकायाः वर्णनं तु अद्भुतमेव दृश्यते। अन्येष्वपि पुराणेषु यथा

1. स्थपतिः सर्वशास्त्रज्ञो वेदविच्छास्त्रपारगः।
   स्थापयत्यधिकपतिर्यस्मात् तस्मात् स्थपतिरुच्यते।।
   स्थपतेराज्ञया सर्वे सूत्रग्राह्यादयः सदा।
   कुर्वन्ति शास्त्रदेशेन वास्तुवस्तु प्रयत्नतः।।
   श्रुतज्ञः सुत्रग्राही च रेखाज्ञः शाखवित्तमः।
   किवचारज्ञः श्रुतिज्ञश्च चित्रकर्मज्ञवार्द्धकिः।।
   तक्षकः कर्मवित्सभ्यः संबान्धवदयापरः।
   इहैव लोकस्य यत्कर्म सर्व तच्छिल्पिनां गुरुः।। वास्तुसार संग्रह, प्राक्कथन पृष्ठ-9
2. स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदम्
   जन्तूनामयनं सुखास्पदमिदं शीताम्बुधर्मापहम्।
   वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते
   गेहं पूर्वमुशन्ति तेन विबुधाःश्रीविश्वकर्मादयः।। बृहद्वास्तुमाला, श्लोक-4

वाराहपुराणे, शिवपुराणे, मत्स्यपुराणे, अग्निपुराणे विष्णुपुराणादिष्वपि वास्तोः निदर्शनानि प्राप्यन्ते।

धर्मार्थकाममोक्षरूपचतुर्वर्गफलाप्तिकरणार्थं वास्तोः परिज्ञानमत्यावश्यकं भवतीति।[1] वास्तुशास्त्रे स्थापत्यकलायाः विविधपक्षाः सम्मिलिताः भवन्ति। नगरयोजनातः आरभ्य राजभवन-उत्कीर्णकला-उद्यान-आयुधागार-जलाशय-देवालय-यज्ञशाला-विप्रवास-देवप्रासाद-राजप्रासाद-विद्यालयभवन-सभाभवन-भृत्यशाला-कर्मशाला-मूर्तिकलेत्यादीनि सर्वाण्येव वास्तुशास्त्रे निहितानि सन्ति। परञ्च वास्तुशास्त्रस्य भव्यपराकाष्ठायाः अनुभवः अस्माभिः प्रासादानां संरचनायां क्रियते।

---

1. चतुर्वर्गफलप्राप्तिस्सल्लोकश्च भवेद् ध्रुवम्।
शिल्पशास्त्रपरिज्ञानान्मर्त्योऽपि सुरतां व्रजेत्।। प्रासादमण्डनम्, अध्याय 1, श्लोक-9

# प्रासादेषु प्रतिमादिस्थापनविमर्शः

**श्रीविजयकुमारः**

विदितमस्ति यद् देवप्रतिष्ठापूजनञ्च सनातनधर्मस्य मुख्याधारो वर्तते। आवैदिककालादेव भक्तिभावनायाः विकासः मानवसभ्यतायां दरीदृश्यते। वैदिककालादेव देववन्दनस्यावधारणा दरीदृश्यते। कालान्तरेण देवानां पूजनं वृक्षौषधिजलाशयादिषु अभवत्। शनैः शनैः प्रतिमालिङ्गानाञ्चावधारणा जाता। देवपूजनस्यावधारणा साकारनिराकारयोः रूपयोः प्राप्यते। निराकाररूपे ब्रह्मप्राप्तिविषये उपनिषत्प्रमाणमेव मन्यते। ध्यानावस्थया ब्रह्मणः निराकाररूपस्य प्राप्तिविषये अद्वैतवादीनां सिद्धान्ता एव मुख्याः सन्ति। ब्रह्मणः देवस्य वा साकाररूपे अभिकल्पना भारतीयपरम्परायां मूर्तिपूजनरूपे आरब्धा। वैदिकपौराणिकसाहित्ये च परिकल्पितदेवानां स्वरूपमाधारीकृत्य देवप्रतिमादीनां मानप्रमाणयुक्ताङ्गादिनिर्माणं स्वरूपस्यालङ्करणं च मन्दिरेषु दृश्यते। ततः देवप्रतिमानां स्थापनं, जीर्णप्रतिमानां विर्सजनं, नूतनप्रतिमानां स्थापनं प्रतिमानां मानाप्रमाणादिविषयमधिकृत्य विविध-वास्तुशास्त्रीयमानकग्रन्थेषु वर्णनं समुपलभ्यते। तत्र शास्त्रेषु प्रतिमानिर्माणे प्रायः दोषरहितपाषाणस्य प्रयोगस्य मतमस्ति। भागवते अष्टविधप्रतिमानामुल्लेखो वर्तते यथा-

**शैली दारुमयी लौही लेप्या लेख्या च सैकती।**

**मनोमयी मणिमयी प्रतिमाष्टविधा स्मृताः॥**[1]

ततः प्रतिमास्थापनस्याङ्गभूतानां विषयाणां, प्रतिमायाः पीठादीनां जीर्णोद्धारविचाराणामत्र विमर्शः क्रियते।

### 1. प्रतिमास्थापनकालविचारः-

इष्टप्राप्तिरनिष्टपरिहारार्थञ्च देवानामर्चनं कुर्वन्ति जनाः। यदा समुचितकाले गृहे प्रासादे च देवप्रतिमायाः स्थापनं भवेत्तदा नूनमेव सिद्धिः प्राप्यते। यतोहि शुभकालाधीना शुभफलप्राप्तिः। अत्र प्रतिमास्थापनकालविषये वास्तुशास्त्रानुसारेण विचारः क्रियते-

**1.1 अयनमासविचारः-**घटी-तिथि-लग्न-नक्षत्र-मास-अयनादीनां शुद्धिविचारः प्रतिमास्थापने मुख्यरूपेण क्रियते। एतेषां शुद्धिवशादेवप्रतिमानां स्थापनं करणीयम्। तत्र बृहद्वास्तुमालायां प्राप्यते[2]-

---

1. भागवतम् 51/27/92
2. उद्धृतम् बृहदास्तुमाला, पृ. 171

**उत्तरायणगे सूर्ये प्रतिष्ठा शोभना भवेत्।**

**दक्षिणायनगे सूर्ये प्रतिष्ठा नैव शोभना॥**

उग्रप्रकृतिदेवानां प्रतिमानां स्थापनविषये निर्देशोऽस्ति यदेतेषां स्थापना दक्षिणायने कर्तव्या।[3]

शुभाऽशुभमासविचारमते कथितं यत् पौषमासे यदि देवप्रतिमानां स्थापनं क्रियते तदा राजवृद्धिः भवति, माघे प्रतिष्ठाकर्ता सम्पद्युतो भवति। क्रमेऽस्मिन् तालिकायां स्पष्टं क्रियते मासे स्थापनाफलम्[4]–

| क्रं. | मासः | शुभाऽशुभफलम् |
|---|---|---|
| 1. | वैशाखः | सौख्यम् |
| 2. | ज्येष्ठः | जयावहम् |
| 3. | आषाढ़ः | यजमाननाशः |
| 4. | श्रावणः | राज्यराष्ट्रहानिः |
| 5. | भाद्रपदः | सम्मानहानिः |
| 6. | आश्विनः | राज्यहानिः |
| 7. | कार्तिकः | शत्रुवृद्धिः |
| 8. | मार्गशीर्षः | शत्रुवृद्धिः |
| 9. | पौषः | राज्यविवृद्धिः |
| 10. | माघः | सम्पदायुक्तः |
| 11. | फाल्गुनः | द्रव्यलाभः |
| 12. | चैत्रः | शुभम् |

प्रतिमाभेदवशाद् स्थापनमासविषये प्रोक्तं यत् श्रावणमासे शिवलिङ्गस्य, आश्विनमासे भगवत्याः, मार्गशीर्षे विष्णोः, पौषमासे शेषनागस्य च स्थापना शुभा भवति। यथा प्रोक्तम्[5]-

**श्रावणे स्थापयेल्लिङ्गमाश्विने जगदम्बिकाम्।**

**मार्गशीर्षे हरिं चैव सर्पान् पौषेऽपि केचन॥**

**1.2 प्रतिमास्थापने तिथिविचारः–** प्रतिपदां विहाय शुक्लपक्षस्य समस्तासु तिथिषु प्रतिमास्थापना शुभावहा भवति। कृष्णपक्षस्य दशमीतिथिं यावदेव स्थापनकार्यं कर्तव्यम्। विशेषतया यासां तिथिनां यो

---

3. मातृभैरववाराह-नारसिंह त्रिविक्रमाः।
महिषासुरहन्त्री स्थाप्या वै दक्षिणायने। तत्रैव, पृ. 173, श्लोक 08.बृहद्वास्तुमाला पृ.सं.172, श्लोक-4-7

4. तत्रैव, पृ. 173, श्लोक 09

5. तत्रैव, पृ. 173, श्लोक 11-13

अधिपतिः भवति तेषां स्थापना तासु तिथिष्वेव करणीया। अस्मिन् क्रमे द्वितीया, तृतीया, पञ्चमी, षष्ठी, सप्तमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, पौर्णमासी च प्रतिमास्थापनाय शुभाः तिथयः भवन्ति।[6]

**1.3 वारविचारः**–प्रतिमादिस्थापनकाले वारशुद्धौ कथितं यद् विप्राणां गुरुशुक्रयोः, क्षत्रियाणां रविभौमयोः, वैश्यानां बुधवासरे तथा च शूद्राणां शनिवासरे प्रतिमास्थापनकर्म करणीयम्।[7]

**1.4 शुभनक्षत्रविचारः**–वसिष्ठमते हस्त–चित्रा–स्वाति–अनुराधा–श्रवण–धनिष्ठा–शतभिषा–रेवती–अश्विनी–पुनर्वसु–पुष्य–उत्तराषाढा–उत्तराफाल्गुनी–उत्तराभाद्रपदा–रोहिणी–मृगशिरानक्षत्रेषु प्रतिमास्थापनकर्म शुभं भवति, एतेषु नक्षत्रेषु एव प्रतिमा स्थापनीया।[8]

विप्रादिजातिभेदवशादपि नक्षत्राणां विभाजनं दरीदृश्यते। ब्राह्मणेभ्यः उत्तराषाढा–उत्तरफाल्गुनि–उत्तरभाद्रपदा–पुष्यनक्षत्राणि, क्षत्रियेभ्यः श्रवण–हस्त–मूलनक्षत्राणि, वैश्यानां कृते स्वाति–अनुराधा–रेवतीभानि, शूद्राणां कृते अश्विनीनक्षत्रं प्रतिमास्थापनाय प्रशस्तम् ।[9]

**1.5 स्थापनकालविचारः**–प्रतिमायाः स्थापने कालशुद्धिविषये कथितं यत्[10]–

**पूर्वाह्णे चोत्तमं प्रोक्तं मध्याह्ने मध्यमं बुधैः।**
**सायाह्ने न मया प्रोक्ता स्वगृहे चाशुभे विधौ॥**
**कदाचिन्निश्यपि प्रोक्ता प्रतिष्ठा च कृते युगे।**
**कलौ युगेऽतिदोषाय प्रतिष्ठा निशि मानवैः॥**

**1.6 प्रतिमास्थापनक्रमे लग्नशुद्ध्यादिविचारः**–आचार्यवसिष्ठस्य मतमस्ति यद् येन प्रतिमास्थापनकर्म क्रियते तस्य जन्मलग्नतः स्थापनकालस्य लग्नम् अष्टमं न भवेत्। लग्नात् केन्द्र (1,4,7,10)–त्रिकोण–(5, 9) एकादशस्थानेषु शुभग्रहाणां अवस्थितिः भवेयुः। शुभमुहूर्तेषु प्रतिमास्थापनं यदि भवेत् तदा प्रतिमासु देवाधिवासं भवति तथा च स्थापनकर्तारः पुत्र–धन–सुख–आरोग्यताञ्च प्राप्नुवन्ति। प्रतिमास्थापनविषये शुक्रचन्द्रयोः महत्त्वमपि अस्ति।[11]–

**शुक्रस्थितांशे राशेर्वा केन्द्रपञ्चायगे विधौ।**
**देवप्रतिष्ठा कालेऽत्र दोषाः सर्वे शमं ययुः॥**

अर्थात् शुक्रः यस्मिन् राशौ स्यात्, यस्मिन्नवांशे वा भवेत् तस्मात् चन्द्रः केन्द्रपञ्चमैकादशस्थानेषु वा स्थितो भवेत् तर्हि प्रतिमास्थापनकाले समस्तदोषाणां शान्तिर्भवति। क्रमेऽस्मिन् नारदमतेऽपि

---

6. तत्रैव, पृ. 174, श्लोक 15-16
8. तत्रैव, पृ. 124, श्लोक 18
9. बृहद्वास्तुमाला, पृ. 175, श्लोक 19-20
10. तत्रैव, पृ. 175, श्लोक 22-24
11. तत्रैव, श्लोक 27-29

जन्मलग्नतः अष्टमं लग्नं स्थापनकाले न भवितव्यम्। तथा च शुभग्रहयोगवशात् तेषां दृष्टिपातवशाच्च समस्तराशीणां ग्रहणं कर्तव्यम्। यथा-

**राशयः सकलाः श्रेष्ठाः शुभग्रहयुतेक्षिताः॥**[12]

वसिष्ठमते तु गुरुशुक्रबुधेष्वन्यतमः यदि लग्ने स्थितः तदा दुष्टलग्नस्य परिहारो भवति।[13] रिक्तातिथयः (4-9-14) भौमवासरः, क्रूरग्रहेण दृष्टः वेधितो वा चन्द्रः नक्षत्रं च, दग्धातिथयः गण्डान्तनक्षत्राणि, गण्डान्तलग्नानि, गण्डान्ततिथयः, चरराशिलग्नानि, उपग्रहश्च प्रतिष्ठादिके सर्वथा त्यजेदिति।[13] संक्षिप्ते तु सूर्यः यदा उत्तरायणे भवेच्चन्द्रः बृहस्पतेः वर्गे वा भवेत्। स्थिरलग्ने नवांशे च केन्द्रेषु (1,4,7,10) त्रिकोणेषु (9, 5) वा यदा शुभग्रहाः भवन्ति, पापग्रहाः त्रिषड्दशमैकादशस्थानेषु भवन्ति (3, 6, 10, 11) उ.षा.-उ.भा.-उ.फा.-रोहिणी-मृगशिरा-चित्रा-अंनुराधा-रेवती-श्रवण-पुष्य-स्वातिनक्षत्रेषु भौमं वैनाशिकनक्षत्राणि च विहाय शुभवारेषु प्रतिमास्थापनकर्म शुभं भवति।

**1.7 प्रतिमास्थापने दिग्विचारः—**सम्पूर्णवास्तुशास्त्रे प्राच्यादिदिशां विशिष्टमहत्त्वं वर्तते। भवन-प्रासादादिनिर्माणे दिग्विचारः सूक्ष्मतया क्रियते। इत्थं प्रतिमास्थापनक्रमेऽपि देवानां स्थापने दिङ्निर्धारणं क्रियते। देवादीनां दिशानुरूपं मुखविचारः प्रासादमण्डने[14]-

**पूर्वापरस्यां देवानां कुर्यान्नो दक्षिणोत्तरम्।**
**ब्रह्म-विष्णु-शिवाः केन्द्रग्रहाः पूर्वापरान्मुखाः॥**

ब्रह्म-विष्णु-सूर्य-शिवानां पृष्ठभागः यदि नगरस्य सम्मुखो भवति तर्हि पुरनाशो भवेत् ब्रह्म-विष्णु-शिवादीनां स्थापनाविषये पूर्वं कथितं यत् पुरस्य पूर्वदिशि एव एतेषां स्थापनं भवितव्यम्। परञ्च देवतामूर्तिप्रकरणे[15] सर्वासु दिक्षु एतेषां स्थापना शुभा कथिता। अत्र दिशाविदिशासु देवानां मुखस्थापनविचारः सारिण्यां प्रदर्श्यते। यथा[16]-

| क्र. | अभिमुखी दिशा/विदिशा | देवाः |
|---|---|---|
| 1. | पूर्वा | ब्रह्मा, विष्णुः, शिवः, बाणलिङ्गम्, राजलिङ्गम्, मुखलिङ्गम्, सूर्यः, इन्द्रः, कार्तिकेयः, जिनः। |
| 2. | आग्नेयी | दिक्पालाः। |
| 3. | दक्षिणा | नागेशः, क्षेत्रपालः, निर्ऋतिः, भैरवः, अघोरशिवः, जिनः, भृङ्गराजः, कुबेरः, गांधर्वः, ग्रहमातृकागणः, नकुलीशः, नागः, चण्डीशः, हनुमान्, यमः। एतेषां |

12. शुभ लग्ने शुभांशे च कर्तुर्न निधनोदयो।। तत्रैव श्लोक 30-31
13. प्रासादमण्डनम् अ. 08 श्लोक 39
14. प्रासादमण्डनम्, अध्यायः-02, श्लोकः 37
15. उद्धृत प्रासादमण्डनम्, पृ.-56
16. उद्धृत राजवल्लभवास्तुशास्त्रम्, चतुर्थ अध्यायस्य परिचयः, पृ.-47

स्थापनां विदिशासु अपि कर्तुं शक्यन्ते। बेतालः, पितृगणः, यक्षः, दैत्यः, राक्षसः, भूताः, प्रेताः, अन्य क्षुद्रजातिदेवाः।

4. नैर्ऋति — निर्ऋतिः, क्षेत्रपालः, भैरवः, हनुमान्।

5. पश्चिमा — ब्रह्मा-विष्णु-शिव-सूर्य-इन्द्र-स्कन्द-अग्नि-वरुण- द्विजराज-रैवत-जिनानाञ्च।

6. वायव्यी — वायुदेवदिक्पालाश्च।

7. उत्तरा — कुबेर-शिवलिङ्ग-ब्रह्मा-जिन-गणेश-विष्णुदशावतारानाञ्च।

8. ईशानी — ईशदिक्पालश्च।

9. चतुर्दिक्षु — शिवलिङ्ग-ब्रह्मा-जिन-यज्ञमण्डप-होमशालानाञ्च इति।

तत्र केचन मतानुसारेण गणेशः, भैरवः, चण्डी, नकुलीशः, नवग्रहाः, मातृदेवताः, कुबेरश्च दक्षिणाभिमुखं स्थापनीयाः। वानरेश्वरः हनुमन्मुखं सदैव नैर्ऋत्याभिमुखं भवितव्यम्।[17] तथैव वास्तुराजवल्लभेऽपि[18] कथितमस्ति।

**2. पञ्चायतनस्थापनविमर्शः**

पञ्चानां देवानां स्थापनं यत्र क्रियते तदेव पञ्चायतनमुच्यते। प्रासादमण्डनानुसारेण प्रप्रथमं सूर्यस्य पञ्चायतनस्य स्थापनस्य विचारः क्रियते। सूर्यपञ्चायतने देवानां मध्ये सूर्यस्य ततोऽपरं प्रदक्षिणक्रमानुसारेण गणपति-विष्णु-चण्डी-महादेवानां स्थापनं करणीयमिति। सूर्यदेवालये नवग्रहाणां द्वादशादित्यगणानाञ्च स्थापनमपि भवितव्यम्। गणेशपञ्चायतने देवानां मध्ये गणपतेः तदनन्तरं प्रदक्षिणक्रमे चण्डी-महादेव-विष्णु-सूर्याणां स्थापनं करणीयम्। गणपत्यायतनेऽपि द्वादशगणानां स्थापनं भवति। विष्णोरायतनस्य मध्ये विष्णोः ततोऽपरं प्रदक्षिणक्रमे गणेश-सूर्य-अम्बिका-शिवानां स्थापना क्रियते। क्रमेऽस्मिन् चण्डेः आयतनस्य मध्ये चण्डेः स्थापनं भवति, तदनन्तरं प्रदक्षिणक्रमेणैव महादेव-गणेश-सूर्य-विष्णोः स्थापनं करणीयम्। शिवायतनस्य मध्यभागे शिवस्य स्थापनं तदनन्तरं प्रदक्षिणक्रमे सूर्य-गणेश- चण्डी-विष्णूनां स्थापनं भवितव्यम्।[19] सूर्यस्य पञ्चायतने नवग्रहाणां स्थापननिर्देशाः लभ्यन्ते।[20] यथा-

**आग्नेयां तु कुजः स्थाप्यो गुरुर्याम्ये प्रतिष्ठितः।**
**नैर्ऋत्ये राहुसंस्थानं पश्चिमे चैव भार्गवः॥**

---

17. विघ्नेशो भैरवश्चण्डी नकुलीशो ग्रहास्तथा।
मातरो धनदश्चैव शुभा दक्षिणदिङ्मुखाः॥
नैर्ऋत्यदिशिमुखा कार्यो हनुमानवानरेश्वरः॥ प्रासादमण्डनम्, अ.-02, श्लोक-39-40

18. षृ. वामा. देवादिप्रतिष्णीविचार श्लोक 36

19. प्रसादमण्डनम्, अध्यायः-02, श्लोकः-41-45

20. अपराजितपृच्छा, अ, 122, श्लोक-16-17

**वायव्ये केतु संस्थानं सौम्यायां बुध एव च।**
**ईशाने च शनिं दद्यात् प्राच्यां चैव तु चन्द्रमाः।।**

वैष्णवायतनक्रमे प्रोक्तं यत् पूर्वदिशि नारायणस्य, याम्ये पुण्डरीकाक्षस्य, पश्चिमे गोविन्दस्य, उत्तरे मधुसूदनस्य, ईशाने विष्णोः, आग्नेये जनार्दनस्य, नैर्ऋत्ये पद्मनाभस्य, वायव्ये माधवस्य मध्ये केशवस्य स्थापनं करणीयम्। वासुदेवसङ्कर्षणादीनां स्थापनक्रमं यथाक्रमेण भवितव्यम्।[20]

विशिष्टतयाऽत्र शिवायतनसन्दर्भे मतद्वयं प्राप्यते। प्रथमं एकद्वारशिवायतनं[21] द्वितीयं चतुर्मुख-शिवायतनञ्च।[22] ब्रह्मायतनसन्दर्भे कथितं यद् आयतनेऽस्मिन् आग्नेयकोणे गणपतेः याम्ये मातृणां स्थापनं कर्तव्यम्। नैर्ऋत्यकोणे सहस्राक्षस्य, पश्चिमदिशि जलशायी नारायणस्य, वायव्यकोणे उमाशङ्करयोः तथा च समेषां ग्रहाणां स्थापनं उत्तरदिशि भवितव्यम्। ईशानकोणे श्रीदेव्याः पूर्वदिशि धरणीधरस्य स्थापनं करणीयम्।[23] अग्रे गौर्यारायतनस्य सन्दर्भे प्रोक्तं यत् याम्यदिशि मातृकानां, उत्तरदिशि श्रियः, पश्चिमदिशि सावित्रेः, द्वयोः पृष्ठकर्णयोः भगवतीसरस्वत्योः, ईशानदिशि गणपतेः, आग्नेयदिशि कुमारकार्तिकेयस्य तथा च मध्यमे उमायाः स्थापना करणीया। अनेन प्रकारेण स्वपरम्परामाधृत्य देवस्थापना कार्या।

### 3. लिङ्गस्थापनम्-

भारतीयसंस्कृतौ आध्यात्मिकज्ञानधारा वैदिककालादेव उत वा सृष्ट्यारम्भतः सततं विद्यमानास्ति। आवैदिककालाद् आध्यात्मिकपरिप्रेक्ष्ये देववन्दनं पूजनं जपार्चनञ्च दृश्यते। विभिन्नसम्प्रदायेषु विभक्तास्ति एषा आध्यात्मिकधारा। तासां मुख्याः शक्तिपूजकाः शाक्ताः, विष्णूपासकाः वैष्णवाः, शिवसाधकाः शैवाश्च इत्युच्यन्ते। विभिन्नसम्प्रदायेषु पूजनार्चनादीनां विविधनियमानां विधीनाञ्च वर्णनं प्रतिपादितमस्ति। एवमेव शैवधर्मे शिवलिङ्गपूजनविषयेऽपि केचन विशिष्टाः नियमाः प्रतिपादिताः। यथोक्तं शिवपुराणे यत्[25]–

**प्रथमं च गणाधीशं द्वारपालांस्तथैव च।**
**दिक्पालांश्च सुसम्पूज्य पश्चात्पीठे प्रकल्पयेत्।।**
**अथाष्टदलं कृत्वा पूजाद्रव्यसमीपतः।**
**उपविश्य ततस्तत्र चोपवेश्यं शिवं प्रभुम्।।**

---

20. अपराजितपृच्छा, सूत्र 121, श्लो.-11-15
21. अपराजितपृच्छा, सूत्र 121, श्लो.-01-03
22. अपराजितपृच्छा, सूत्र 121, श्लो.-06-08
23. अपराजितपृच्छा, सूत्र 121, श्लो.-09-10
24. अपराजितपृच्छा, सूत्र 121, श्लो.-18-20
25. श्रीशिवमहापुराणम्, व्याख्याकारः - डॉ. ब्रह्मानन्दत्रिपाठी, चौखम्बासुरभारती प्रकाशनम्, 11, श्लोकः 32-34

**त्रयमाचमनं कृत्वा प्रक्षाल्य च पुनः करौ।**
**प्राणायामत्रयं कृत्वा मध्ये ध्यायेच्च त्र्यम्बकम्॥**

शिवस्वरूपविषये वर्णनं चोपलभ्यते यच्छिवः पञ्चमुखदशभुजयुक्तः शुद्धस्फटिक-सदृशकान्तियुक्तः सर्पादिभिरलङ्कृतोऽस्ति। तस्य स्वरूपस्य ध्यानमात्रेण नराणां पापानि विनश्यन्ति। इदं तु प्रतिमानिर्माणाय शिवस्वरूपं वर्तते। परन्तु शिवस्य स्तवनाय तस्यापर-स्वरूपं लिङ्गरूपमस्ति। अग्निपुराणे लिङ्गस्य चलाचलभेदेन मुख्यतया प्रभेदद्वयं दृश्यते। मृण्मयलिङ्गस्य निर्माणं कृत्वा तस्य पूजनादिकं विधाय तस्य जले विसर्जनं क्रियते। इयमेव पार्थिवपूजा। सर्वप्रथमं इयमेव पूजा प्रचलिताऽभवत्। तदा कालान्तरे शिला-काष्ठ-रत्नादिभिः लिङ्गनिर्माणं कृत्वा पूजनस्य पद्धतिः प्रसिद्धा जाता।

शिवस्य साकारनिराकाररूपद्वयेन पूजनं भवति। साकाररूपे शिवमूर्तेः निराकाररूपे च लिङ्गस्य पूजनं भवति। शिवलिङ्गपूजनेन पापादिनिवृत्तिः तु भवत्येव, तेन शिवलोकप्राप्तिरपि भवति। मयमतमिति ग्रन्थे तुच्छलिङ्ग- अधोगत-ऊर्ध्वगत-बालतरुणलिङ्गादीनां वर्णनं प्रतिपादितं वर्तते। तत्र त्रिविधानि लिङ्गानि सन्ति- निष्कलं सकलं मिश्रञ्च। निष्कलं लिङ्गस्वरूपं सकलं मूर्तिरूपं मिश्रम् अर्थात् मुखलिङ्गम्, मुखलिङ्गे सकलनिष्कलयोः मिश्रणं भवति। निष्कलं लिङ्गमात्रस्य तथा च सकलं बेरमात्रस्य साङ्केतिकं वर्तते।[26] तन्त्रसमुच्चयेऽपि निरासाङ्गप्रतिमानां कृते निष्कलं सकलञ्चेति[27] प्रयोगः दरीदृश्यते। सकलनिष्कललिङ्गस्य सन्दर्भेऽस्मिन् भणितमस्ति यत् निष्कलसकलयोः मिश्ररूपं मुखलिङ्गमिति भवति। यस्योच्छ्रायः लिङ्गाकृतेः $1/2$ तुल्यं भवति। बिम्बस्य मूर्तिः शरीराभा सदृशमेव भवति। विश्वमूर्तिसदृशं स्ववैशिष्ट्यमिति प्रतिभाति।

**3.1 लिङ्गभेदाः**—भारतीयवास्तुशास्त्रे त्रिविधानां प्रासादशैलीनां वर्णनमस्ति-नागरी, द्राविड़ी, वेसरी शैली च। प्रासादशैलीमनुसृत्य नागरा-द्राविड-वेसरलिङ्गानां वर्णनमपि समुपलभ्यते। सम्पूर्णभारतवर्षे मुख्यतः एतासु शैलीषु शिवालयस्य निर्माणं सम्प्रत्यपि दृश्यते। दक्षिणभारते यथा द्राविडशैल्याः बाहुल्यं वर्तते तथैवोत्तरभारतवर्षे नागरशैल्याः बाहुल्यं वर्तते। तासां शैलीनां कृते लिङ्गानां मानं प्रमाणमपि भिन्नमस्ति।

**3.1.1 नागरलिङ्गम्**—नागरशैलीमनुसृत्य निर्मितशिवालये गर्भगृहस्य विस्तरार्धमानस्य शिवलिङ्गमधमं भवेत्, प्रासादस्य (गर्भगृहस्य) विस्तारमानस्य पञ्चभागान् कृत्वा त्रिभागतुल्यं शिवलिङ्गं श्रेष्ठं भवति। अनयोर्मध्ये अष्टभागं कृत्वा नवविधलिङ्गानि भवन्ति।[28]

**3.1.2 द्राविडलिङ्गम्**—द्राविडप्रासादस्य गर्भगृहमानं एकविंशति (21) विभागेषु विभक्ते सति दशभागतुल्यं शिवलिङ्गम् अधमं, त्रयोदशभागं तुल्यं लिङ्गं श्रेष्ठं तथा च अधमश्रेष्ठमानयोः मध्ये अष्टभागं कृत्वा शिवलिङ्गस्य नवविधमानानि भवन्ति। एतेषां लिङ्गानां पीनत्वन्तु उच्छ्रायस्य

26. अग्निपुराण अध्याय 33, श्लोक 01
27. उद्धृत तत्रैव पृष्ठ 348
28. मयमतम् अ. 33. श्लोक $39\frac{1}{2}$ -422
29. मयमतम् अध्याय 33, श्लोक 42 -44

एकविंशतिभागं कृत्वा षट्, पञ्च, चतुर्वा भागतुल्यं क्रमशः जयदपौष्टिकसार्वकामिकसंज्ञानुसारमेव भवति।[29]

**3.1.3 वेसरलिङ्गम्**–वेसरप्रासादे गर्भगृहस्य मानस्य पञ्चविंशतिभागस्य त्रयोदशांशतुल्यं लिङ्गं हीनलिङ्गं तथा च षोडशांशतुल्यं श्रेष्ठं लिङ्गं भवति। पूर्वोक्तप्रकारेणात्रापि नवविधलिङ्गानि ज्ञेयानि। तत्र जयदादिभेदानां मानन्तु पञ्चविंशतौ क्रमशः अष्ट, सप्त, षड्मितं ज्ञेयम्।[30]

तत्र द्रव्यभेदवशात् षडविधलिङ्गानां वर्णनमप्युपलभ्यते। तथा च प्रभेदवशात् एतेषां सङ्ख्या चत्वारिंशत् मन्यते। अर्थात् लिङ्गानां द्रव्यभेदवशात् षड्भेदाः (06), चत्वारिंशत् (40) प्रभेदाश्च समुपलभ्यन्ते। प्रथमं लिङ्गं शैलजम् इति नाम्ना ज्ञायते। अस्य चत्वारः (04) उपविभागाः सन्ति। द्वितीयं रत्नजनितलिङ्गं भवति। एतस्य सप्त (07) उपविभागाः भवन्ति। तृतीयं धातुजं लिङ्गमस्ति, यस्य अष्ट (08) उपविभागाः प्राप्यन्ते। चतुर्थं काष्ठनिर्मितं लिङ्गमस्ति तस्य षोडशोपविभागाः (16) कथिताः। पञ्चमं मृण्मयलिङ्गमस्ति अस्य द्वौ (02) उपविभागौ स्तः। षष्ठमं क्षणिकलिङ्गं यस्य सप्तोपविभागाः कथिताः सन्ति। क्रमेऽस्मिन् लिङ्गानां फलमपि प्रतिपादितमस्ति[31]–

| **लिङ्गस्य प्रकारः** | **फलम्** |
|---|---|
| 1. रत्नलिङ्गम् | भाग्यदायकम् |
| 2. शैलजलिङ्गम् | सिद्धिदायकम् |
| 3. धातुलिङ्गम् | धनदायकम् |
| 4. मृत्तिकालिङ्गम् | सर्वसिद्धिदायकम् |
| 5. काष्ठलिङ्गम् | सांसारिकभोगदायकम् |

अनेन प्रकारेण लिङ्गानां लक्षणानि वास्तुशास्त्रे विस्तरेण कथितानि सन्ति। परन्तु एतानि लिङ्गानि यदा पतितानि, स्फुटितानि, वक्राणि, अशुद्धादीनि जातानि तदा एतेषां जीर्णोद्धारः करणीयो भवति। लिङ्गस्य पतिते सति यदि कश्चिदज्ञपुरुषः तल्लिङ्गं पुनः स्थापयति तदा तत्तुच्छं लिङ्गं जानीयात्। यतोहि शास्त्रविधिरहितस्थापनं तुच्छं ज्ञेयम्। तत्र सूर्यकिरणानभिहतं अन्यलिङ्गं स्थापयेत्। एवमेव चाण्डालादिभिः अन्तरिते सति अथवा अपवित्रस्थाने अपवित्रवस्तुभिः साकं स्थितं लिङ्गमपि तुच्छलिङ्गं भवति। तथैव गर्तस्थितं पीठस्य खातस्य निम्नतले वा स्थितं लिङ्गमपि तुच्छलिङ्गं भवति। एवमेव अनभीष्टमार्गास्यमर्थात् यस्य लिङ्गस्य दिशा विहितदिशाविरुद्धाऽस्ति तदापि लिङ्गं तुच्छं ज्ञेयम्। एतादृशानां लिङ्गानामुद्धारः प्राज्ञेन करणीयः। अस्माद्धेतोः शास्त्रविधिपूर्वकं नूतनं लिङ्गं स्थापयेत्। अनभीष्टमार्गतास्यं लिङ्गं प्राज्ञैः समीकुर्यात् अर्थात् विधिपूर्वकं विहितदिशायां तं लिङ्गं स्थापयेत्।[32]

30. मयमतम् अध्याय 33 श्लो, 44 –47
31. लिङ्गपुराणम्, अध्यायः 74, श्लोकः 13–18
32. मयमतम्, अध्यायः 35, श्लोकः 19–2014

### 3.2 शिवलिङ्गस्थापने निर्देशः

तत्र पतितादिलक्षणयुक्तस्य शिवलिङ्गस्य स्थापना करणीया न वा अथवा कथं करणीया? इति विषये मयमते विस्तरेण चर्चा मिलति। तस्यानुसारेण यदि नद्यां लिङ्गं पतितं तर्हि तन्नीत्वा अन्यस्मिन् शतदण्डदूरे दैविकविधिना शुद्धस्थाने तस्य स्थापना करणीया। एवमेव सर्वलक्षणोपेतं निर्दोषलिङ्गं केनचिदज्ञेन मन्त्रक्रियारहितम् अज्ञानतापूर्वकं स्थापितमस्ति, तदा तल्लिङ्गं पुनः विधिपूर्वकं स्थापनीयम्। यदि किञ्चिल्लिङ्गं लक्षणहीनं, दग्धं, जीर्णं, स्फुटितं, भग्नं वा दृश्यते परन्तु तस्य लिङ्गस्य पूजनमर्चनमपि भवति तथापि तत्र तल्लिङ्गं त्यक्त्वा दोषरहितनूतनलिङ्गस्य स्थापना कार्या। कदाचित् लिङ्गस्थापनाकाले दिङ्मूढत्वात् अज्ञानाद्वा शिवलिङ्गस्योर्ध्वभागं अधोमुखं स्थापितं भवति अथवा विरुद्धदिशि तस्य मुखं स्यात्, विपरीतं वा स्थापना भवेत्तदा तल्लिङ्गं परित्यज्य तत्स्थाने नियमपूर्वकं नूतनलिङ्गं स्थापयेत्। एवमेव लिङ्गस्थापने अन्यदोषा अपि भवन्ति। तद् विषये मयमते कथितं यत् सर्वलक्षणोपेतमपि यदि लिङ्गं शून्यतलं अक्षयुतं वा स्यात् (अर्थात् उचिताकृतिहीनं स्यात्) अथवा त्याज्यक्षेत्रे स्थितं स्यात्तदाऽपि तल्लिङ्गं स्थापनयोग्यं न भवति। तस्य लिङ्गस्य च परित्यागः करणीयः। तत्स्थाने नूतनलिङ्गं स्थापयेत्। यदि किमपि लिङ्गं चोरात् चोरितं, तत्तु पञ्चसन्धानान्तर्गतं पतितं तदा यदि लिङ्गं निर्दोषमस्ति तर्हि तत्रैव विधिना स्थाप्यम्। एवमेव चाण्डालशूद्रादिभिः स्पृष्टं लिङ्गं पूजनयोग्यं न भवति। यदि नदीतटे मन्दिररहितं लिङ्गं दृश्यते तदा तस्मात् स्थानात् पूर्वदिशि उत्तरदिशि वा नीत्वा शुभे स्थाने विधिपूर्वकं स्थाप्यम्।[33] अत्र स्थापनसमये ध्यातव्यं यद् यदि किञ्चिल्लिङ्गं द्वादशवर्षाधिकं पूजार्चना-रहितमस्ति तदा निर्दोषे सत्यपि तल्लिङ्गं त्यजेत्। यथा-

**द्वादशवर्षादूर्ध्वं शून्यत्वं याति यल्लिङ्गम्।**
**तत्तन्निर्दोषं यदि नाग्राह्यमिदं वदन्ति केचिज्ज्ञाः॥**
**शिलामयं तदंसुके निक्षिपेत् त्वरितं बुधः।[34]**

अनेन प्रकारेण शिवलिङ्गस्थापना कार्या। अत्र प्रसङ्गवशाद् शिवलिङ्गप्रतिष्ठाकालः विचार्यते। सामान्यदेवप्रतिष्ठामुहूर्त्तमतिरिच्य श्रावणमासेऽपि शिवलिङ्गप्रतिष्ठा शुभा भवति॥[35] अत्र स्पष्टार्थं स्थापनामुहूर्तसारिणीं प्रस्तूयते-

| | |
|---|---|
| अयनम् | उत्तरायणम् |
| चान्द्रमासः | पौष-माघ-फाल्गुन-चैत्र-वैशाख-ज्येष्ठमासाः |
| पक्षः | शुक्लपक्षः |
| तिथिः | 1, 2, 3, 5, 6, 7, 10, 11, 13 एवं 15 तिथयः |

33. तत्रैव श्लो. 23-28
34. तत्रैव 32-324
35. बृहद्वास्तुमाला पृष्ठ-173, श्लोक 09

| | |
|---|---|
| नक्षत्रम् | रोहिणी-मृगशिरा-आर्द्रा-पुनर्वसु-रेवती-पुष्य-अनुराधा-श्रवण-मूल-स्वाती-अश्विनी-चित्रा-मघा-उत्तरभाद्रपद-उत्तराषाढा-उत्तराफाल्गुनीनक्षत्राणि |
| वार | सोम-गुरु-शुक्र-बुधवासराः |
| लग्नराशिः | वृष-मिथुन-सिंह-कन्या-वृश्चिक-कुम्भ-मीनलग्नानि |
| उदयास्तविचारः | सोमबुधगुरुशुक्राणाम् उदयकाले |
| लग्नशुद्धिः | लग्नात् त्रिषडायेषु (3,6.11) सूर्यशनिभौमचन्द्राः शुभाः, अष्टमस्थानं ग्रहवर्जितं, षट्सप्तदशमस्थानानि (6,7,10) विहाय शुक्रः शुभः |
| योगायोग विचारः | –उत्तराषाढानक्षत्रे सोमवासरे शुभम्।<br>–हस्ताश्विनीनक्षत्रे भौमवासरे विवर्जिते<br>–मृगशिरा-त्र्युत्तरा नक्षत्राणि बुधवासरेण सह वर्जनीयानि<br>–श्रवणपुष्यनक्षत्रे शुक्रवासरेण सह विवर्जिते<br>–बुधवासरे द्वितीयातिथिः, गुरुवासरे षष्ठीतिथिः, एकादश्यां चन्द्रवासरः अशुभः<br>–सप्तम्यां तिथौ रेवतीनक्षत्रं प्रजाहानिं करोति<br>–अन्धसंज्ञकनक्षत्राणि नपुंसकनक्षत्राणि च स्थापनकर्मणि वर्जनीयानि<br>–धूलिवर्षणे, रक्तवर्षणे, मेघगर्जनसमये, उल्कापाते, दिग्दाहे, सूर्यचन्द्रयोः ग्रहणसमये, षडशीतिमुखसङ्क्रान्तिकाले स्थापनकर्म न करणीयमिति। |
| होराद्रेष्काण-नवांशादिः | शुभग्रहाणां राशिः |

### 3.3 लिङ्गस्थापने द्रव्यादिनिर्देशः

तरुणालयनिर्माणाय पाषाणलोहकाष्ठानां प्रयोगः क्रियते, परञ्च बालस्थापनाय सरल-कालज-चन्दन-सालक-खदिरमारुद-पीपल-तेन्दवादीनां काष्ठानां प्रयोगो भवति।[36] इदमेव द्रव्यं लिङ्गादिनिर्माणेऽपि प्रयोज्यं भवति।

### 3.4 बालतरुणयोः लिङ्गप्रमाणम्

बाललिङ्गस्योदयमानम् अर्थात् बाललिङ्गस्योच्छ्रितिः तद्गर्भगृहस्योच्छ्रायमानस्यार्ध श्रेष्ठं भवति। गर्भस्योच्छ्रायमानस्य चतुर्थांशमानं यदि बाललिङ्गस्य स्यात्तदा अधममानमस्ति। अनयोः श्रेष्ठहीनयोः मध्ये यदन्तरं तस्मिन् अष्टभिर्भक्ते सति यन्मानं प्राप्यते तत्क्रमेण वारम्वारं अधममाने योजनेन अन्यमानानि प्राप्यन्ते। अनेन प्रकारेण अधममानतः श्रेष्ठमानपर्यन्तं बाललिङ्गस्य नवविधमानानि

36. मयमतम् अध्याय 35, श्लोक 57

प्राप्यन्ते। यथा कल्प्यते-

गर्भगृहस्योच्छ्रायमानम् = 32 हस्तमितम्

तदा 32  2 = 16 श्रेष्ठमानम्

एवमेव 32  4 = 8 अधममानम्

ततः श्रेष्ठाधमयोरन्तरम् = 16-8 = 8

अस्य अष्टमांशः यदा क्रियते तदा 8  8 = 1 हस्तमानम्

ततः प्राप्तमानम् अधममाने उत्तरोत्तरं योजनेन-

| | | | | | | |
|---|---|---|---|---|---|---|
| 1. | 8 | अधममानम् | | | | |
| 2. | 8 | + | 1 | | = | 9 |
| 3. | 9 | + | 1 | | = | 10 |
| 4. | 10 | + | 1 | | = | 11 |
| 5. | 11 | + | 1 | | = | 12 |
| 6. | 12 | + | 1 | | = | 13 |
| 7. | 13 | + | 1 | ÷ | = | |
| 8 | 14 | + | 1 | | = | 15 |
| 9. | 15 | + | 1 | | = | 16 श्रेष्ठमानम् |

अनेन प्रकारेण अधममानतः श्रेष्ठमानपर्यन्तं बाणलिङ्गस्य नवविधमानानि जातानि। बाललिङ्गस्योच्छ्रायमनुसृत्यैव तत्परिधिः निर्मातव्या। तत्र तरुणलिङ्गस्यापि नवविधमानानि प्राप्यन्ते। पञ्चदशाङ्गुलमितम् अधममानं ततः क्रमशः 16, 17, 18, 19, 20, 21, 22, 23 अङ्गुलपर्यन्तं नवविधमानानि सन्ति। मानमिदं तरुणलिङ्गस्य भूमेरन्तःस्थे तरुणलिङ्गसमुन्नत्यर्थं वर्तते। तत्र पीठन्तु लिङ्स्योच्छ्रायस्य भागतुल्यं भवति। तरुणलिङ्गस्योच्छ्रायमानं मूलप्रासादस्य मूलतलस्य सममपि भवितुं शक्यते। परञ्च तत्हीनं यदि भवेद् तदा तस्यार्धमानस्य प्रमाणतः हीनं न स्यात्। उक्तद्वयोः मानयोरन्तरं यदि अष्टभिः विभक्तं क्रियते तदा नवविधोदयमानानि प्राप्तानि भवन्ति।[37]

वास्तुशास्त्रोक्तप्रमाणानुसारेण प्रासादादिषु प्रतिमादिस्थापनं करणीयम्। वास्तुग्रन्थेषु निर्दिष्टनिर्माणप्रक्रियायाः चिन्तनं मानवकल्याणाय एव कृतम् अस्मदाचार्यैः। दिग्देशकालामाधारी-कृत्यैव ऋषिभिः प्रतिमास्थापनविधिः प्रतिपादितोऽस्ति। अतः तस्यानुसारेणैव प्रतिमास्थापनं नूनमेव स्थापनकर्त्रेः समाजाय च सुखकरं लाभप्रदञ्च भविष्यतीति।

---

37. मयमतम् अध्याय 35, 51-53

# वास्तुशास्त्रे प्रतिमालक्षणानि

**रितिका अग्रवाल**

प्रतिमायाः शाब्दिकोऽर्थोऽस्ति – प्रतिरूपम् अथवा समानाकृतिः । महर्षिपाणिनिना 'इवप्रतिकृतौ'[1] सूत्रेऽस्मिन् समरूपशब्दस्य कृते प्रतिकृति इति शब्दस्य प्रयोगः कृतोऽस्ति। प्रतिमाविज्ञानस्य कृते आंग्लभाषायां Iconography शब्दस्य प्रयोगो भवति। icon शब्दस्य तात्पर्य देवतायाः ऋषेः वा रूपमस्ति, यत्तु कलायां चित्रितं भवति। ग्रीकभाषायामस्य कृते 'इकन' (eiken) शब्दस्य प्रयोगः जातः। 'अस्य पर्यायास्तु अर्चा', 'विग्रहः' 'तनुः', तथा 'रूपं' शब्दाः। ऋग्वेदे[2] अपि प्रतिमायाः कृते 'अर्चा' शब्दस्य प्रयोगः दृश्यते। प्रतिमाशब्दस्य प्रयोगः वस्तुतः तत्र तासां मूर्तीनां कृते वर्तते, यासां केनापि धर्मेण सम्प्रदायेन वा सम्बन्धो भवति। एताभिः उपासकः स्वभक्तिपूर्णोपासनां स्वस्याराध्यदेवं समर्पयति।

विदितमस्ति यत् देवप्रतिष्ठापूजनं सनातनधर्मस्य मुख्यः आधारो वर्तते । आवैदिककालादेव भक्तिभावनायाः विकासः मानवसभ्यतायां दरीदृश्यते। वैदिककालादेव देववन्दनस्यावधारणा दरीदृश्यते। कालान्तरेण देवानां पूजनं वृक्ष-औषधि-जलाशयादिषु अभवत्। शनैः शनैः प्रतिमालिङ्गानामवधारणा जाता। देवपूजनस्यावधारणा साकारनिराकारयोः रूपयोः प्राप्यते। निराकाररूपे ब्रह्मप्राप्तिविषये उपनिषत्प्रमाणमेव मन्यते। ध्यानावस्थया ब्रह्मणः निराकाररूपस्य प्राप्तिविषये अद्वैतसिद्धान्तो मुख्यस्रोतः वर्तते। ब्रह्मणः देवस्य वा साकाररूपे अभिकल्पना भारतीयपरम्परायां मूर्तिपूजनरूपे आरम्भो जातः। वैदिकपौराणिकसाहित्ये परिकल्पितदेवानां स्वरूपमाधारीकृत्य देवप्रतिमादीनां मानप्रमाणयुक्ताङ्गादिनिर्माणं एतेषां स्वरूपस्यालङ्करणं च दृश्यते मन्दिरेषु। ततः प्रतिमार्थमुपयुक्तशिलाचयनं, प्रतिमालक्षणं, मूर्तीनां जीर्णोद्धारविधिः, एतेषां प्रतिमानां मानादिप्रमाणञ्चेति विषयमधिकृत्य विविधवास्तुशास्त्रीयमानकग्रन्थेषु वर्णनं समुपलभ्यते । तत्र शास्त्रेषु प्रतिमानिर्माणे प्रायः दोषरहितपाषाणस्य प्रयोगस्य मतमस्ति।

**प्रतिमार्थमुपयुक्तशिलाचयनम् –**

प्रतिमानिर्माणे शिलाचयनं शीर्षस्थानं धारयति। देवानुसारेण, वर्ण-धर्मानुसारेण शिलाचयनं करणीयम्। शिलाः त्रिविधाः भवन्ति-पुरुष-जातिकाः, स्त्री-जातिकाः तथा नपुंसक-जातिकाः शिलाः।

शिलाभेदानुसारं तस्योपयोगस्य प्रसङ्गे मण्डनः मयादिपुरातनाचार्याणां[3] समर्थनं करोति। यथा–

1. पाणिनि अष्टाध्यायी, 5/3/96,
2. ऋग्वेदः , 7/9/19
3. मयमतं 33, 1-3, 10, 33, 11-12 । काश्यपशिल्प 49, 59-60,80,13 । अग्निपुराण 52,14 । मत्स्यपुराण 266, 5 । समराङ्गणसूत्रधार 70, 140 । शिल्परत्न 14, 16-17 उद्धृत दे. मू. प्र. भूमिका पृ. 22

| | | |
|---|---|---|
| **पुरुषशिला** | – | शिवलिङ्गः तथा देवप्रतिमाः । |
| **स्त्रीशिला** | – | पीठिका अथवा जलहरी । |
| **नपुंसकशिला** | – | ब्रह्म–कूर्मशिला, प्रासादतलकुंडादयः । |

भूमिगतशिलास्वरूपस्यानुसारं प्रतिमायाः अंग–निर्माणाकृतिविषये, ग्राह्याग्राह्यशिलालक्षणविषये च अस्माभिराचार्यैः सूक्ष्मतया विचारं कृतमस्ति। काश्यपादिभिः शिलाचयनविषये कथितमस्ति यत् प्रतिमापीठिकायाः शिवलिङ्गस्य च निर्माणाय सैव शिला उपयुक्तास्ति या सघनैकसारा छिद्ररहिता, सुगंधा, मधुरकान्तियुक्ता अथवा प्रभविष्णुयुक्ता भवति। तत्र कपोतसदृशवर्णा, कुमुदपुष्पनिभा, भ्रमरकान्तियुक्ता माषनिभा कृष्णवर्णा शिला, घृतोपमा पीता शिला, श्वेतकमलदृशा शिला च प्रतिमार्थं समुपयुक्ता स्यात्।[4]

**प्रतिमालक्षणविचारः –**

प्रतिमालक्षणस्य विचारः प्रतिमानां प्रमाणस्य, तालवर्णयोः, आसनस्य , वाहनादेः अनुरूपं करणीयम्। प्रतिमानिर्माणे प्रायः दोषादिरहितानां पाषाणानां प्रयोगः करणीयः। भागवत्महापुराणे अष्टविधानां प्रतिमानामुल्लेखो वर्तते।[5] यथा–

**शैलीदारूमयी लौही लेप्या लेख्या च सैकती।**
**मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता॥**

शास्त्रेषु प्रतिमानामाकारविषये अपि वर्णनं मिलति । यथा – समङ्गुलप्रतिमायाः स्थापना न कर्त्तव्या । विषमाङ्गुलप्रतिमायाः स्थापना शुभा भवति।

वेदेषु तिसृणां प्रतिमानां निर्देशः प्राप्यते, यथा– सात्विकी, राजसी तथा तामसी प्रतिमाः।[6]

**सात्विकीप्रतिमालक्षणम् –**

या प्रतिमा स्वाभाविकप्रसन्न– योगमुद्रा – वरदान– अभयदानमुद्राभिः युक्ता भवेद्, देवादिभिश्च यस्याः स्तुतिर्भवति, सा सात्विकी प्रतिमा।[7]

**राजसिकी प्रतिमालक्षणम् –**

या प्रतिमा वाहनोपरि विराजमाना, नानाविधाभूषणैः सुसज्जिता, अस्त्र–शस्त्रयुता अभयदान–मुद्रायामवस्थिता स्यात् सा राजसिकी प्रतिमा कथ्यते।[8]

4. काश्यपशिल्प 49, 44–47 । मयमतं 3, 43, 14–15 । उद्धृत मू. प्र. भूमिका पृ. 22,
5. भागवतमहापुराण 11/27/12 उद्धृत आचारदिनकर, वास्तुसर्वस्व पृ 229
6. सात्विकी राजसी देव प्रतिमा तामसी त्रिधा ।
   विष्णवादीनां च या यत्र पूज्या तु तत्रतादृशी।। शुक्रनीतिः अ. 4, श्लोक 80
7. योग मुद्रान्विता स्वस्था वराभयकरान्विता ।
   . देवेन्द्रादितनुता मूतिः सात्विक सात्विकी सा प्रकीर्तिता ।। तत्रैव श्लोक – 81
8. तिष्ठति वाहनोपरिस्तथा वा नानाभरणभूषिता ।
   या शस्त्रास्त्राभयवरकरा या राजसी स्मृता ।। शुक्रनीतिः अ. 4, श्लोक 82

**तामसीप्रतिमालक्षणम् -**

एतादृशा प्रतिमा शस्त्रास्त्रादिभिः युता, शत्रुवधकारिणी दैत्यहन्त्री उग्रस्वरूपयुता सदैवयुद्धाभिलाषिणी च दृश्यते।[9]

**शिलाभेदाः -**

प्रतिमा-पीठिकादीनां कृते सा शिला उपयोगिनी समुचिता च भवति, या सघना निविड़ा कठोरा, सुगन्धयुक्ता मधुरा कान्तियुक्ता, कोमला छिद्ररहिता स्यात् एतादृशायाः शिलाया उपरि मूर्तिनिर्माणलिङ्गस्य निर्माणं वा कारयेत्।[10]

एवमेव शुक्रनीतिग्रन्थेऽपि कथितमस्ति यच्छुभलक्षणैः युक्ता शिला या कपोतवर्णा कुमुदवर्णयुक्ता, माष-मुद्ग-घृतं-कृष्णवर्णा पीतवर्णा तथा श्वेतकमलदृशा शिला सा सर्वसुखप्रदायिका अस्ति।[11]

अन्येषु ग्रन्थेषु त्रिविधानां शिलानां वर्णनं मिलति - पुरुष शिला, स्त्री शिला, नपुंसक शिला। मयानुसारं काश्यपानुसारं च श्वेता, रक्ता, पीता श्यामवर्णशिला क्रमशः ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां कृते उपयोगी अस्ति।[12] सितवर्णा शिला विशेषरूपेण सर्वेषां प्रशस्ताऽस्ति।[13]

**प्रशस्तशिलाः -**

एकवर्णा शिला, सुदृढा अथवा यौवना, मनोरमा, स्निग्धा भवति। या शिला भूमेरधःस्था, एकवर्णा, सघना, समुचिता व्यासदैर्घ्ययुता, मनोरमा च स्यात् सा शिवलिङ्गादेः निर्माणाय उपयोगिनी भवति ।[14] 'मानसार' ग्रन्थानुसारेण - यस्याः शिलायाः मूलभागः, अग्रभागः तथा मध्यभागः समानो

---

9 . शस्त्रास्त्रैर्दैत्यहन्त्री या ह्युग्ररूपधरा सदा ।
युद्धाभिनन्दिनी सा तु तामसी प्रतिमोच्यते ।। तत्रैव श्लोक 83

10. निविडा निर्व्रणाऽमृद्वी सुगन्धा मधुरा शिला ।
सर्वार्चालिङ्गपीठेषु श्रेष्ठा कान्तियुता च या ।। रूपमण्डन , अ. 1, श्लोक 3

11. कपोतभृङ्गकुमुदमाषमुद्गासितोपमा ।
पाण्डुरा घृतपद्माभा सर्वार्चासु शुभा शिला ।। रूपमण्डन अ. 1, श्लोक 5

12. श्वेत रक्ता च पीता च विप्रादीनां सितासिता । मयमतं 33, 4

13. श्वेता रक्ता च पीता च कृष्णा चैव चतुर्विधा ।
हरिता कृष्णा शिला ग्राह्या सितवर्णा विशेषतः ।। काश्यपशिल्पं 49 - 50

14. एकावर्णा घना स्निग्धा शिला भूमि निमग्नका ।
व्यासायामवती ग्राह्या यौवनातिमनोरमा।।
वातातयानलालीढा मृद्वी क्षाराम्बुसंश्रिता।। मयमतं 33, 4-5

15. मूलमग्रं च मध्यं च समाकारं तु पुंशिला ।
स्थूलमूलं कृशाग्रं स्यात् स्त्रीशिला तु प्रकाशिता ।
स्थूलाग्रं च कृशं मध्ये स्थूलं नपुंसकं शिला ।अग्निपु.43,14- 15

भवेत् सा पुरुषशिला। मूले स्थूला तथा अग्रभागे कृशा निर्बला वा शिला स्त्रीसंज्ञकशिला तथा च - मूले स्थूला , अग्रे कृशा तथा मध्यभागे स्थूला नपुंसकशिला भवति।[15]

अग्निपुराणानुसारेण - यदि कस्याश्चित् शिलायाः कांस्यनिर्मितघण्टा इव ध्वनिः जायते तथा छेदने स्फुर्लिङ्गाः समुत्पद्यन्ते सा पुल्लिङ्गशिला भवति। उपर्युक्तं चिह्नं यस्यां शिलायां न्यूनं तर्हि सा स्त्रीसंज्ञिका भवति। यस्यां पुल्लिङ्ग-स्त्रीसंज्ञिका उभयोः लक्षणं न प्राप्यते तर्हि नपुंसकसंज्ञकशिला ज्ञायते।[16]

**प्रतिमाद्युपयोगिनीशिला** -

शिवलिङ्ग-राम-कृष्ण-गणेश-ब्रह्मादिदेवानाप्रतिमानिर्माणं पुरुषजातिशिलया भवेत्। पिण्डिकायाः देवीनां च प्रतिमानिर्माणं स्त्रीजातिशिलया स्यात् तथा देवालय-भवन-कुण्ड-वाप्यादीनां निर्माणे विशेषरूपेण भित्तितलभागे नपुंसकशिलानामुपयोगः कर्त्तव्यः।[17]

**गृहदेवालयेषु प्रतिमाप्रमाणम्** -

एकाङ्गुलप्रमाणतः द्वादशाङ्गुलपर्यन्तप्रमाणयुता प्रतिमा गृहे पूजनयोग्या भवति। प्रयत्नेन देवानां प्रतिमा प्रमाणयुक्ता भवेत्। प्रमाणहीनप्रतिमासु सदैव पिशाचदैत्यदानवादयः निवसन्ति।[18] सर्वलक्षणयुता देवप्रतिमा एव स्थापनयोग्या भवति। श्रेष्ठा प्रतिमा सदैव प्रशंसनीया भवति अपि च आयु - यश - धन-धान्यकर्त्री भवति। मतान्तरेण एकस्यांगुलस्य प्रतिमा श्रेष्ठा, अङ्गुलद्वयस्य प्रतिमा धनस्य नाशकर्त्री त्र्यङ्गुलस्य प्रतिमा सिद्धिदात्री, चतुरंगुलस्य पीडादात्री, पञ्चाङ्गुलस्य वृद्धिकर्त्री, षडाङ्गुलस्य उद्वेगकर्त्री, सप्ताङ्गुलस्य गौरववृद्धिकर्त्री, अष्टाङ्गुलस्य हानिदा नवाङ्गुलस्य पुत्रवृद्धिदा, दशाङ्गुलस्य धननाशदा, एकादशाङ्गुलस्य च प्रतिमा सर्वकार्यसिद्धिदायिनी भवति।[19]

**प्रतिमानिर्माणे द्रव्यादिचयनम्** -

प्रतिमा अष्टलौहमयी, शैलोत्पन्ना पाषाण-रत्नादिभिर्निर्मिता श्रेष्ठवृक्षाणां काष्ठेन रचिता

---

16. कांस्यघण्टानिनादा स्यात्पुल्लिङ्गा विस्फुर्लिङ्गका ।
तन्मन्दलक्षणा स्त्री स्याद्रूपाभावान्नपुंसका ।। देवतामूर्तिप्रकरणम् 1, 5-6
17. वास्तु एवं शिलाचयन , अ. - 1, पृ. सं. 13
18. आरभ्येकाङ्गुलादूर्ध्वं पर्यन्तं द्वादशाङ्गुला ।
गृहेषु प्रतिमा पूज्या नाधिका शस्यते ततः ।। रूपमण्डन , अ. 1, श्लोक - 7
19. अथातः सम्प्रवक्ष्यामि गृहबिम्बस्य लक्षणम् ।
एकांगुले भवेच्छ्रेष्ठं द्वयंगुलं धननाशनम् ।।
त्र्यंगुले जायते सिद्धिः पीडा स्याच्चतुरंगुले ।
पंचांगुले तु वृद्धिः स्यात् उद्वेगस्तु षडंगुले ।
एकादशागुंलं बिम्बं सर्वकामार्थसाधनम् ।
एतत्प्रमाणमाख्यात मत उर्ध्वं न कारयेत् ।। वास्तुसर्वस्व, अ.47,पृ.229

प्रवालादिभिः निर्मिता च शुभा कथ्यते ।[20]

प्रतिमानिर्माणे प्रायशः दोषरहितपाषाणानां प्रयोगः करणीयः। भागवते त्वष्टविधानां प्रतिमानामुल्लेखः प्राप्यते। पाषाणमयी, काष्ठमयी, लौहमयी, लेपेन निर्मिता, लेखन्या उल्लिखिता, सिकतादिभिर्निर्मिता, मनोमयी मणिना च निर्मिता।[21]

स्वर्ण-रजत-ताम्रादिधातुभिः विनिर्मिताः प्रतिमाः श्रेष्ठाः भवन्ति। कांस्य-सीस-बङ्गमयीप्रतिमां कथमपि न स्थापयेत्। मिश्रधातुषु पित्तलस्य च प्रतिमास्थापने न कोऽपि दोषः ।[22]

**मूर्तीनां जीर्णोद्धारविधिः -**

यदा काऽपि प्रतिमा शतवर्षाधिका पुरातनी स्यात् सा, खण्डिता स्फुटिता वापि भवेत्, शास्त्रानुसारं यदि सिद्धासीत् सा तदा मूर्तिः पूजनयोग्या भवति, दोषदा न भवति। परन्तु शतवर्षाल्पा प्रतिमा खण्डिता अथवा विस्फुटिता भवेत् तर्हि तु सा प्रतिमा दुःखप्रदा भवति ।[23]

यदि प्रतिमा धातु-रत्न-भित्तिचित्रादिभिः निर्मिता स्यात्, यदि सा मूर्तिः विकृता अथवा विखण्डिता जायते तदा सा संस्कारयोग्या भवति। काष्ठपाषाणनिर्मिता प्रतिमा यदि खण्डिता स्फुटिता वा भवेत् तदा सा संस्कारयोग्या न भवति।[24]

प्रतिमायाः निर्माणं पूर्वमानानुसारं पूर्वद्रव्यनुरूपं च करणीयम्। तद्द्रव्यं पूर्वमानस्य द्रव्यात् न्यूनमधिकं वा न भवितव्यम्। मतान्तरेण द्रव्यप्रयोगे वृद्धिः एव शुभा। शतवर्षाधिका प्राचीनप्रतिमा यदि खण्डिता तदापि पूजनयोग्या भवति। तां न त्यजेत्।[25]

या प्रतिमा महात्मादिभिः श्रेष्ठजनैः स्थापिता सा प्रतिमा विखण्डिताऽपि पूज्या भवति। प्रतिमया सह वाहन-वेष-भूषादयः यदि खण्डिता तदापि पूजनीया। या प्रतिमा महात्माभिः स्थापिता न

---

20. अष्टलौहमयीमूर्तिः शैलरत्नमयी शुभा ।
    श्रेष्ठवृक्षमयी वाऽपि प्रवालादिमयी शुभा ।। रूपमण्डन, अ.1, श्लोक 10
21. भागवतम् 11/27/12
22. स्वर्णरूप्यताम्रमयं वाच्यं धातुमयं परम् ।
    कास्यसीसबङ्गमयं कदाचिन्नैव कारयेत् ।
    तत्र धातुमये रीतिमयमाद्रियते क्वचित् ।
    निषिद्धो मिश्रधातुः स्याद् रीतिः कैश्चिच्च गृह्यते ।। वास्तुसर्वस्व पृ. 229 - 230
23. अतीतब्दः ताब्दः शता मूर्तिः पूज्या स्यात्तु महत्तमैः ।
    खण्डिता स्फुटिताऽप्यर्च्या अन्यथा दुःखदायिका ।। दे.मू.प्र. अ.1श्लो 27,रूपमण्डन श्लोक 11,पृ. 112
24. धातुरत्नविलेपोत्था व्यङ्गाः संस्कारयोग्यकाः ।
    काष्ठपाषाणजा भग्नाः संस्कारार्हा न देवताः ।। रूपमण्डन श्लोक 12, पृ. 112
25. पूर्वमाना कृता तिद्रव्यैस्तुल्यं द्रव्याधिकं हि वा ।
    शुभं हीनाधिकं हीनाद्विकं? तेषुमथ वर्षशतात्परम् ।। श्लोक - 194- वास्तुमञ्जरी, पृ. 291

जाता तस्याः पूजनं मृत्युदायकं भवति।[26]

**शुभप्रतिमा-**

यस्याः प्रतिमायाः सन्धि-अस्थि-शिरादयः दृश्यन्ते सा प्रतिमा सर्वदा सुखं प्रददाति।[27] यदि प्रतिमा शास्त्रोक्तनियमानुसारमङ्गैः परिपूर्णा तदा पुण्यदात्री तथा मनोहरा भवति। यद्यन्यथा रीत्या निर्मितास्यात्, तर्हि तु आयुर्धनादीनां नाशकर्त्री दुःखदायिनी च भवेत्।[28] देव-प्रतिमा शुभा स्वर्गप्रदा च भवति तथा मनुष्य-प्रतिमा अशुभ स्वर्गदा न भवति। देवी-देवानां स्वरूपं सर्वदा सुन्दरं तथा मनोहरं च भवेत्। देवानां दीप्तिः (आभाकान्तिः वा) सिंहसदृशा, छविः वृषनिभा, कान्तिः नागदृशा तथा शोभा च हंसस्य गतिरिव स्यात्। शुभ-लक्षणैः रहितानां देवी-देवानां प्रतिमा धन-धान्यविनाशदा भवति।[30]

**दुष्टाः प्रतिमाः** -कस्यचिद् देवस्य प्रतिमा न तु हीनाङ्गा, नाधिकाङ्गयुता भवेत्। यदि इत्थमाभासो जायते यद् देवप्रतिमा नृत्यति, रोदति, हसति अथवा नेत्रमुद्घाटयति नेत्रमेलनं वा करोति तदा तु महाभयं भवति।[31] शङ्कुनोपहता प्रतिमार्चा प्रधानपुरुषं नायकं कुलं वंशं च घातयति, श्वभ्रोपहता प्रतिमा रोगान् दोषान् नश्यति ।[32]

एवमेव हीनाङ्गा, वीभत्समुखा, कृशकाया, दुर्बलहस्तपादयुता तथा कृशकटियुता प्रतिमा दर्शकानां कृते हानिप्रदा भवति।[33] तत्र विशेषफलम् -

| | |
|---|---|
| अधिकाङ्गप्रतिमा | - शिल्पकारस्य कृते नाशप्रदा |
| दुर्बला | - धन-नाशिका |
| दुर्बलोदरा | - दुर्भिक्षकारिणी |
| निर्मांसा | - धननाशिनी |

26. महत्तमैस्तापितार्च व्यङ्गितानपि न सं? त्यजेत् ।
व्यङ्गेर्वाहनभूषाश्रोपा सकेर ? परामृवी ।। 195 ।। वास्तुमंजरी पृ. 291
27. गूढसन्ध्यस्थिधमनी सर्वदा सौख्यवर्धिनी । शुक्रनीति अ- 4, पृ. 256
28. यथोक्तावयवैः पूर्णा पुण्यदा सुमनोहरा ।
अन्यथाऽऽयुर्धनहरा नित्यं दुःखविवर्द्धिनी ।। शुक्रनीति अ- 4, श्लोक 76
29. धर्मो. पु. में चित्रकला पृ. 69 प्रतिमालक्षण
30. तदेव लक्षणोपेतं धनधान्यविनाशनम् ।
देवा नरेन्द्राः कर्त्तव्याः शोभावन्तः सदैव तु ।।
मृगेन्द्रवृषनागानां हंसानां गतिभिः समाः ।। वि. धर्मो. पु. में चित्रकला पृ. 70 प्रतिमालक्षण श्लोक 26
31. नाधिकाङ्गा न हीनाङ्गाः कर्त्तव्या देवताः क्वचित् । रूपमण्डन श्लोक 14,16 अ. 1, मत्स्य. पु. 258/15
32. शङ्कूपहता प्रतिमा प्रधानपुरुषं कुलं च घातयति ।
श्वभ्रोपहता रोगानुपद्रवांश्च क्षयं कुरुते ।।6।। बृ. संहिता , श्लोक 6, अ. 60
33. दे. मू. प्र. भूमिका पृ. - 27

| | |
|---|---|
| वक्रनासिका | - दारुण-दु:खदायिनी |
| न्यूनाङ्गा | - भयदायिनी |
| संकुचिताङ्गा | - शोकप्रदा, ऐश्वर्यविनाशिका |
| हीनमुखा तथा दुर्बलहस्तपादयुता | - दु:खदायिनी |
| हीनाङ्गा तथा जङ्घाहीना | - भ्रमोन्माददात्री |
| शुष्कमुखा तथा कटिहीना | - नृपविनाशिका |
| पाणिपादविहीना | - महामारीकर्त्री |
| जङ्घाजानुविहीना | - शत्रुकल्याणकारिणी |
| वक्षहीना | - पुत्रमित्रविनाशिका |

यदि काऽपि प्रतिमा कीलेन उपहता अथवा पीड़िता जाता, तर्हि तु सा प्रधानपुरुषेण सह तस्य कुलस्य नाशकर्त्री भवति। यदि प्रतिमा गर्तेन युक्ता तदा तु सा रोगं उपद्रवं मृत्युं च ददाति।

**तालानुसारेण मूर्तीनामङ्गविधानम् -**

एकताले कीर्तिमुखस्य, द्विताले पक्षिण:, त्रिताले हस्तिन:, चतुश्ताले किन्नरहययो: पञ्चताले च वामनादिदेवानां तथा वृषस्य प्रतिमानिर्माणं कुर्यात् ।[34] शूकर-वामन-गणेशानां प्रतिमाया: मानं षट्तालमितमस्ति तथा वृष-शूकर-मनुष्य प्रतिमां सप्ततालस्यापि भवेत्[35] पार्वतीदेव्या: अष्टताले तथा अन्येषां सर्वेषां देवानां प्रतिमा नवताले कुर्यात्। दशताले राम- बलि-रुद्र-जिनदेवानां प्रतिमा निर्मापयेत् ।[36] स्कन्द-हनुमान-भूत-चण्डिकादीनां एकादशताले, द्वादशताले वेतालस्य तथा त्रयोदशताले राक्षसप्रतिमाया: निर्माणं भवेत्।[37] दैत्यस्य प्रतिमा चतुर्दशताले, भृगो: पञ्चदशताले तथा क्रूरदेवानां प्रतिमा षोडशताले कुर्यात्। एतस्यादुच्चप्रतिमाया: निर्माणं न कारयेत्।[38] वराहमिहिर:, शुक्राचार्य:, विष्णुधर्मोत्तरकारश्चापि तालानुसारमेव प्रतिमानिर्माणस्य निर्देशनं कुर्वन्ति। सूत्रधारमण्डन: द्वादशाङ्गुलानामेकं तालं स्वीकृत्य तालानुसारेण देव-प्रतिमानिर्माणस्य उल्लेखं कृतवान्।[39]

---

34. रूपमण्डन अ. 1 , श्लोक 19 .
35. तत्रैव श्लोक 20
36. वही तत्रैव श्लोक 21
37. तत्रैव श्लोक 22
38. तत्रैव श्लोक 23
39. रूपमण्डन भूमिका पृ. 22

**सारल्येन परिज्ञानार्थं निम्नतालिका द्रष्टव्यम् -**

| **तालानि** | **प्रतिमा** |
|---|---|
| एकतालम् | कीर्तिमुखः (वक्रग्रासः जलचरः) (1) |
| द्विताले | पक्षिणः (2) |
| त्रितालानि | कुञ्जरः (गजराजः) (3) |
| चत्वारि तालानि | किन्नरः, अश्वः (4) |
| पञ्चतालानि | सुरः, शूकरः, वामनः, जिनदेवः, ब्रह्मा, महादेवः, नद्यः (5) |
| षड्तालानि | गणेशः (गणनायकः) वृषभः (6) |
| सप्ततालानि | मानवः (7) |
| अष्टतालानि | पार्वती,वृषः,मातृदेवी, दुर्गा, सरस्वती, लक्ष्मी,सावित्री |
| नवतालानि | सर्वे देवाः, ब्रह्मा-विष्णु-महेशाः (9) |
| दशतालानि | रामः, रुद्रः, बलिः, जिनः, (10) |
| एकादशतालानि | सूर्यः, सिद्धाः स्कन्दः, हनुमानः, चण्डिका, कार्तिकेयः, भूतादयः |
| द्वादशतालानि | वेतालः, आदिदेवः |
| त्रयोदशतालानि | राक्षसः, पिशाचादयः (मुकुटरहिताः) |
| चतुर्दशतालानि | दैत्यः (मुकुटयुक्तः) |
| पञ्चदशतालानि | भृगुः (भयंकरो देवः) |
| षोडशतालानि | क्रूराः देवाः |

शुक्रनीतौ नवताले देवानां प्रतिमा तथा च प्रतिमानां अङ्ग-विभाजनं कथितमे वास्ति।[40]

---

40. शुक्रनीति अ. 4, श्लोक 93-97

# गृहस्य मुख्यद्वारम्

**अश्वनी कुमार**

वैदिकवाङ्मये वास्तुशब्दस्य सामान्यार्थः गृहं भवनं वा भवति। प्राचीनभारतीयवाङ्मये **'वास्तु' 'शाला'** इत्यादिनी नामानि दृश्यन्ते। वस्तुतः वास्तुशब्दस्य व्युत्पतिः 'वस्' धातौ 'वसेस्तूणन्' (1-78) अनेन सूत्रेण 'तुण्' प्रत्यये सति सिध्यति। ऋग्वेदे एकस्मिन् मन्त्रे वास्तुदेवतां 'वास्तोष्पतिं' प्रार्थयन् प्रोक्तं हे वास्तोष्पते! त्वम् अस्मान् अभि जानीहि। अनारोग्यम् अस्मद् गृहे वितरतु। यद् धनं वयं याच्यामहे तद् अस्मभ्यं ददातु। द्विपदे चतुष्पदे च कल्याणकारी भव । यथा-

**वास्तोष्पते प्रति जानीह्यस्मान्त्वावेशो अनमीवो भवा नः।**
**यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे[1]।।**

ऋग्वेदातिरिक्तं यजुर्वेदादिष्वपि एतादृशाः उल्लेखाः प्राप्यन्ते यैः स्थापत्यस्य विविधाङ्गानां विषये ज्ञायते। ऋगथर्वणयोः भवनविन्यासकलायाः यत् स्वरूपं परम्परा च सा अद्यापि मूलरूपेण प्रचलितास्ति।

वैदिकभवनानां त्रीणि मुख्याङ्गान्यासन्। प्रथमं गृहद्वारं यस्मिन् सम्मुखाङ्गणमप्यासीत्। द्वितीयम् उपवेशनगृहं यस्यान्तर्गतं सभा, आस्थानं मण्डपं चाप्यासन्। अत्रैव आगन्तुकानां स्वागतं भवति स्म। तृतीयं पत्नीसदनम् आसीत्। यस्यापरनाम अन्तः पुरं भवति स्म[2]।

ग्रामशब्दः ऋग्वेदे बहुस्थलेषु दृश्यते। ग्रामशब्दः वर्तमाने Village इत्यर्थे दृश्यते। केचन वैदिकग्रामाः परस्परं निकटाः आसन्[3]। हैवेलमहोदयस्य मतानुसारेण एते ग्रामाः मुख्यतः आयताकारा आसन्। तान् परितः एकम्-एकं द्वारं भवति स्म[4]। पर्सीब्राउनमहोदयस्यानुसारं वैदिकग्रामान् परितः काष्ठवेष्टनानि (बाड़) भवन्ति स्म। परवर्तिकाले जैन-बौद्धस्तूपं परितोप्येतादृशानि काष्ठवेष्टनानि निर्मितानि। तद्बहिः तोरणद्वाराणि निर्मीयन्ते स्म।

ऋग्वेदे निवासस्थानस्य कृते तस्य विविधोपांगानां च कृते प्रायः त्रिंशत् शब्दाः प्रयुक्ताः दृश्यन्ते। 'छरदी' इति शब्दस्य प्रयोगः विविधस्थानेषु प्राप्यते। यस्य तात्पर्य सम्भवतः भवनस्य छदिः

1. ऋग्वेद संहिता 7/54/1
2. तरापद भट्टाचार्य, ए स्टडी ऑन वास्तु विद्या, पृ0 13
3. शतपथ ब्रह्मण 13/02/04/02
4. हैवेल, दि हिस्ट्री आफ आर्यन रूल इन इण्डिया पृ0 23/24

इत्यनेन आसीत्। 'दूरोण' तथा 'दुर्यस' शब्दाभ्यां ज्ञायते यद् वैदिकगृहे द्वाराणि आसन्। केषुचित् स्थलेषु गृहाणां कृते 'पृथु', 'साम्प्राप्य', 'मोही', 'बृहत', 'ऊरू', 'दीर्घ', 'गभीर' इत्यादिविशेषणानां प्रयोग: प्राप्यते। अनेन दीर्घाकारगृहाणां प्रचलनम् अनुमीयते। वरुणस्य गृहम् अत्यन्तविस्तृतं सहस्रद्वारयुक्तं च कथितं वर्तते[5]।

वस्तुत: नृपाणां श्रेष्ठजनानां चावासादर्शरूपे देवानां भवनानि चिरकालादेव सन्ति। देवेषु वरुणस्य भवनस्योल्लेख ऋग्वेदे तदा विद्यते यदा ऋषि: वसिष्ठ: द्युलोके स्थितासन् वैदिकदेवानां नृपवरुणस्य सदने प्रविष्ट:। तदा भवनं दृष्ट्वा तेनोक्तम्। यत् –

**बृहन्तं मानं वरुण स्वधाव:।**
**सहस्रद्वारं जगमा गृहन्ते[6]॥**

अर्थात् हे वरुण! तव गृहम् अत्यन्तं विस्तृतं यस्मिन् सहस्रद्वाराणि सन्ति। ऋषिणा वसिष्ठेनवरुणस्य स्तुतौ भणितं[7] यद् वरुणस्य भवनमिदं स्वर्णनिर्मितं विस्तृतं चाकर्षकमस्ति। भवनमिदं सुदृढ़ं वर्तते पुनश्च सहस्रस्तम्भा: सहस्रद्वाराणि च भवने सन्ति। भवनमिदं जलमध्यस्थितो वर्तते अत: भवनं परित: कृत्रिमजलाशयो निर्मितो वर्तते। अस्येव प्रकारस्य राजभवनं मित्रसंज्ञकदेवस्यापि वर्तते यं 'सदस्युत्तमे' उक्त्वा सर्वोत्तमम् उत्कृष्टं च कथितं वर्तते। तत्रापि सहस्त्रस्तम्भा: सहस्त्रद्वाराणि च सन्ति। अत: अत्यन्तं मनोरमम् अस्ति[8]।

निवासयोग्यस्थानस्य उत्तमप्रकारेण परीक्षणं कृत्वा भूमौ दिक्साधनाय समतलभूमौ वृत्तं कार्यम्। तन्मध्ये द्वादशाङ्गुलशङ्कुं स्थापयेत्। तत: दिक्साधनविधिद्वारा दिग्ज्ञानं कुर्यात्। पुनश्च कर्त्तु: नामानुसारं क्षेत्रफलं स्वीकृत्य पूर्वादिचतुर्षु दिक्षु क्रमश: अष्टौ–अष्टौ द्वारभागा: ज्ञेया:। तत्र शुभपदानुसारेण द्वारस्थानं निर्दिशेत्।

गृहस्य प्रवेशद्वारं दक्षिणपक्षे एव शुभं भवति। तत्र पूर्वदिक्स्थितयो: जयन्तेन्द्रयो: पदयो: द्वारं सर्वेषु गृहेषूत्तमं मन्यते। दक्षिणदिशि द्वाराय बृहत्क्षतपदं पश्चिमदिशि पुष्पदन्तवरुणयो: पदे प्रशंसिते उत्तरदिशि द्वारार्थं भल्लाटसौम्ययो: पदौ शुभदायकौ भवत:।

**गृहस्य द्वारवेध:-**

तत्र गृहसम्मुखे नैकविधवस्तूनि द्वारवेधं जनयन्ति। वीथी मार्गो वा गृहाभिमुखं स्यात्तदा कुलक्षयं करोति। एवमेव वृक्षेण वेधे सति द्वेषाधिक्यं भवति। पङ्कद्वारा वेधे सति शोक उत्पद्यते। कूपद्वारा वेधे रोगो भवति। जलप्रवाहद्वारा वेधे सति व्यथा जायते। कीलेन सूचिकया वा द्वारवेधात्

5. ऋग्वेद 07/88/05
6. ऋग्वेद 07/88/05
7. बृहद्देवता 06/11-15
8. ऋग्वेद 02/41/05/62/06

अग्निभयं भवति। देवगृहेभ्यः विद्धे सति विनाशः सम्भवति। पुनश्च स्तम्भात् विद्धे गृहे क्लेशस्य स्थितिः जायते। गृहस्य अन्यगृहात् वेधे सति गृहपतिः विनश्यति। अपवित्रद्रव्यादिभिः वेधे सति गृहस्वामिनी वन्ध्या भवति। अन्त्यजद्वारा वेधे सति शस्त्रभयं सम्भवति।

गृहद्वारस्योच्छ्रायाद्द्विगुणे इमानि वस्तूनि भवेयुस्तदा वेधदोषो नैव भवति। तत्र गृहद्वारं स्वमानादधिकम् (उच्चं) भवेत्तदा राजभयं भवति। यदि स्वमानान्न्यूनं (नीचं) भवेत् तदा चौरभयं भवति। द्वारस्योपरि यदि द्वारं भवति तदा तद् द्वारं यमराजस्य मुखरूपे निगदितमस्ति। मार्गमध्ये निर्मितस्य गृहस्य दैर्घ्यमधिकं स्यात् तदा तु निश्चितरूपेण शीघ्रमेव गृहपतिविनाशो भवति। यदि मुख्यद्वारम् अन्यद्वारेभ्यः निकृष्टं स्यात् तदा दोषप्रदं भवति। अतः अन्येभ्यः द्वारेभ्यः मुख्यद्वारं विस्तृतं भवितव्यम्[9]।

**मुख्यप्रवेशद्वारम् :-**

वास्तुशास्त्रे कस्यापि गृहस्य भवनस्य वा मुख्यद्वारस्य महत्वं अत्यधिकं वर्तते। इदन्तु गृहे आनन्दमयवातावरणनिमित्तं परमावश्यकं वर्तते ततः गृहे मुख्यद्वारस्य स्थापना कस्यामपि दिशि सम्यक् पदविन्यासंदृष्ट्वा कुर्यात् यथा मानवशरीरे अस्माकं मुखस्य महत्वं वर्तते तदेव अस्माकं गृहद्वारस्य अपि महत्वं भवति। अतः मुख्यद्वारं सर्वदा विस्तृतं सुसज्जितं च भवेत्। विषयेऽस्मिन् कथितमस्ति यत्–

ब्राह्मणवर्णस्य राशिनिमितं पूर्वदिशि मुख्यद्वारं शुभफलदायकं भवति। वैश्यवर्णराशिनिमित्तं दक्षिणदिशि मुख्यद्वारं शुभं भवति। शूद्रवर्णराशिनिमित्तं पश्चिमदिशि मुख्यद्वारं शुभं भवति। क्षत्रियवर्णराशिनिमित्तम् उत्तरदिशि मुख्यद्वारं भवितव्यम्। यथा–

**अथ द्वारं द्विज-वैश्य-शूद्र-नृपराशीनां हितं पूर्वतः[10]॥**

गृहस्य राश्यनुसारं भवनस्य मुख्यद्वारस्य दिशानिर्धारणे वास्तुशास्त्रकाराणां यद्यपि मतवैभिन्न्यं वर्तते तथापि सर्वेषां मतमतान्तराणाम् उल्लेखो कुर्वन् बृहद्दैवज्ञरञ्जने बहुसम्मतमतम् उपस्थापितमस्ति[11]।

**कर्कटालिझषाणां च पूर्वद्वारं शुभावहम्।**
**कन्यामकरयुग्मानां दक्षिणद्वारमिष्टदम्।।[11]**

**तुलाकुम्भवृषाणां च पश्चिमाभिमुखं स्मृतम्।**
**सौम्यद्वारं शुभाय स्यान्मेषसिंहधनुर्भृताम्[12]।।**

**मुख्यद्वारस्य स्थाननिर्णयः -**

---

9. ना0 पु0 पू0 भा0 द्वि0 पाद 592
10. वास्तुसारसङ्गहे 16 सोपानम्
11. बृहद्दैवज्ञरञ्जनोक्त 86/345
12. ज्योतिर्निबन्ध

वास्तुपदस्य मुख्यद्वारस्य निर्माणकालेऽवधेयं यद् यस्यां दिशि द्वारस्थापनमभीष्टं भवेत् तद्दिशि विस्तारं नवभागेषु विभाजितं कुर्यात्। तदा विस्तारे दक्षिणतः पञ्चभागाः, पुनश्च त्रिभागान् उत्तरतः त्यक्त्वा स्थापयेत्। शेषभागे मुख्यद्वारं शुभं भवेत्। दक्षिणतः दक्षिणपक्षः उत्तरतः वामपक्षः अवगन्तव्यः। यदि द्वारम् उत्तरदिशि पूर्वदिशि वा भवेत् तदा शुभदायकं भवति। यथा–

**नवभागं गृहं कृत्वा पञ्चभागन्तु दक्षिणे।**
**त्रिभागमुत्तरे कार्यं शेषे द्वारं प्रकीर्तितम्**[14]**॥**

**मुख्यप्रवेशद्वारस्य फलम् :-**

गृहस्य मुख्यद्वारस्य निर्माणकाले वास्तुनियमानां परिपालनं शान्तिसुखाभ्यां सह गृहे आनन्दमयं वातावरणं निर्मित्तं करोत्येव। दक्षिणदिशाभिमुखं गृहद्वारं पुष्टिकारकं भवति। पुनश्च पूर्वदिशि उत्तरदिशि च गृहमुखं गृहद्वारं वा विजयकारकं भवति। पश्चिमदिशाभिमुखं गृहद्वारं धनधान्यस्य वृद्धिं करोति। परञ्च पूर्वाभिमुखं गृहस्य द्वारं बालकानां कृते बुद्धिप्रदं भवति[15]।

अनेन प्रकारेण गृहद्वारविन्यासस्य स्थानं विचिन्त्य शुभमुहूर्ते द्वारस्थापना करणीया। तेन गृहे सुखसमृद्धिपुत्रवृद्ध्यादिफलं प्राप्यत एवेति।

---

14. वास्तु सारसङ्ग्रहे 16 सोपानम
15. वि0 क0 वा0 शा0 अ0 15

# वास्तुशास्त्रे जलतत्त्वानुशीलनम्

**हेमचन्दः**

वसन्त्यस्मिन्निति वास्तुः। यदि वयं महर्षिपाणिनेः व्याकरणमनुसृत्य शब्दस्यास्य मीमांसापुरस्सरं विचारयामस्तदा निष्पत्तिरस्य एवमस्ति तद्यथोक्तशास्त्रानुसारं 'वस्' धातोः 'तुण्'[1] प्रत्यये कृते सति उपधावृद्धौ शब्दोऽयं निष्पद्यते। मनुस्मृतावपि वास्तुशब्दस्य प्रयोगः विहितः मनुना।[2]

वास्तुशास्त्रमेव शिल्पशास्त्रम्। शिल्पशास्त्रमेव स्थापत्यवेदः। अयमेवाथर्ववेदोपवेदः।[3] कलाकौशलादिकं कर्म शिल्पमित्युच्यते। तच्च वास्तुविज्ञानमलङ्कारघटनं माल्यग्रन्थनं, काचवलयादिकाराणामालेख्यकरणं कुम्भकाराणां घटनिर्माणं शिल्पशास्त्रमेव। विविधानां देवानां मूर्तिनिर्माणसहितं देवालय-प्रासाद-हर्म्य-गृहशाला-वापी-कूपतडागाद्यनेकप्रकारकं वास्तुनिर्माणप्रतिपादकमिदं शास्त्रम्।

वास्तुशास्त्रमिदं मूलतः विज्ञानस्य विषयः। पृथिव्यप्तेजोवाय्वाकाशादीनां पञ्चतत्त्वानां प्रभावः यथा पिण्डे भवति तथैव ब्रह्माण्डेऽपि भवति, अत एवोक्तं - 'यथा पिण्डे तथा ब्रह्माण्डे' 'यत्पिण्डे तत्ब्रह्माण्डे' वा। यथा - 'अणोरणीयान् महतो महीयान्'[4]। वास्तुशास्त्रदृष्ट्या निर्मितानां गृहाणां रचनोत्तरध्रुवाद्दक्षिणध्रुवम्प्रति प्रवहमानायाम् आकर्षणशक्तिमभिलक्ष्य क्वचिन्नैसर्गिकसौन्दर्यमवलम्ब्य क्वचिच्च प्राकृतिकतत्त्वानामवलम्ब्य भवति। एतेषां पूर्वोक्तानां पञ्चतत्त्वानां पञ्चमहाभूतानां वाऽऽवश्यकता शरीराय आत्मतत्त्ववद्भवति। कथितमपि अन्नम्भट्टमहोदयेन तर्कसंग्रहे - 'गुणाश्रयत्वं क्रियाश्रयत्वं वा द्रवत्वम् (द्रव्यत्वम्)'।[5] अर्थात् यत्र गुणानां क्रियाणाञ्चाश्रयत्वं यत्र गृह्यते तन्नाम द्रव्यत्वम्। वैशेषिकदर्शने पूर्वोक्तानि पञ्चतत्त्वानि द्रव्यभेदेषु निहितानि। पञ्चमहाभूतेषु प्रत्येकं भूतस्य तत्त्वस्य वाऽप्रतिमम्महत्त्वं वरीवर्ति।

वास्तुशास्त्रे दिङ्विचारोऽपि विस्तरेण विहितः। यतोहि यत्रास्माकं वास्तव्यं स्यात्तत्स्थानं कियदूर्जात्मकं कियच्चानूर्जात्मकमिति विषये स्पष्टं यद् ऊर्जायाः स्रोतांसि प्रकृतेः समुद्भवन्ति। यथा-

---

1. संस्कृत-हिन्दी-कोश, वामन शिवराम आप्टे, पृ. 923
2. General Knowledge, Lucent, p . 1
3. मनुस्मृतिः, 3/89
4. वास्तुसारः, प्रो. देवीप्रसादत्रिपाठी, पृ. 2
5. तर्कसंग्रहः, अन्नम्भट्टविरचितः, पृ. 9

## पञ्चमहाभूतानि

### Five Elements of Universe

| पृथिवी | जलम् | तेजः | वायुः | आकाशः |
|---|---|---|---|---|
| Earth | Water | Fire | Air | Space |
| Geomagnetic | Gravitational | Solar | Wind | Cosmic |
| Energy | Energy | Energy | Energy | Energy[6] |

इमानि पञ्चमहाभूतानि अस्मभ्यं स्फूर्तिप्रदायकानि, ऐश्वर्यादीनि सुखादीनां प्रदातारः। गृहनिर्माणेऽपि पूर्वोक्तानां तत्त्वानाम्महती भूमिका वर्तते। अत्र जलतत्त्वानुशीलनं वास्तुशास्त्रपरिप्रेक्ष्ये विचार्यते।

**मुख्यभागः**

पञ्चमहाभूतेषु जलतत्त्वस्य का उपादेयता? जलतत्त्वविषये सर्वे जानन्त्येव यज्जगत्यस्मिन् कोऽपि सत्त्वः (जीवः) जलं विना बहुकालपर्यन्तं जीवितुं नार्हति। आधुनिकैः वैज्ञानिकैः स्फुटीकृतं यदस्मिञ्जगति 71% जलं 29% स्थलमस्ति।[7] पञ्चमहाभूतेषु पृथिव्यनन्तरं जलतत्त्वमेवास्मभ्यं सर्वप्रमुखम्। प्राणिनां रक्ते 80% मात्रा जलस्येव भवति। वनस्पतिष्वपि मात्रेयमाधिक्येन वरीवर्ति। उभाभ्यां वर्गाभ्यां जलमेव जीवनाधाररूपम्। जीवाः, जन्तवः, पशवः, पक्षिणश्च जलं पीत्वा वनस्पतयश्च मूलैः जलं गृहीत्वा जीवन्ति। यथा गृहनिर्माणाय पृथ्वीतत्त्वयुक्तपदार्थानाम् आवश्यकता भवति, तथैव जलतत्त्वस्यापि भवत्येव। अस्माकं शास्त्रीयग्रन्थेषु प्रत्येकं विषयस्य वैज्ञानिकी व्यवस्था वर्तते यथा कुत्राग्नेः वायोस्स्थानमित्यादिकं सर्वं सम्यक्तया व्यवस्थापितम्।

यस्मिन् देशे प्रदेशे वा ऐशान्यां दिशि जलमस्ति तस्य देशस्योन्नतिरतीववेगेन भवति। पृथिव्यां भिन्न-भिन्नदेशानां भौगोलिकस्थितिः भिन्ना-भिन्ना वर्तते। यो देशः समुद्रादाच्छन्नोऽस्ति अथवा यस्य ऐशान्यां दिशि समुद्रोऽस्ति सः देशः सम्पन्नतायुक्तो भवति। यथा जापानदेशः सकलेऽस्मिञ्जगति आर्थिकदृष्ट्या समृद्धो वर्तते। अस्य देशस्य पूर्वेशानयोस्तटीयभागे प्रशान्तमहासागरस्य विशालपट्टः वर्तते।[8] अत एवोच्यते यज्जलस्थानमैशान्यां दिशि भवितव्यम्। चतुषष्टिपदवास्तुविभागेऽप्यप्सः स्थानमैशान्यां दिशि निर्दिष्टम्।[9] वयं पश्यामः यद्धार्मिककृत्येषु वरुणकलशमैशान्यां दिशि संस्थाप्यते।[10] जलाशयनिर्माणप्रसङ्गेऽपि विविधेषु ग्रन्थेषु सविस्तरेण प्रतिपादितं फलमपि निर्दिष्टम्। तद्यथ-ग्रामस्य नगरस्य वा यद्याग्नेयकोणे कूपः स्यात्तदा तु भयप्रदायकः नैऋत्यां विदिशि स्यात्तदा बालकेभ्यः

6. Padam, J. P. A. (1998) Vastu : Reinventing tha Architec ture of Fulfillment Dehradun Management Publishing Co.
7. General Knowledge, Arihant Part - Geography
8. पञ्चमहाभूतानां दिगनुगुणं विभागः- http. wikipedia
9. वास्तुमञ्जरी, सूत्रधारनाथेन विरचितम्, प्रथमोऽध्यायः, श्लो. 56
10. (क) उपाध्यारत्नचन्द्रिका (ख) नित्यकर्मपूजाप्रकाश (ग) प्रासादमण्डनम्, सूत्रधारमण्डनविरचितम्, व्याख्याकारः - कृष्ण जुगनू, पृ. 111

क्षयकारकः वायव्यां दिशि च स्त्रीभयकारको प्रोक्तः। ऐशान्यां दिशि शस्तः।[11] पूर्वेशानयोः जलस्य प्रवहणशीलत्वं शुभम्। मुहूर्त्तचिन्तामणावप्युक्तं यथा–

**कूपे वास्तोर्मध्यदेशेऽर्थनाशस्त्वैशान्यादौ पुष्टिरैश्वर्यवृद्धिः।**
**सूनोर्नाशः स्त्रीविनाशो मृतिश्च सम्पत्पीडा शत्रुतः स्याच्च सौख्यम्॥**[12]

अफ्रीकादेशस्योदाहरणं द्रष्टुं शक्यते यतोहि अस्य देशस्य ईशानकोणोऽपि सम्यक् नास्ति। पूर्वदिशि हिन्दमहासागरोऽस्ति। वास्तुशास्त्रदृष्ट्या देशेऽस्मिन्महान् दोषोऽस्ति। अत्र बहुधाः प्राकृतिक–विपत्तयः दरीदृश्यन्ते। अस्य देशस्य अपरन्नाम Dark Continent[13] अपि अस्ति।

ब्रिटेनदेशस्याध्ययनेनेदं ज्ञायते यद्देशोऽयं सम्पूर्णविश्वस्य अधिपतिः बभूव। अस्य सकलेऽस्मिन् जगति नेपालदेशमपहाय प्रभुत्वमासीत्। राष्ट्रस्यास्य पश्चिमतटे अटलान्टिकमहासागरोऽस्तीशानकोणे नार्वेजियनसागरः, उत्तरे आर्कटिकमहासागरोऽस्ति। अनेन कारणेन देशोऽयं स्वकीयं साम्राज्यं विश्वे प्रसारितवान्। यदि सोवियतरूसदेशस्य भौगोलिकस्थितिं पश्यामस्तदास्य पश्चिमदिशः भूभागः पूर्वापेक्षया विशालोऽस्ति। आग्नेयभागे कैस्पियनमहासागर एवञ्च दक्षिणदिशि कृष्णसागरोऽस्ति। आग्नेयदिशि यज्जलमस्ति तदार्कटिकप्रशान्तमहासागरयोर्मध्ये तल्लीनं भवति। कारणेनानेनात्रत्या प्रजा साम्यवादीशासने बहुविधकष्टानि प्राप्तवती। कदाचित् प्रागेव देशोऽयं विखण्डितोऽभवत्। सोवियतरुसदेशस्य ऐशान्यां दिशि जलमस्ति, अतः पुनरुन्नतिमार्गे देशोऽयमग्रसरः।

यदि वयं स्वकीयराष्ट्रं पश्यामस्तदात्र बहुविधानां साम्राज्यानामुत्थानमपि बभूव पतनमपि। वैदेशिकैः बारम्बारमाक्रमणं कृतम्। अस्य पूर्वदिशि बङ्गोपसागरः पश्चिमदिशि अरबसागरः दक्षिणे च हिन्दमहासागरः। उत्तरे हिमालयोऽस्त्यतोऽयं वैदेशिकैर्वञ्चितः।

अनुमानतः 73000 वर्षपूर्वं निर्मितस्य मिश्रदेशस्य 'पिरामिड' इत्यस्मिन् वास्तुशास्त्रीय–नियमानामनुगमनं कृतम्। अत्र 'ग्रेट पिरामिड ऑफ कॉम्प्लेक्स' 485 'फीट' मित उन्नतोऽस्ति।[14] अस्मिन् इलैक्ट्रो मैग्नेट–कॉस्मिकतरङ्गाणामाकर्षणमस्ति। इमानि 'पिरामिड' संज्ञकानि निर्माणकार्याणि पृथिव्याश्चुम्बकीयक्षेत्रमुद्दिश्य निर्मितानि सन्ति। अनेन सिध्यति यत् कस्मिन्नपि देशे जलतत्त्वस्यापि प्रभावाः भवन्ति।[15]

जलतत्त्वसमीक्षणे More B. M. महोदयेन 'Violation of Newton's law of Gravition : Gravitational force increases due to motion of water' विषयमधिकृत्य शोधपत्रं लिखितम्। यत्र जलतत्त्वस्य भौतिकविज्ञानदृष्ट्याचिन्तनं प्रदर्शितम्। जगत्यस्मिन् जलतत्त्वस्याधिक्येनापि गुरुत्वाकर्षणबलाधिक्यं दृश्यते। यथा नद्यादिकं निकषा वनस्पतीनां शाखादिकाः नताः भवन्ति। वस्तुतः जलतत्त्वे आकर्षणशक्तिरपि विकर्षणशक्तिरपि विद्यते। यद्यस्मिञ्जगति जलन्न स्यात् तर्हि जीवनमसम्भवमेव।

11. बृहद्वास्तुमाला, पं. रामनिहोरद्विवेदी, व्याख्याकार–ब्रह्मानन्दत्रिपाठी, जलशिराविचारः, श्लो.10
12. मुहूर्तचिन्तामणि, वास्तुप्रकरणम्, श्लो. 20
13. General Knowledge, Lucent, P. 2
14- http. wikipedia
15- World Research Journal of Applied Physics, ISSN 0976-7673& E-ISSN – 0976-7581, Volume-4, pp 51-53

# जलाशयवास्तु

**अव्यक्तरैणा**

वास्तुशास्त्रं पञ्चतत्त्वेष्वाधारितं शास्त्रमस्ति। भवने पञ्चतत्वानां समन्वयः आवश्यको भवति। ब्रह्माण्डस्य मूलतत्वानि एतानि पञ्चमहाभूतानि वर्तन्ते। एवमेव मानवशरीरस्य रचनापि पञ्चभूतैः जायते इति **'यत् पिण्डे तद् ब्रह्माण्डे'** प्रसिद्धोक्तिना सिद्ध्यति। अतः निवासस्थाने स्थितानां पञ्चतत्त्वानां समन्वयः यदि मनुष्यस्य शरीरेण सह भवति तदा भवने निवासिनः समृद्धशालिनः स्वस्थ-प्रसन्नचित्तानि भवन्ति। वास्तुशास्त्रस्य मुख्यध्येयमेवास्ति यत् मानवाः प्रकृत्या सह स्वस्थरूपेण जीवनं यापयेयुः।

पृथिव्यां प्रायः पञ्चसप्ततिप्रतिशतं जलमस्ति तथा पञ्चविंशप्रतिशतं स्थलमस्ति। जलं जीवनस्य एकं महत्वपूर्णमावश्यकं तत्त्वमस्ति। मानवस्य शरीरस्य रचनायामपि जलं सप्ततिप्रतिशतमस्ति तथा वनस्पतिषु जलस्य मात्रा एतस्मादपि अधिकमस्ति। वैज्ञानिकाः मन्यन्ते यज्जलेन सह अस्माकं भावनात्मकं सम्बन्धमस्ति। जलेन वयं प्रसन्नतां प्रेरणां शान्तिञ्च प्राप्नुमः।

वास्तुशास्त्रे ईशानकोणे जलस्य स्थानं विद्यते। यस्मिन् देशे प्रदेशे वा ईशानकोणे जलमस्ति तस्य देशस्य स्थानस्य चोन्नतिः अतीव वेगेन भवति। अस्योदाहरणं जापान-अमेरिकादेशौ वर्तेते। भारतदेशस्य अग्निकोणे जलं विद्यते अतः विकासः मन्दगत्या जातः। सर्वाः प्राचीनसभ्यताः नदीनां सन्निकटे विकसिताः अभवन्। येषां ग्रामाणां नगराणां पार्श्वे नदी-सरोवराः न विद्यन्ते तेषां कृते जलाशयनिर्माणविधानं शास्त्रे वर्णितमस्ति।।

**जलाशयप्रशंसा-**

विष्णुधर्मोत्तरपुराणे जलाशयप्रशंसायां वर्णनं मिलति यद् भूलोके स्वर्गलोके च जलं विना जीवनम् असंभवमस्ति अतः धर्मात्माभिः सत्पुरुषैः च जलाशयस्य निर्माणं अवश्यं करणीयम् यथा-

**उदकेन विना वृत्तिर्नास्ति लोकद्वये सदा।**
**तस्माज्जलाशयाः कार्याः पुरुषेण विपश्चिता।।**
**अग्निष्टोमसमं कूपः सोऽश्वमेधसमो मरौ।**
**कूपः प्रवृत्तपानीयः सर्वं हरति दुष्कृतम्।।**
**कूपकृत्स्वर्गमासाद्य सर्वान् भोगान् समश्नुते।**
**तत्रापि भोगनैपुण्यं स्थानाभ्यासात् प्रकीर्तितम्।।**[1]

1. विष्णुधर्मोत्तरपुराण उद्धृत- बृहद्वास्तुमाला अध्य. दकार्गलाध्याय, श्लो. 1-3

जलं हि सर्वेषां वृक्षजन्तूनां जीवनमस्ति। अतः यः मनुष्यः जलाश्रयं रचयति सोऽस्मिन् संसारे धनधान्योपेतः ऐहिकसुखानि तथा च स्वर्गे सुखानि लभते। वर्तमानपरिप्रक्ष्यप्रेक्ष्ये वयं पश्यामः यज्जलाशयाभाववशात् नगरेषु बहवः समस्याः दृश्यन्ते। अतः जलाशयनिर्माणस्य फलं एवमेव प्रकारेण कथितमस्ति।

**नीराश्रयं पुण्यवतां विधेयं मध्यपुरस्यापि तथैव बाह्ये।**
**वाप्यश्चतस्रोऽपि दशैव कूपाश्चत्वारि कुण्डानि च षट् तडागाः॥**[2]

पुण्यात्मभिः पुरस्य बाह्याभ्यन्तरप्रदेशे च जलाशयनिर्माणमवश्यमेव कर्तव्यम्। प्रत्येकं चतस्रः वाप्यः दशैव कूपाः चत्वारि कुण्डानि षट्तडागाश्च अवश्यमेव समाजस्य कल्याणाय पशुपक्षिणां मनुष्याणञ्च कृते निर्मातव्याः।

**जलाशये जलपरीक्षा-**

जलाशयजलं कथं भविष्यति एतद्विचिन्त्य जलाशयस्य निर्माणं क्रियते। यत्र भूमिः मूज-कास-कुशादिभिः युक्ता तथा च रक्तकृष्णा वा भवति तत्र भूमौ मधुरम् एवमधिकं जलं वर्तते। अनेन प्रकारेण शर्करायुक्तताम्रवर्णभूमौ कषायजलं तथा च नीलवर्णभूम्यां मधुरजलं भवति।[3]

**जलाशयभेदविचारः-**

त्रिकोण-चतुरश्र-वृत्ताकाराः वापिकूपतडागादयः उत्तमाः भवन्ति। धनुषाकार-कलशाकार-कमलाकारजलस्थानानि मध्यमानि भवन्ति। सर्पाकार-ध्वजाकारजलाशयाः निन्दिताः भवन्ति।[4]

**जलाशयं दिग्विचारः-**

ऐशान्यां कूपखनने गृहे ऐश्वर्यं वर्धते। पुष्टता वृद्धिश्च जायते। पूर्वदिशि कूपखनने धनवृद्धिः भवति। आग्नेयदिशि कूपनिर्माणे परिवारे संतानस्योपरि विपत्तिर्जायते। दक्षिणदिशायां कूपखनने स्त्रीकष्टं भवति। नैर्ऋत्यदिशायां कूपखनने गृहस्वामिनो मृत्युर्भवति। पश्चिमदिशायां कूपनिर्माणे संपत्तिर्जायते। वायव्यदिशायां कूपनिर्माणे शत्रुभयं भवति। गृहस्य मध्ये कूपस्य निर्माणे परिवारस्य विनाशो विज्ञेयः।[5]

**कूपनामानि-**

हस्तचतुष्टययुक्तस्य कूपस्य नाम **श्रीमुखम्**। पञ्चहस्तयुक्तस्य कूपस्य नाम **विजयः**। षड्हस्तयुक्तस्य कूपस्य नाम प्रान्तः। सप्तहस्तयुक्तस्य कूपस्य नाम **दुन्दुभी**। अष्टहस्तयुक्तस्य कूपस्य नाम चूडामणिः। दशहस्तयुक्तस्य कूपस्य नाम जयः। चतुर्हस्तात् न्यूना कूपिका इत्युच्यते।[6]

---

2. राजवल्लभवास्तुशास्त्र, अध्य. 4 श्लो. 26
3. वास्तुरत्नाकर, जलाशयप्रकरण, श्लो. 1.-11
4. विश्वकर्माप्रकाश 8.3-4
5. मुहूर्तचिन्तामणि, वास्तुप्रकरण 12-20
6. वाराहीसंहिता, वास्तुप्रकरणम्

**मास-नक्षत्र-तिथि-वारशुद्धिविचारः-**

जलस्थाननिर्माणप्रसङ्गे मासशुद्धिः नक्षत्रतिथिरादीनां च शुद्धिरवश्यमेव द्रष्टव्या। तत्र चैत्रादिमासेषु जलाशयनिर्माणेन क्रमशः कोश-धान्य-भय-शोकनाश-सुख-भय-रोग-दुःख-कीर्ति-द्रव्य-अग्निभय-प्राप्तिप्रभृतीनि फलानि लभ्यन्ते।[7]

रोहिणी-उत्तरात्रय-पुष्य-अनुराधा-शतभिषा-मघा-धनिष्ठा-श्रवणनक्षत्रेषु जलाशयानां खननारम्भः कर्तव्यः।[8] रवि-भौम-शनिवासरेषु जलाशयारम्भे जलं शुष्यति। भौमे शनौ च जलाशयारम्भे अल्पमेव जलमवशिष्यते। शेषाः दिवास्तु शुभाः भवन्ति।[9] नन्दा (1-6-11) भद्रा (2-7-12) जया (3-8-13) रिक्ता (4-9-14) पूर्णा (5-10-15) एताः तिथयो नामानुरूपं शुभाशुभं फलं प्रयच्छन्ति। अर्थात् रिक्ततिथियाः जलाशयारम्भेऽवश्यमेव वर्जनीयाः।[10]

**लग्नशुद्धिविचारः-**

जलाशयारम्भलग्ने यदि चन्द्रः स्थितो भवेद् अथवा जलचरराशिमध्ये (4-10-12) चन्द्रो भवेदथवा केन्द्रे द्वादशे च चन्द्रः स्यात्तदा जलं मधुरं सुगन्धितं च भवति। लग्ने गुरुः शुक्रः बुधश्च भवेत्तदा जलाशयस्यारम्भः कर्तव्यः।[11]

**जलाशयप्रारम्भरीतिः-**

नन्दादिशिलानां पूजनं कृत्वा ईशानादिक्रमेण दिक्-शोधनं विधाय तत्स्थले ताः स्थापयेत्। शुभे दिवसे खातमध्ये वारुणैर्मन्त्रैः वरुणस्य पूजनं कलशोपरि पूर्वदिशि संस्थाप्य कुर्यात्। ततः शिरः स्थाने वटस्य वेतसस्य कीलानां निवेशनं विधाय ग्रहाणां वास्तोश्च पूजनं करणीयम्।[12]

पर्यावरणसंरक्षणे जलाशयः महत्त्वपूर्णस्थानं धत्ते। सर्वे प्राणिनो जलाशयजलस्योपयोगं कृत्वा तृप्ताः भवन्ति। स्वच्छजलेन मानवानां जीवजन्तूनां पशुपक्षिणाञ्च स्वास्थ्यलाभो भवति। जलाशये यदि जलचराणाम् अपि निवासो भवेत् तदा ग्रामे निवासरताः जनाः प्रकृत्या सह सम्बन्धं अनुभूय मनःशान्तिं प्राप्नुवन्तीति।

# वास्तु के वैदिक सिद्धान्त एवं प्रासंगिकता

**डॉ. नीलम त्रिवेदी**

जिस भी भवन में मानव निवास करता है वहाँ का वातावरण, वहाँ की वायु आगमन-निर्गमन, वहाँ का चुम्बकीय क्षेत्र आदि तत्व मानव के सम्पूर्ण जीवन को प्रभावित करते है। हमारा आवास सुखदायी हो, निरापद हो, मानसिक शान्ति देने वाला हो, ऐसी ही व्यवस्था वास्तु के अन्तर्गत किये जाने का विधान है। वैदिकवाङ्मय के अनुसार प्राकृतिक नियमानुसार भवन निर्माण का ज्ञान जिस ग्रन्थ में है, वह ग्रन्थ स्थापत्य वेद कहलाता है, और स्थापत्य वेद के नियमों को मूर्त रूप प्रदान करने वाला शास्त्र ही वास्तुशास्त्र है।

वास्तु की उत्पत्ति 'वस्तु' शब्द से मानी जाती है वस्तु का अर्थ है अस्तित्वयुक्त स्थिति। संस्कृत साहित्य में वास्तु से तात्पर्य केवल मानव ही नहीं अपितु देवताओं के भी निवास से लिया गया है। इसका विस्तार देवालय, नगर, ग्राम, राष्ट्र, भवन, सामान्य जन के निवास तथा उसमें कुछ विभिन्न प्रकार के साजो सामान, रंग योजना, पेड़ पौधे, भवन निर्माण में प्रयोग आने वाली सामग्री के रूप में दिखाई देता है। यद्यपि वास्तु विद्या भारत में बहुत प्राचीन काल से है किंतु आज से दशक पूर्व तब वास्तु के प्रति इतनी जागरूकता नहीं थी। हमारे पिता, पितामह ने जब भवन निर्माण किया तो वास्तु का प्रश्न उनके मस्तिष्क में नहीं था किन्तु वर्तमान में वास्तु के बिना भवन निर्माण असंभव सा लगता है। आज वास्तुकारों के पास विभिन्न भूखण्डों के माप के अनुकूल जो स्वीकृत नक्शे होते है प्रायः वे वास्तु अनुकूल ही बनाए जा रहे है क्योंकि सामान्य मनुष्य की वास्तु के प्रति जिज्ञासा बढ़ गई है। उसका मानना है कि यदि वास्तु के नियमों के अनुसार भवन निर्माण किया जाए तो जीवन में सुख-समृद्धि, आरोग्यता की प्राप्ति होती है और यही मानव जीवन का लक्ष्य भी है।

भारत ही नहीं अन्य देशों में भी वास्तु तथा इसी के समान अवधारणा देखने को मिलती है। लगभग हर देश के भवन निर्माण संबंधी अपने अलग ही प्रतिमान होते हैं। जो वहाँ की जलवायु भौगोलिक स्थिति आदि के आधार पर निर्मित होते है। जिन देशों में ठंड अधिक पड़ती है, बर्फवारी होती है उन देशों में मकान की ढालू छत वहाँ की वास्तु योजना की ही सूचक है।

वैदिक वाङ्मय में भवन निर्माण का महत्वपूर्ण स्थान हैं ऋग्वेद में भवन निर्माण के अनेक सुन्दर उदाहरण विद्यमान है। **'सहस्र स्थूणं बिमृथः सह द्वौ'**[1] शब्दों द्वारा सहस्र स्थूणों वाले तथा

---

1. ऋग्वेद 5, 6, 26

दो तल्लों वाले भवनों का वर्णन है। कुछ ऋचाओं में लोहे और पत्थर की नगरियों अथवा मकानों का उल्लेख है। वेदी[2], चिति[3], शमशान[4], यूप[5] आदि के निर्माण का भी वर्णन किया गया है।

ऋग्वेद में शतमुखी, अश्ममयी, आयसी आदि शब्दों का प्रयोग हुआ है।[6] जिससे प्रतीत होता है कि वास्तुशास्त्र का विकसित वर्णन वेदों में है। श्रीपाद सातवलेकर ने वैदिक व्याख्यानमाला में वैदिक नगरों में गृहों का सुन्दर विवेचन किया है। समाधि के लिए मृण्मय[7] शब्द आया है। जिसमें शव को जलाने के बाद मिट्टी के ढेर को लगाने का अनुमान होता है। अस्तु वास्तुशास्त्र की विशद सामग्री वैदिक वाङ्मय में विद्यमान है। जिससे उसके अध्ययन के नये आधार प्राप्त होते हैं। आज जब प्राचीन वास्तुशास्त्र विश्व में चर्चा का विषय बना हुआ है तब वैदिक वास्तु के अध्ययन और चिन्तन की और अधिक आवश्यकता है। वास्तु पर अनेक स्वतंत्र ग्रन्थों की रचना हुयी है। स्थापत्य की विभिन्न तकनीक तथा भवनों के नाना रूपों के विवरण वैदिक ग्रन्थों से लेकर परवर्ती संस्कृत ग्रन्थों में तथा अन्य भारतीय भाषाओं के साहित्य में उपलब्ध हैं।

ऋग्वेद ऐसा ग्रन्थ है जिसमें अर्चा-वास्तु तथा लौकिक वास्तु वर्णित है। वास्तव में ऋग्वेद तथा परवर्ती वैदिक साहित्य में ऐसी सामग्री उपलब्ध है, जिसमें उक्त दोनों प्रकार के स्थापत्य पर रोचक प्रकाश पड़ता है। इस साहित्य में त्रिभौमिक प्रासाद, सहस्र स्तम्भ एवं सहस्र द्वारों वाले सभाकक्ष आदि का उल्लेख मिलता है।

इसके अतिरिक्त अग्निपुराण, मत्स्यपुराण, भविष्यपुराण, विश्वकर्मप्रकाश, विश्वकर्ममत, विश्वकर्मपुराण, वास्तुरत्न, वास्तुप्रदीप, विश्व कर्मसंहिता, रूपमण्डन, वास्तुराजवल्लभ, वास्तु-मुक्तावली, रत्नमाला, गृहरत्न, शिल्पसार, प्रतिष्ठाकल्लता, समराङ्गण सूत्रधार, प्रतिष्ठामहोदधि, भारतीयवास्तुकला का इतिहास आदि वास्तु शास्त्र के प्रमुख ग्रन्थ हैं। इनमें से अब कुछ ग्रन्थ उपलब्ध नहीं हैं।

वास्तुशास्त्र के विद्वानों में विश्वकर्मा, नारद, ब्रह्मा, बृहस्पति, नन्दीश, मय, भृगु, वशिष्ठ, नग्नजित, गर्ग, वासुदेव, शुक्र, शौनक, कुमार, पुरंदर, अनिरुद्ध, नारायण भट्ट, राम दैवज्ञ, कालिदास, श्रीपति, भास्कर, टोडरानन्द, मांडव्य, केशवदैवज्ञ, ब्रह्मशंभू, वराहमिहिर, शाङ्र्गधर, लल्ल इत्यादि नाम उल्लेखनीय है। मत्स्यपुराण में 18 वास्तुशास्त्र के उपदेशकों का नाम है-

**भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा।**
**नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः॥**
**ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च।**

---

2. ऋग्वेद 10, 114, 3
3. शतपथ ब्रा. 8, 1
4. शतपथ ब्रा. 13, 8, 1, 1
5. ऋग् 10,11,15
6. ऋग्वेद 4, 27, 1
7. शतपथ ब्रा., 13, 8, 1-4

**वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती।**
**अष्टादशैते विख्याताः शिल्पशास्त्रोपदेशकाः॥[8]**

हमारे ऋषियों ने मानव समाज के हित में चुम्बकीय प्रवाहों, वायु के प्रभाव, दिशाओं, गुरुत्वाकर्षण के नियमों एवं सूर्य की ऊर्जा को सन्दर्भ में रखकर वास्तुशास्त्र का निर्माण किया। कठोपनिषद द्वितीय वल्ली के बीसवें श्लोक में वर्णित हैं–

**अणोरणीयान्महतो महीयानात्मास्य।** अर्थात ब्रह्माण्ड में हर वस्तु का निर्माण पंच तत्वों - वायु, अग्नि, जल, आकाश एवं पृथ्वी से ही हुआ है। आधुनिक विज्ञान भी यह मानता है कि पाँच मूल तत्वों के सही सम्मिश्रण से ही बायो इलैक्ट्रिक एनर्जी की उत्पत्ति होती है। जिससे मानव स्वस्थ एवं सुखमय जीवन प्राप्त करता है।

ऋग्वेद में स्थापत्य–सम्बन्धी विविध उल्लेखों से पता चलता है कि ईसवीं पूर्व द्वितीय सहस्राब्दी के पहले भारतीयों को भवन निर्माण की अच्छी जानकारी हो गयी थी। ऋग्वेद के अतिरिक्त यजुर्वेद, सामवेद तथा अथर्ववेद में तथा परवर्ती वैदिक साहित्य में ऐसे उल्लेख प्राप्त है जो स्थापत्य के विविध अंगों पर प्रकाश डालते हैं। विशेषतः ऋग्वेद तथा अथर्ववेद में भवन–विन्यास का जो रूप उपलब्ध है उसकी परम्परा भारत में बराबर जारी रही है।

वैदिक भवनों के तीन मुख्य अंग थे। पहला भाग गृह–द्वार था, जिसमें सामने का आँगन या अजिर भी सम्मिलित था। दूसरा अंग बैठक थी, जिसके नाम सभा तथा बाद में आस्थान मण्डप मिलता हैं। यहीं आगन्तुकों का स्वागत किया जाता था। तीसरा भाग 'पत्नी–सदन' था, जिसे 'अन्तःपुर' कहा जाता था। आर्य लोग अग्नि–आधान हेतु भवन में एक कक्ष या आच्छादित स्थान को 'अग्निशाला' के रूप में रखते थे। विहित श्रौत कर्मों के लिए यह अत्यन्त आवश्यक था। बड़े प्रासादों में इस पवित्र स्थान को 'देवगृह' कहा जाने लगा। कालान्तर में भी इसका उपयोग पूजा के कमरे के रूप में होता रहा है।

वैदिक साहित्य से पता चलता है कि भवन निर्माण–कला में सादगी तथा सुरुचि थी। लोगों का जीवन सादा था, अतः निवास–गृहों में आडम्बर या दिखावा आवश्यक नहीं समझा जाता था। सौन्दर्य–बोध वैदिक आर्यों में विद्यमान था, इसका पता ऋग्वेद एवं परवर्ती वैदिक साहित्य से चलता हैं।

ऋग्वेद (7. 33, 13) में मान तथा वशिष्ठ नामक दो ऋषियों की घड़े से उत्पत्ति की कथा दी है। सायण ने मान को कुम्भज (अगस्त्य) का ही दूसरा नाम माना है। बाद में वास्तु शास्त्रकारों ने अगस्त्य को वास्तु–विद्या का आचार्य कहा। 'मान' का अर्थ मापन है। हो सकता है कि अगस्त्य का सम्बन्ध वैदिककालीन वास्तुकला से रहा हो।

---

8. मत्स्यपुराण 252/2

ऋग्वेद में कई स्थलों पर वास्तोष्पति नामक देवता का उल्लेख है।[9] गृह निर्माण के पूर्व इस देवता का आवाहन किया जाता था। एक स्थान[10] पर वास्तोष्पति तथा इन्द्र को तथा अन्यत्र[11] वास्तोष्पति तथा त्वष्टा को एक ही माना गया है।

**ग्राम**–'ग्राम' शब्द ऋग्वेद तथा अन्य वैदिक साहित्य में मिलता हैं। ग्राम वर्तमान गाँव का द्योतक है। कुछ वैदिक ग्राम एक-दूसरे के निकट थे।[12] कुछ दूर-दूर बसे थे तथा सड़कों के द्वारा एक दूसरे से सम्बद्ध थे।[13] गाँव प्रायः खुले हुए होते थे। ग्राम बसाते समय शुद्ध जल और वायु का ध्यान रखा जाता था।

**पुर**–'पुर' शब्द का प्रयोग[14] में तथा परवर्ती वैदिक साहित्य[2] में अनेक स्थानों पर मिलता है। परवर्ती संस्कृत साहित्य में यह शब्द नगर के अर्थ में प्रयुक्त हुआ है। वैदिक साहित्य में पुर का प्रयोग 'दुर्ग', 'गढ़' या 'प्रकार' के लिए भी हुआ है। ऋग्वेद में पुरों पर घेरा डालने तथा उन्हें विनष्ट करने के उल्लेख मिलते हैं। प्रतीत होता है कि उस युग में पुरों की संख्या अधिक रही होगी। उनकी रचना सुगमता से कर ली जाती रही होगी। प्रारम्भ में ये पुर मिट्टी के बनाये जाते रहे होंगे।

उक्त दुर्ग या गढ़ ग्रामों के अन्दर होते होंगे या उनके पास ही। पुरों के अन्दर किसी प्रकार की बस्ती का ठीक पता नहीं चलता। पुरों के लिए एक स्थान पर विशेषण के रूप में 'शारदी' शब्द का प्रयोग हुआ है। 'शारदी' उन्हें इसीलिए कहा गया होगा कि शरद ऋतु में बाहरी आक्रमणों से पुर की रक्षा हेतु इनका विशेष रूप से उपयोग होता था। पत्थर के बने पुरों (अश्ममयी पुर) का उल्लेख भी ऋग्वेद में मिलता है। कुछ में धातु का भी प्रयोग होता था।

**गृह**–ऋग्वेद में 'गृह' शब्द निवास अथवा घर के अर्थ में प्रयुक्त हुआ है।[15] अथर्ववेद तथा ब्राह्मण-ग्रन्थों में भी इसी अर्थ में यह शब्द मिलता है।[16] 'दम' 'पस्त्या' तथा 'हर्म्य' शब्दों का भी प्रयोग घर तथा उससे सम्बन्धित पारिवारिक सम्पत्ति के अर्थ में हुआ है।

घरों को स्वच्छ-सुन्दर बनाने का विचार वैदिक काल से मिलता है। अथर्ववेद में एक स्थान पर गृह की उपमा अलंकृत हथिनी से दी गयी है।[17] घरों की बाहरी तथा भीतरी दीवारों पर विविध

---

9. ऋग्वेद 7, 54, 55
10. ऋग्वेद 8, 17, 14
11. ऋग्वेद 5, 41, 8
12. शतपथ ब्राह्मण, 13, 2, 4, 2
13. छांदोग्य उपनिषद्, 8, 6, 2
14. ऋग्वेद (1, 53 ,7 1, 58 ,8 1, 131, 4
15. ऋग्वेद 3, 53, 6, 4, 49, 6, 8, 10, 1
16. अथर्ववेद 7. 83, 1, 10, 6, 4
17. अथर्ववेद 9, 3, 17

प्रकार के आकर्षक चित्र बनाये जाते थे। सुन्दर घर की तुलना सुसज्जित वधू से की गयी है।[18]

वैदिककालीन गृहों के निर्माण में किन पदार्थों का प्रयोग होता था? इस विषय में वैदिक साहित्य में मनोरंजक उल्लेख प्राप्त होते हैं। प्रायः मिट्टी, पत्थर, लकड़ी तथा बाँसों का प्रयोग गृह निर्माण में होता था। घरों की नींवे बहुत दृढ़ (ध्रुव) बनायी जाती थीं। दीवालों के ऊपर पहले कोरे बाँस आड़े-तिरछे बिछा दिये जाते थे। उनके ऊपर चीरे हुए बाँसों को रखा जाता था। फिर मजबूत रस्सियों से वे कस दिये जाते थे, जिससे छत पर की बिछावन हिले-डुले नहीं। बाँसों की यह बिछावन 'आयाम' कहलाती थी। उस पर तृण तथा पत्तों की तहें बिछायी जाती थीं। इन तहों को 'वर्हण' कहते थे। इस बिछावन के ऊपर बाँस की खपच्चियों की तह लगायी जाती थी। उसे भी मजबूती से बाँधते थे। इस प्रकार छत तैयार हो जाती थी। बड़ी छतों को सँभालने के लिए नीचे मोटी थूनियाँ या बल्लियों लगायी जाती थीं। सरपत, कास आदि की पतवार से छाये गये घर आज तक भारत के विभिन्न भागों में बनते हैं।

**तोरण–**भारतीय वास्तु के इस तत्त्व का स्रोत हमें वैदिक साहित्य में मिलता है। वैदिक काल में भवनों, पवित्र स्थलों, वृक्षों आदि की रक्षा हेतु उन्हें चारों ओर से वेष्टित कर देते थे। इसके लिए लकड़ी के सीधे दण्डों (थम) को भूमि पर गाड़ देते थे। फिर लकड़ी या बाँस को उनमें आड़ा बाँधकर घेरा या बाड़ बना देते थे। यही बाड़, वेष्टनी या वेदिका कहलायी। इस प्रकार के द्वार ने ही बाद में अलंकृत तोरणों के स्वरूप निर्धारण में योगदान दिया।

**यूप–**वैदिक साहित्य में 'स्कम्भ' (स्तम्भ) तथा 'यूप' शब्द खम्भों के लिए मिलते है।[19] यूप को भूमि पर खड़े करने के पूर्व उसकी स्तुति में कुछ मन्त्रों का उच्चारण किया जाता था। इन मन्त्रों से यूप के आकार आदि के विषय में कुछ बातें ज्ञात होती हैं। उसकी वनस्पति संज्ञा इस बात को घोषित करती है कि यूप-निर्माण हेतु लकड़ी किसी पेड़ से ली जाती थी। ब्राह्मण-ग्रन्थों में यूपों की ऊँचाई आदि के विषय में भी उल्लेख मिलते हैं, जिससे ज्ञात होता है। कि यूपों की नाम आदि के सम्बन्ध में निर्धारित नियमों का विधिवत् पालन किया जाता था।

कृष्ण-यजुर्वेद में यूप से सम्बन्धित अनेक ऋचाएँ हैं।[20] यजुर्वेद में भवन निर्माण हेतु निर्देश किया गया है कि मनुष्य को भवन इस प्रकार से निर्मित करना चाहिये जिसमें वायु, प्रकाश व जल की परिपूर्ण व्यवस्था हो।

**स्तम्भ विधि–**मत्स्यपुराण में भवनों के स्तम्भों के परिणाम व प्रकार का उचित विवेचन किया गया है। खम्भे के परिमाण के बारे में कहा गया है कि गृह की ऊँचाई के मान को सात से गुणा कर उसके अस्सीवें भाग के बराबर खम्भे की मोटाई होनी चाहिए। उसकी मोटाई में नौ से गुणा कर 80वें भाग के बराबर खम्भे का मूल भाग होना चाहिए।[21]

18. अथर्ववेद 9, 3, 24
19. ऋग्वेद 10, 11, 15
20. कृष्णयजुर्वेद 6. 3, 4
21. मत्स्यपुराण 2551, 2

भारत ने स्तूप तथा मन्दिर के रूप में स्थापत्य के दो प्रमुख धार्मिक रूपों को जन्म दिया। स्तूप तथा मन्दिर का निर्माण भारत की सीमाओं तक ही आबद्ध नहीं रहा। बहुत प्राचीन काल से भारत के पड़ोसी देशों ने इन दोनों को अपनाना आरम्भ किया और अपनी आवश्यकताओं के अनुसार उन्हें आगे बढ़ाया।

**द्वार स्थापना**–सभी प्रकार के गृहों में दाहिनी ओर प्रवेश द्वार रखे जाते थे।[22] पूर्व दिशा में इन्द्र और जयन्तद्वार सभी गृहों में श्रेष्ठ माने गए हैं। दक्षिण द्वारों में याम्य और वितथ श्रेष्ठ माने गए हैं।[23] पश्चिम द्वारों में पुष्पदन्त और वरुण प्रशंसित हैं। उत्तर द्वारों में भल्लाट और सौम्य शुभदायक होते हैं।[24]

**गृह निर्माण विधि**–देवालय, धूर्त, सचिव या चौराहे के समीप भवन निर्माण निषिद्ध किया गया है क्योंकि इससे दु:ख शोक और भय बना रहता है।[25] घर के चारों ओर तथा द्वार के सम्मुख और पीछे कुछ भूमि को छोड़ देना शुभकारक है।[26] पिछला भाग दक्षिणावर्त रहना चाहिए क्योंकि वामावर्त विनाशकारक होता है। दक्षिण भाग में ऊँचा रहने वाला घर 'सम्पूर्ण वास्तु के नाम से अभिहित किया जाता है और कामनाओं को पूर्ण करने वाला होता है।[27] भूगोल के अनुसार हमारी धरती उत्तर पूर्व की तरफ लगभग साढ़े 23 अंश झुकी हुई है। उत्तर-पूर्व दिशा की ओर नीची तथा स्वाभाविक रूप से दक्षिण में अधिक उठी हुई है। इसके भौगोलिक संतुलन के लिये मानव निवास के नियम स्वत: ही बन जाते है।

**पूजन**–सर्वप्रथम वेदज्ञ पुरोहित को श्वेत वस्त्र धारण कर कारीगर के साथ ज्योतिषी के कथनानुसार शुभ मुहूर्त में सभी बीजों से युक्त आधारशिला को रख के ऊपर स्थापित करना चाहिए।[28] अक्षत, वस्त्र, अलंकार और सर्वौषधि से पूजित कर मन्त्रोचारण के साथ स्थापित करें।[29] ब्राह्मणों को खीर का भोजन कराकर **'वास्तोष्पते प्रति जानीहि'**[30] इस मन्त्र के द्वारा मधु और घी से हवन करवाना चाहिए।[31] वास्तु यज्ञ पाँच प्रकार के हैं–सूत्रपात, स्तम्भारोहण, द्वारवंशोच्छ्राय (चौखट स्थापन) गृह प्रवेश और वास्तुशान्ति।[32] इस ढंग से बना हुआ भवन गृहस्पति के लिए मंगलकारी होता हैं।[33]

---

22. तत्रैव 255/7
23. तत्रैव 255/8
24. तत्रैव 255/9
25. तत्रैव 256/2
26. तत्रैव 256/3
27. तत्रैव 256/4
28. तत्रैव 256/6
29. तत्रैव 256/7
30. श.यजु. 7, 54, 1
31. मत्स्यपुराण 256/9
32. तत्रैव 256/10, 11

भविष्य पुराण में अध्याय 10 के 112 श्लोक में वास्तुविद्या का वर्णन है। अग्नि पुराण के अध्याय 40-31, 41-37 में शिला विन्यास एवं अध्याय 100-9 में द्वार प्रतिष्ठा और अध्याय 101-13 में प्रासाद प्रतिष्ठा का वर्णन मिलता है।

काल परिवर्तन एवं सभ्यता के क्रमशः विकास से मनुष्य के विकास में भी परिवर्तन आया। मिट्टी के घरों के स्थान पर सीमेंट, पत्थर और धातु के गृह निर्माण होने लगे। गृह निर्माण नवीन तकनीकी और अभियांत्रिकी का मुख्य अंग हो गया। नगर तथा ग्राम सन्निवेश के विविध अंग-उपांग अस्तित्व में आने लगे। भवन निर्माण में भू-चयन, मापन, संस्कार आदि तत्व विकसित होने लगे। किंतु यह कहना अतिशयोक्ति ना होगा कि भारतीय परम्परा में वास्तु को वेद-वेदांग से समुद्भूत कहा गया है।

## वास्तु नियमों की संगतता

यदि हम प्राकृतिक व्यवस्था के अनुकूल निर्माण करेंगे तो निश्चय ही उक्त भवन हमारे लिए कल्याणकारी सिद्ध होगा। अतः हमें सूर्य, वायु व चन्द्र प्रदत्त ऊर्जा पर ध्यान देना होगा। यदि इस समस्त ऊर्जा भण्डार का सही नियोजन व संयोजन करते हुए भवन निर्माण किया जाये तो उसमें निवास करने से मनुष्य शांति, समृद्धि व दीर्घायु प्राप्त करेगा।

## वास्तुपुरुष

पौराणिक मान्यता में भगवान शिव का अन्धकासुर राक्षस से युद्ध का उल्लेख है। इस युद्ध में भगवान् शिव के पसीने के बिन्दु निपात से एक विशाल, अदीति और क्रूर प्राणी का जन्म हुआ जिससे सम्पूर्ण देवजगत् में घबराहटपूर्ण हलचल हुई। देवों ने ब्रह्माजी की आज्ञा से इस प्राणी को पृथ्वी लोक में अधोमुख कर गिरा दिया और सृष्टिकर्ता ब्रह्मा ने उसे वास्तु पुरुष की संज्ञा दी। कहा जाता है कि वह वास्तुपुरुष जब भूमि पर गिरा तो उसका सिर ईशान कोण में तथा पैर नैऋत्य कोण में थे।

वास्तुपुरुष द्वारा ब्रह्माजी की प्रार्थना की गई। ब्रह्माजी ने उसे यह आशीर्वाद दिया कि जो प्राणी निर्माण कार्य में तुम्हारी पूजा नहीं करेगा या वास्तु पुरुष के मर्माङ्गों पर निर्माण कार्य करेगा उसे जीवन में दरिद्रता एवं समस्याओं का सामना करना पड़ेगा। अतः वास्तु पुरुष के मर्मांगों पर निर्माण कार्य निषिद्ध है।

## वास्तु देव के विभिन्न अवयवों पर निर्माण

वास्तुपुरुष के मर्म स्थान पर कोई निर्माण न हो।[34] अतः मर्म स्थान को खुला रखने की परंपरा चली आ रही है। मध्य भाग में आँगन रखकर निर्माण करने का यही उद्धेश्य रहा होगा।

---

33. तत्रैव 256/35
34. मत्स्यपुराण 252/15, 16

भूखण्ड छोटे होने के कारण आज इस प्रकार का निर्माण प्रायः सम्भव नहीं है। दिये गये चित्र के माध्यम से वास्तु संगत निर्माण को समझा जा सकता है–

| वायव्य | N | ईशान |
|---|---|---|

| 7 | 8 | 1 |
|---|---|---|
| 6 | 9 | 2 |
| 5 | 4 | 3 |

W (पश्चिम, बाएँ) — E (पूर्व, दाएँ)

| नैऋत | S | आग्नेय |
|---|---|---|

- उक्त चित्र में जहां संख्या 1 लिखी है उसे ईशान कोण कहा गया है जिस पर पूजा कक्ष, बच्चों व बुजुर्गों का कमरा अध्ययन कक्ष बनाया जा सकता है।
- संख्या 2 में स्नानागार, बरामदा, बैठक के लिये उचित है।
- संख्या 3 में जो कि अग्नि कोण है यदि रसोई हो तो अति उत्तम है।
- संख्या 4 का स्थल गृहस्वामी के शयन कक्ष के लिये उचित है। इस क्षेत्र में भंडारगृह भी बनाया जा सकता है।
- संख्या 5 में गृहस्वामी या परिवार के बड़े सदस्य के शयन के लिये उपयुक्त है।
- संख्या 6 में भोजन कक्ष बनाया जा सकता है।
- संख्या 7 में बच्चों का कक्ष, अन्न भंडार के लिए उचित हैं।
- संख्या 8 में धन रखने तिजोरी आदि रखने के लिये उपर्युक्त है।
- संख्या 9 को ब्रह्म स्थान कहा गया है। जिसे जहाँ तक सम्भव हो भारी निर्माण से मुक्त रखने का निर्देश दिया गया है।

**मुख्य द्वार**

भवन के मुख्य द्वार की स्थिति का विशेष प्रभाव होता है।

**पूर्व द्वार**–पूर्वी द्वार 'विजय द्वार' कहलाता है। यह उत्तम व लाभदायक फल देने वाला है।

**दक्षिण द्वार**–दक्षिणी द्वार 'यम द्वार' कहलाता है। यथासंभव दक्षिणी द्वार से बचना चाहिए।

**पश्चिम द्वार**–पश्चिमी द्वार 'मकर द्वार' कहलाता है। यह मध्यम फलदायक है।

**उत्तर द्वार**–उत्तरी द्वार 'कुबेर द्वार' कहलाता है। यह उत्तम फलदायक है।

- दरवाजे खोलते व बंद करते समय आवाज का आना अशुभदायक होता है।
- दरवाजे के नीचे देहली जरूर लगानी चाहिए।

- दरवाजे अंदर की ओर खुलने चाहिए।
- मुख्य द्वार के सामने द्वार वेध नहीं होना चाहिए।

**स्वागत कक्ष**

- मेहमानों का स्वागत कक्ष वायव्य, उत्तर, ईशान व पूर्व के मध्य होना चाहिए।
- फर्नीचर दक्षिण और पश्चिम दिशाओं के क्षेत्र में रखना चाहिए।
- स्वागत कक्ष में स्वामी का मुँह उत्तर-पूर्व की ओर श्रेष्ठ होता है।
- आग्नेय व नैऋत्य कोण में स्वागत कक्ष नहीं बनाना चाहिए।

**शयन कक्ष**

- मुख्य शयन कक्ष दक्षिण-पश्चिम (नैऋत्य कोण) में ही सर्वश्रेष्ठ होता है।

● शयन कक्ष में पलंग इस तरह लगाएँ कि सोते समय शिरोपधान दक्षिण दिशा में हो और पैर उत्तर दिशा की ओर हों, जिससे मानव शरीर में चुंबकीय तरंगों का प्रवेश निर्विघ्न रहे और शांत एवं गहन निद्रा ली जा सके।

उत्तर

पश्चिम — पूर्व

<table>
<tr><td>अतिथि शयनकक्ष</td><td></td><td></td><td></td><td>×</td></tr>
<tr><td>शयनकक्ष</td><td colspan="3" rowspan="3">आँगन</td><td></td></tr>
<tr><td>शयनकक्ष</td><td></td></tr>
<tr><td>शयनकक्ष</td><td></td></tr>
<tr><td>मुख्य शयनकक्ष</td><td></td><td>शयनकक्ष</td><td></td><td>×</td></tr>
</table>

दक्षिण

- शयन कक्ष में पूर्व-उत्तर दिशा में ज्यादा खाली स्थान छोड़कर पलंग लगाना चाहिए।

● दक्षिण दिशा में शयन कक्ष स्वास्थ्यवर्द्धक और पश्चिम दिशा में शयन कक्ष सुखवर्धक होता है।

● उत्तर दिशा के कमरे में शयन कक्ष वर्जित है। इसी प्रकार शयन कक्ष में उत्तरी दिशा में शिरोपधान भी वर्जित है।

### रसोई घर

- रसोई के लिए सर्वश्रेष्ठ स्थान दक्षिण-पूर्व (आग्नेय क्षेत्र) ही है। दूसरा विकल्प उत्तर-पश्चिम (वायव्य क्षेत्र) माना गया है।
- रसोईघर उत्तर दिशा, उत्तर-पूर्व, दक्षिण-पश्चिम, मध्य दक्षिण क्षेत्र में नहीं होना चाहिए।
- रसोईघर-पूजा कक्ष, शौचालय-शयन कक्ष, सीढी-अध्ययन कक्ष परस्पर ऊपर-नीचे नहीं होने चाहिए।
- रसोईघर में स्टोर / बरतनों की अलमारी दक्षिण-पश्चिम में होनी चाहिए।
- पानी का नल रसोईघर के उत्तर-पूर्वी क्षेत्र में होना चाहिए।
- खाना पकाने की स्लैब पूर्वी व उत्तर दिशा की दीवार को स्पर्श किए बिना पश्चिम, दक्षिण दिशा में बना सकते हैं।

### वेध उपचार (Remedy)

वेध कोई इस प्रकार का दोष नहीं है जिसका कोई उपचार न हो अथवा इसके कारण उक्त भूखण्ड को ही त्याग दिया जाये। इन वेधों का शोधन उपचार आदि करके निवास योग्य बनाया जा सकता है।

- एक सामान्य कोणों वाला भूखण्ड वह है जिसके सभी कोने बराबर हो। वह प्लॉट वर्गाकार व आयताकार कहा जाता है। यह निवास के लिए उपयुक्त माने जाते है। जब किसी भूखण्ड में कोई भुजा कम हो जैसे-

यह भूखण्ड वायव्य कोण की दिशा में अधिक बढ़ा हुआ है। यह आर्थिक हानि प्रदान करने वाला कहा गया है। इसके दक्षिणी छोर पर कोई लैम्प पोस्ट या ऊँचा वृक्ष रोप देना चाहिए।

- भूखण्ड यदि दक्षिण अर्थात् आग्नेय कोण में बढ़ा हुआ है तो दक्षिण पश्चिम में भारी निर्माण कराते हुए उत्तर-पूर्व में अधिक खुला स्थान छोड़ देना चाहिए।
- जो भूखण्ड पूर्व दिशा से दक्षिण से अधिक बढ़ा हुआ हो उसके उपचार के लिए उस हिस्से में निर्माण न कराये। यदि भूखण्ड के पूर्व व दक्षिण दिशा में भवन निर्माण कर लिया जाये तथा उत्तर-पश्चिम क्षेत्र को रिक्त छोड़ दिया जाये तो परिवार में कभी शांति नहीं रहती।

**नेष्ट द्वार**

- पूर्वी आग्नेय में मुख्य द्वार – ईशान कोण से एक-दो भाग छोड़ कर निर्माण करायें।
- दक्षिण नैर्ऋत्य में मुख्य द्वार – दक्षिण में आग्नेय कोण से एक और भाग छोड़ कर निर्माण कराये।
- पश्चिमी नैर्ऋत्य में मुख्य द्वार – दो और भागों को छोड़ कर निर्माण कराये।
- उत्तरी वायव्य में मुख्य द्वार – वायव्य कोण से एक भाग छोड़ कर द्वार बनाना चाहिए।

वास्तुशास्त्र को ज्योतिष शास्त्र के एक रूप में भी स्वीकारा गया है। इसमें भी तिथि, वार, मुहूर्त व शुभ समय आदि का विशेष स्थान है। साथ ही मनुष्य की जन्मकुंडली उसकी राशि आदि के अनुसार भी निर्माण कराने सम्बन्धी जानकारी पायी जाती है।

**वास्तु सम्बन्धी शोध**

- महर्षि वैदिक आर्किटेक्ट कंसलटेंसी सर्विस के निदेशक एम. वेंकटेश्वरलू वास्तु विज्ञान को ही आज का आधुनिक विज्ञान मानते है। पृथ्वी के उत्तरी ध्रुव और दक्षिणी ध्रुव के मध्य में एक बड़ा चुम्बकीय क्षेत्र है। मनुष्य के रक्त का मुख्य तत्व लोहा है। लोहे का चुंबक से सीधा संबंध है। इसलिए दक्षिण दिशा के प्रवेशद्वार वाले भवन के निवासी के मस्तिष्क या हृदय की रक्त आपूर्ति पर प्रतिकूल असर होता है। रक्त कैंसर की संभावना रहती है। अमेरिकन शोधकत्ताओं का भी यही दृष्टिकोण है।
- पृथ्वी पर ऊर्जा का प्रभाव समान होता है। इसी में सकारात्मक व नकारात्मक ऊर्जा के बिन्दु ढूँढने होते हैं। शयनकक्ष व अध्ययनकक्ष सकारात्मक ऊर्जा केन्द्रों में होने चाहिए। कम सकारात्मक क्षेत्र में शौचालय होना चाहिए, क्योंकि यहाँ आदमी सबसे कम समय रहता है।
- वैदिक वास्तु अध्ययन पर अनेक वास्तुकारों ने अपनी रिपोर्ट में कहा है कि कोई स्थान बुरा नहीं होता, उसका प्रयोग करने की विधि बेहतर होनी चाहिए।
- वैदिक वास्तु शास्त्र आधुनिक विज्ञान पर आज भी खरा उतरता है। 3 सितंबर, 1995 के 'दैनिक आंध्र प्रभा' में प्रकाशित शीर्षक 'उत्तरी दिशा का सिराहना अरिष्टदायक है' में इसका उल्लेख है।
- बंगलौर के वैज्ञानिक एवं सांकेतिक शास्त्र संगठन तथा मद्रास के वी.एच.एस. स्वास्थ्य अनुसंधान केंद्र के संयुक्त शोध में इस महत्त्वपूर्ण तथ्य की पुष्टि हुई है कि उत्तरी दिशा में सिर करके सोने से चुंबकीय तरंगों का मस्तिष्क पर विपरीत प्रभाव पड़ता है। फलस्वरूप व्यक्ति तनावग्रस्त एवं असंतुलित रहता है। जिसका प्रत्यक्ष परिणाम व्यक्ति के दैनिक, सामाजिक एवं आर्थिक क्रियाकलापों पर पड़ता है।

● महर्षि वैदिक विश्वविद्यालय में स्थापत्य वेद और वास्तु पर अनेक अनुसंधानों के पश्चात् यह पाया गया कि यूरोप और अमेरिका में भवनों के दक्षिण दिशा में बने प्रवेशद्वारों को बंद कर वास्तु सम्मत निर्माण के बाद परिवर्तन देखा गया।

● भारत सरकार के स्कूल ऑफ प्लानिंग एंड आर्किटेक्चर के वास्तु विभाग में अनुसंधान कार्य हो रहा है जो कि पूर्ववर्ती अनुसंधानों की सफल परिणति का प्रभाव है।

**वर्तमान में वास्तुशास्त्र की प्रासंगिकता**

